Tanjore Saraswati Mahal Series No. 83.

RAGHUNĀTHA VILĀSA

A SANSKRIT DRAMA

BY

YEGNANĀRĀYAṆA DĪKSHITHA

॥ रघुनाथविलासम् ॥

नाम नाटकम्

यज्ञनारायणदीक्षित

विरचितम् ।

015,2M67.1
J8

1958

32/-

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

015,2M67,1 6474
J8
Dikshitha, Yeghanara-
yana
Raghunatha vilasa.

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

015,2M67,1
J8
6474

Tanjore Saraswati Mahal Series No. 83.

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

1958

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

015,2M67,1 6474
J8
Dikshitha, Yeghanara-
yana
Raghunatha vilasa.

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

RAGHUNATHA VILASA

OF

YEGNANARAYANA DIKSHITA

A Drama depicting the life of Raghunatha Nayak of Tanjore.

Edited with a introduction
BY
Sri K. V. Venkatasubrahmanya Sastri
Vedanta Sironmani, Vedanta Visarada,
Sanskrit Pandit, Saraswati Mahal,
TANJORE



Published by
Sri S. GOPALAN, B.A., B.L.,
Honorary Secretary,
For The Administrative Committee
SARASWATI MAHAL LIBRARY.
TANJORE.

1958

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

015,2M67,1
J8

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 6474

Printed at the Sri Vidya Power Press, Kumbakonam.

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तञ्जपुरी सरस्वतीमहाल ग्रन्थमाला. पुष्पम्—८३.

॥ रघुनाथविलासम् ॥

नाम नाटकम्

यज्ञनारायणदीक्षितवरै

विरचितम्

इदं किल

तञ्जपुरी विराजमान सरस्वतीमहालय संस्कृतपण्डितवर्यैः

वेदान्तशिरोमणि, वेदान्तविशारदोपाधिधारिभिः

के. वी. वेङ्कटसुब्रह्मण्य शास्त्रिभिः

परिशोध्य प्रकाशयोग्यतां आनीतम्

तञ्जपुरी सरस्वतीमहाल निर्वाहिकसमित्याः मान्यमन्त्रिभिः

एस्. गोपालन्, बी. ए., बी. एल्.,

इत्येतैः प्रकाशितम् ।

किंमत्] १९५८ [रू. ~~२-०-०~~. 32.00

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

PREFACE.

This publication contains a historical Drama on the life Raghunatha Nayaka, the most illustrious Nayak Ruler of Tanjore by his Minister Yejnanarayana Dikshita famous for his poetic gifts. The diction of the Drama is dignified and contains a good description of the various activities of the King and the various parts of the spacious and beautiful palace of the Nayak Rulers. It is a permanent addition to Sanskrit Literature and souvenir of Tanjore History.

The work has been ably edited with Sanskrit version for all the Sanskrit passages and an introduction by our Sanskrit Pandit, Sri K. V. Venkatasubramanya Sastri, Vedanta Siromani, Vedantâ Visarada and our thanks are due to him for the valuable services.

We are grateful to the Government of Indian Union for their timely grant that has enabled us. We publish this and other valuable manuscripts of the Library.

SARASWATI MAHAL
TANJORE
26—3—1958.

S. GOPALAN
Honorary Secretary.

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

॥ भूमिका ॥

बिम्बितलोलम्बालङ्कृतमुकुरायितकपोलतलमेकम् ।
लम्बोदरं तमालच्छविमालम्बेऽन्तरायकुद्दालम् ॥ १ ॥

भो भारतजनुषो मानुषाः! मनीषालक्ष्यं कुरुत प्रेक्षणकमिदं रघुनाथविलासाख्यं। यत्किल सुख्यं विनिर्मितं विख्येन मखिवर्येण श्रीयज्ञनारायणाख्येन प्रख्यातरघुनाथनायकभूपालमधिकृत्य। अयं किल निखिलनिगमागमव्याहारचर्यादिचतुरः कविवरो विश्रुतयशसां बहुश्रुतानां षड्दर्शिनीपारदृश्वनां गोविन्दाध्वरिणां भवति तनुप्रतिभूः। अनेन कविवरेण्येन निर्मिततया निरीक्ष्यतेत्र ग्रन्थत्रितयम्। तत्तावत् 'रघुनाथविलासनाटकं, रघुनाथभूपविजयः, साहित्यरत्नाकरमहाकाव्यं' इति एतच्चास्य नाटकस्य प्रस्तावनातः प्रस्तुतो भवति। एतन्नाटकनेतुश्च रघुनाथभूपालस्य सप्तदशशतकीयत्वात्तत्समकालताचास्य कवेरुन्नीयते। अस्य किल नाटकस्य मूलकोशः कश्चन काकलमयः। ग्रन्थरत्नमप्येतत्प्रत्नतमाक्षरं प्रमादकलिताक्षरमप्याकलिताक्षिगोचरतां प्राप्यायं जनः, पुनः पुनः परिवर्त्य निरीक्ष्य परीक्ष्य च; विच्छायमपि च्छायामात्रेण संयोजयंस्तत्रभवतां संख्यावतां समक्षं नयति। अत्र मतिसहजा मामकीना मन्तवश्च क्षन्तव्या इति सप्रश्रयमभ्यर्थये।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

॥ ग्रन्थत्रयम् ॥

श्रीयज्ञनरायणमखिवर्येण विरचिते ग्रन्थत्रये ; रघुनाथभूपविजयाख्यो ग्रन्थः सर्वथा नोपलभ्यते कुत्रापि । साहित्यरत्नाकरमहाकाव्ये तु षोडशसर्गान्त एव भाग उपलभ्यते ; नैतावता भागेन काव्यपरिपूर्तिर्दृश्यते । इदं तु नाटकमेतादृशावस्थमेकमेव काकलपत्रकोशात्मकम् । यस्य त्वंकनम् : B. 5420 D. 4487 इति ।

॥ कविः ॥

अयं किल यज्ञनारायणमखिवर्यो महाकविः षड्दर्शिनीदर्शिनां भुवनविदितानां महीपत्यच्युतनायकास्थानमधिस्थितवतां मन्त्रिश्रेष्ठानां गोविन्दमखीन्द्राणां तनुजन्मेति ; साहित्यरत्नाकराद्रघुनाथविलासनाटकाच्चवगम्यते तथाहि—

नाटके प्रथमांके. १९, २० श्लोका :—

अस्य श्रीरघुनाथभूवलरिपोरध्यासितार्धासनः
प्रज्ञावैभवखंडितप्रतिनदत्पाखंडषण्डस्मयः ।
कुर्वन्व्याक्रिययाऽतिविश्रुततरं कौमारिलं दर्शनं
गोप्ता नित्यगवीरसौ विजयते गोविन्दयज्वाग्रणीः ॥१९॥

षड्दर्शनाभिनवदुग्धसरित्परिण्यो
निर्मथ्य यत्नरहितं निजया धियैव ।
विश्राणयन्ननुदिनं विबुधावळीना-
मेतद्रसं मुररिपुं भुवि योऽतिशेते ॥ २० ॥ इति ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

साहित्यरत्नाकरे सर्ग १ श्लोक १३ :—

अद्वैतविद्याविभवावलम्बा-
न्गोविन्दयज्वेन्द्रगुरूनुपासे ।
निर्मथ्यषड्दर्शननीरधीन्ये
धियैव सारान्ददते बुधेभ्यः ॥ १३ ॥ इति ।

किञ्चायं महाकविः श्रुतिस्मृतीतिहासादिनिखिलागमलौकिकव्याहारचातुरीधुरीणः स्वयं च यायजूकः ; परं तु चतुर्विधकवितासरणौ केवलं श्रीरघुनाभूपालेन दृढं शिक्षित इति वसिष्ठवंशोद्भवश्चैत्यवगम्यते । तथाहि—

साहित्यरत्नाकरे सर्ग १ श्लोक ५१, ६२ :—

पातञ्जलं भाट्टमतं च तर्कमद्वैतराद्धान्तमवैमि किं तैः ।
प्रबन्धसन्दर्भभरैः कवित्वविद्यामिदानीं प्रकटीकरोमि ॥ ५१ ॥

प्रौढश्रीरघुनाथभूपतिकृपास्फारीभवत्साहिती-
साम्राज्यो निगमागमार्थनिपुणः श्रीयज्ञनारायणः ।
गोविन्दाध्वरिसूनुरग्रिममिमं सर्गं मखिग्रामणीः
काव्ये पूरयति स्म विस्मयकरे साहित्यरत्नाकरे ॥६२॥ इति ।

नाटके प्रथमांके श्लोक १३ :—

शास्त्रे नैकविधे विधेयमतयः सामर्थ्यमव्याहत-
व्याहारेष्वपि ते समं विदधते वासिष्ठवंशोद्भवाः ।
ख्यातस्तेषु स एष किञ्च कवितारीतौ दृढं शिक्षितः
प्रौढश्रीरघुनाथभूमिपतिना प्राज्ञावतंसेन यत् ॥२३॥ इति ।

किञ्चायं कविवरेण्यः स्वयं श्रीरघुनाथभूपेनैव स्वस्याननळिनीराजहंसतया महित इति कवेरस्य वाक्येनैवावगम्यते ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

साहित्यरत्नाकरे सर्ग ६ श्लोक ७६ :—

काव्यालंकृतिनाटकादिकलनापाण्डित्यमत्यद्भुतं
सर्वज्ञो रघुनाथभूशतमखो यस्योपदिश्य स्वयम् ।

आदातुं गुरुदक्षिणामभिमतामर्होप्यहो दत्तवा-
न्कर्णालंकरणं निजं च पतगं पादांगदं कंकणम् ॥७६॥ इति ।

कृष्णयज्वभि र्डिण्डिमकुलमण्डनपंडितशिखामणिसोमनाथेन चास्य कवेर्वाणी प्रशस्यते ; यतोऽयं तत्समकालीन इति ज्ञायते । तद्यथा—

कृष्णयज्वनां ; प्रथमांके श्लोक २५ :—

द्राक्षामद्राक्षमिक्षुद्रवमपिवमपां क्षौद्रमक्षुद्रमादं
मोचामाचाममुच्चैः क्वथितमदपयः शर्करामप्यचर्वम् ।
तानि श्रीयज्ञनारायणमखिवरवाङ्माखरीभि-
स्तयन्ते यातायामान्यमृतमविषयो नन्दितुं निन्दितुं वा ॥२५॥

सोमनाथस्य ; प्रथमांके श्लोक २६ :—

अमृतमृगमदादीनाद्रियन्तां वराकाः
कतिचन करणानां शर्म निर्मातुकामाः ।
अपि तु वयमपारां यज्ञनारायणोक्त्या
निखिलकरणनाडीनिर्वृतिं कल्पयामः ॥ २६ ॥ इति ।

॥ कवेः पिता ॥

अस्य तु महाकवेः पितरो गोविन्दमखीन्द्रा मन्त्रिणः पुरोहिताश्चाभूवन्नच्युतनायकस्येति ; तदानीं श्रीतञ्जानगरीनायकराजधान्यभूदिति च साहित्यरत्नाकरमहाकाव्यादवगम्यते । इमे किल गोविन्दमखीन्द्रा अच्युतभूपालेन प्रार्थिता रघुनाथभूपालस्यापि मन्त्रिणः पुरोहिताश्चाभूवंस्तस्य पट्टबन्धनं कृत्वा । तद्यथा—

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

साहित्यरत्नाकरे दशमे सर्गे श्लोक ७६ :—

कुशली रघुनाथभूमिपालः कुलकूटस्थपुरोहित त्वयायम् ।
अधुनाहमिवात्तराजनीतिः प्रभवेद्भूपरिपालने मखीन्दो ! ॥७६॥

इति । इमे किल कौमारिलदर्शनव्याख्यातारः संगीतसुधादि बहुग्रन्थनिर्मातारः षड्दर्शिनीपारदृश्वानो गोविन्दमखीन्द्रा ; कर्णाटभाषयि स्वयं व्यहरमाणा वासिष्ठवंशोद्भवाः । किञ्च मखीन्द्रशब्देन प्रासद्धिमुपगताः । हरिवंशसारचरितमहाकाव्यप्रणेतारश्च गोविन्दमान्त्रिणो ; यद्यपि तद्व्याख्यातृभिरप्पय्यदीक्षितेन्द्रैः "षड्दर्शिनीदर्शिनां" इति वर्णितास्तथापि ; षड्दर्शिनीदर्शिनां मन्त्रिणां च तेषां "कोण्डक्ष्मापपुरन्दरामरगुरोः" इति काव्यसर्गान्तश्लोके स्वयं निर्देशात् , शाण्डिल्यान्वयसंभूतत्वनिर्देशाच्च , तेत्वान्ध्राः किञ्च न मखिन इति चावगम्यते । किञ्च साहित्यरत्नाकरस्यप्रकृतनाटकस्य चैककर्तृकत्वादिषु बहूनि प्रमाणानि वर्णनारीतितोपि निरूपयितुं यद्यपि शक्यन्ते ; तथापि पठितृभिः स्वयमुन्नेयानि तानीति प्रस्तवनाविस्तरभयादुपरम्यते ॥

इत्थं

विदुषां विधेयः

नी. वै. वेङ्कटसुब्रह्मण्य शास्त्री.

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रीगणेशाय नमः

श्रीरघुनाथविलासनाटकम् ।

प्रथमोऽङ्कः

देवीं यो लभते स्म वारिधिभवां दिव्यं च यो वा मणिं
ग्राहं साग्रहमङ्गसा ग्रहकृते भित्वा च सत्वाधिकम् ।
यः सारंगमरक्षदक्षतकृपाव्यापारतस्तादृशो
राजत्यम्बुजलोचनो भुवमवत्रंगस्थलाभ्यन्तरे ॥ १ ॥

किञ्च ;

तन्यादन्यादृशं ते विभवमिभमुखो(खं)नर्मणावर्मयित्वा
चर्म द्वैपं चरिष्णुः पुररिपुसविधे यः शिशुत्वाविधेयः ।
कुर्वन्दुर्वृत्तदन्तिभ्रममवनिभृतो नन्दनां मन्दसान्धि
प्रापय्यापास्तधैर्यां पितरमतितरामातनिष्ट प्रहृष्टम् ॥ २ ॥

अपि च ;

सव्यांगं भुजगोपवीतवहनात्साशंकमन्यांगतः
साकूतस्मितफुल्लगल्लफलकं स्पृष्ट्वा समाश्वासयत् ।
तत्संस्पर्शवरेण(वशेन) जातपुलकं त्वन्मानसे तन्महः
सामानाधिकरण्यधाम जयतु स्त्रैणस्य पौंस्नस्य च ॥ ३ ॥

(नान्द्यन्ते)

सूत्रधारः—(परिक्रम्यावलोक्य च, सहर्षम्)

कवनरससुधायाः कापि पानीयशाला
बुधविविधकलानां बोधिकापूर्वसन्ध्या ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अभिनयविभवानामास्तिकी जीवनाडी
जयति परिषदेषा जन्मभूमिर्गुणानाम् ॥ ४ ॥

(पुनर्निरूप्य)

अस्यां किल निखिलशैलूषतपस्याङ्कुरितसान्दृष्टिकबुधसमष्टिसमधिष्ठितायां युधिष्ठिरपुरुपुरुकुत्सनहुषनैषधमरुत्तमरुत्तनययातिभरतभगीरथपरीक्षित्प्रमुखमहीक्षित्प्रभावपरिभावकबाहार्गळनिरर्गळनिर्गळत्प्रतापतपनतापितद्वीपान्तरगतविमतभूपान्तःपुरपुरन्ध्रिजननिरन्तरचालितधवळचामरकन्दाळितगन्धवहस्तनन्धयाशिशिरीकृतसरीसृपपतिशिरोधृतिगरोपचितामिषंगचकितावनीकृतभुजापरिष्वंगद्विरुक्तमरुत्वन्मणिखचितकेयूरमयूखो ; दैनन्दिनापदानायितमहादानाधिकस्फूर्तिकीर्तिपूरकर्पूरपूरितजगदंडभांडहाटककरण्डः समुद्दण्डपाण्ड्यतुण्डीरमण्डलाखण्डलमदखण्डनशौण्डीभवदखण्डशौण्डीर्यमण्डितभुजप्रकाण्डः संगीतसाहित्यसौहित्यभंगीनिर्माणकर्मान्तिकप्रबन्धशतनिबन्धनामन्दधौरंधर्यधिषणासनाथो रघुनाथजनाधिनाथो मणिधोरणीरचितद्युमणिघृणिगर्वमुद्रासनमधिवसति भद्रासनम् ॥

इतोपि किमपरमभिलषणीयं परिषदः ? यदिदानीम्—

सौन्दर्यं प्रसवास्त्रविस्मयकरं शौण्डीर्यमम्भोनिधि-
द्वीपाभ्यन्तरवासदृप्तहृदयान्द्वेष्यानलं शिक्षितुम् ।
पाण्डित्यं च बृहस्पतिस्मयहरं पारेगिरां प्राभवं
यस्यासौ रघुनाथभूपपरिणीरस्या वयस्यायते ॥ ५ ॥

अस्य प्रत्यभिषेणने क्षितिपतेः प्रत्यर्थिनः पार्थिवान्
शस्त्राशस्त्रिकदर्थितान्गणयितुं नास्ति प्रगल्भो जनः ।
यद्यस्ति प्रभुरेव संप्रति मुहुस्तैर्भिद्यमानंरवेः
पद्यं तत्परिहृत्य पार्श्वकुहरे यश्च(कश्चि)त्कुहापि स्थितः ॥ ६ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

किञ्च ;

कटकपतगकर्णिकाङ्गदाद्ये विविधमहार्घविभूषणे समेपि ।
विबुधपरिषदो विविच्यतेऽसौ प्रभुरिह हन्त निजप्रभाविशेषैः ॥७॥

अपि च ;

यल्लावण्यलवावकर्णनवशादेणीदृशा स्वीयया
भर्तेति प्रसवायुधो न गणितो भार्येति सा तेन च ।
स्त्रीत्वं भावयतात्मना तदधुना श्रोतुं जयन्तादिभिः
तस्य श्रीरघुनाथभूवलरिपोः साम्यं न शक्नोम्यहम् ॥ ८ ॥

(नेपथ्ये) .

प्राप्तोहं नटकेसरी परिजनैरन्यैः शठैः किं नरैः
किं वा दप्पलवेण धुत्त णडणे दंसेहि सत्तिं तुमम् ।

(छा) [किं वा दर्पलवेन धूर्त नटने दर्शय शक्तिं त्वम्]

शक्तिं मे नटने स एव लटहः संध्यानटः प्रेक्षितुं
सो णट्टा अ रिपीअ(विहूअ)यंखु भुवणे संझाणडाणं सदम् ॥९॥

(छा) [स नर्ता च विभुश्च यत्खलु भुवने सन्ध्यानटानां सदः]

सूत्रधारः—(श्रुत्वा सायूयं) अयमभिनयोऽभिनयकालासु ; कलावत्या मम सुदत्या विवदमानो न किमहंकारी स नटकेसरी ? भवतु ; सिद्धमद्य नः समीहितम् । यदिह सममावयोर्विवदमानयोः, सदसि रघवाथमहीक्षि(ता)तः सरसकलासु शिक्षिताः परीक्षितारो विबुधाः ।

(ततः प्रविश्य नटकेसरी, उद्धतवेषो राजानमवलोकयन्भयमभिनयन् किञ्चिदिवापसृत्य)

सौम्या गुणाः परिचिता इव सन्निधौ मा-
माकारयन्ति पुनरस्य महोविशेषाः ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

रुन्धन्ति हन्त रुचिता इव तन्न किञ्चि-
दत्रोपसर्तुमपसर्तुमपि क्षमोहम् ॥ १० ॥

(पुनर्निरूप्य सविस्मयम्)

नटति मयि सभाया नायका ये महीपाः
दिशि दिशि दुरवापं द्वीपमध्यासिताश्च ।
सदसि पुनरमुष्मिन्सांप्रतं ते भजन्ते
धरणितलवलारेर्दासतां पार्श्वभाजः ॥ ११ ॥

(प्रणम्य सविनयं)

जलनिधिगर्भवासवशनिर्भरदर्परिपु-
प्रतिहतिहेतुसेतुकृतिनूतनदाशरथे ।
विबुधविनर्तकाभिमतकल्पनकल्पतरो !
जय करुणासनाथ रघुनाथजनाधिपते ॥ १२ ॥

(उभौ परिक्रम्याभिमुखौ भवतः)

नटकेसरी—(सावज्ञम्)

सति मयि सकलनटानां करिणामिह निग्रहाय केसरिणि ।
नाट्याचार्याभिख्यां नट एष प्राकृतः कथं वहते ॥ १३ ॥

नाट्याचार्यः—(सस्मितम्)

वादिनोर्निजकलासु वैदुषीमावयोरयमवेक्ष्य भूपतिः ।
नन्दने वहतु निन्दनेऽथवा कर्तृतां तदिह(किं वि) कत्थसे कथम् ॥

(उभावन्तरा प्रविश्य पारिपार्श्वकः करद्वयेन तौ निवार्य)

पारिपार्श्वकः—सखे नटकेसरिन् ! 'इति' मन्मुखेन भवन्तमाज्ञापयति स राज्ञामग्रणीः । नाट्यादिषु मया स नाट्यचार्यः सुशिक्षितः । तत्साम्यमिच्छता भवता नाटकेषु नाट्यं नृत्यं वा प्रयोज्यमिति कथ्यताम् ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नटकेसरी—(साञ्जलिवन्धनम्)

आहार्यांगिकसात्विकवाचिकभेदाच्चतुर्विधाभिनयैः ।
वाक्यपदार्थव्यञ्जकमिह नाट्यं नाटकीयमनुकरणम् ॥ १५ ॥
आहार्यव्यरिक्तैरपराभिनयैः पदार्थमात्रस्य ।
व्यञ्जकमभिमतभूपाद्यनुकरणं नाटिकासु नृत्यं तु ॥ १६ ॥

नाट्याचार्यः—(साभ्युगमं) तथा (इति शिरःसोपस्लाघ्य)

रघुनाथभूभृता निर्मितानां रघुनाथविलासमदनबलदूत्यादीनां नाट्यनृत्ययोः कुत्रवान्तर्भावः ?

नटकेसरी—(विहस्य) नोभयत्राप्यन्तर्भावस्तेषाम् ; परं तु नृत्त एव । तथाहि—

आहार्यसात्विकपराभिनयाप्तमंग-
विक्षेपणेन च युतं विबुधा यदाहुः ।
तन्नृत्तमेतदपि ताण्डवलास्यभेदात्
द्वेधात्र लास्यनटने खलु ते प्रयोज्याः ॥ १७ ॥

(पारिपार्श्विकं प्रति) सखे कौषीतक!

विदुषीतरा यवनिकान्तरिता प्रियदर्शिका नाम मत्प्रियतमा नानाविधरघुनाथविलासादिलास्यप्रयोगेषु प्रशस्तेयमास्ते। अस्य रघुनाथजनाधिपतेः परिसरवर्तिनस्ते जानन्ति तामन्तरीपाधिपा भूपाः ।

नाट्याचार्यः—(राजानमुपसृत्य) देव! भवता बाल इत्येव नोपेक्षनीयोयमरिणनटनरीतिषु नटकेसरी ।

(प्रविश्य राजपुरुषः)

महाराजेन वितीर्णानि (इति ताभ्यां पतगकर्णिकादीनि भूषणानि प्रदाय निदेशपत्रिकां च ददाति, तदादाय, इति तौ वाचयतः)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सख्यं युवां नटवरौ समवाप्य ताव-
दव्याहतप्रणयमस्मृतपूर्ववैरम् ।
तत्प्रस्तुतं सदसि मे तरसा रसाना-
मस्मिन्मुदेऽभिनयतं पदमद्भुतानाम् ॥ १८ ॥

(उभौ साञ्जलिबन्धं राजाभिमुखौ भूत्वा)

देव! तदेवमभिहितमतिहितमित्यवहितम् ।

नाट्याचार्यः—सखे नटकेसरिन् इतः परमावां परस्परं सौभ्रात्रमेव भजावः ।

नटकेसरी—नाट्याचार्य! नाट्यादिष्वाचार्य इव मे बहु माननीयोऽसि ।

(उभौ परस्परमाश्लिष्यतः)

नटकेसरी—आर्य नाट्यचार्य! तत्रभवता रघुनाथभूभृता 'तदि'ति सामान्यतो निर्दिष्टं; किमिष्टं रूपकमिति न निरूपयामि । अथवा कृतं सन्देहेन । "नाटकेषु नाट्यं नृत्तं वा प्रयोज्यमिति" परीक्षितवतोमहीक्षितस्तस्याभिमतं नाटकमेवेत्यवधारयामि ।

नाट्याचार्यः—सखे नटकेसरिन्! राजाभिमतं सम्यगूहितं भवता । तच्च "रघुनाथविलासं" नाम नवनवरसो(द्भाट)द्वाहकं नाटकम्।

नटकेसरी—आर्य नाट्याचार्य! नाम्नैव तस्य नायकः सकलकला-कलापकुशलो रघुनाथनरपालोऽयमित्यूह्यते । तस्य तादृशः कोवा कवयिता ?

नाट्याचार्यः—(अङ्गुल्या निर्दिशन्)

अस्य श्रीरघुनाथभूवलरिपोरध्यासितार्धासनः
प्रज्ञावैभवखंडितप्रतिवदत्पाखंडषण्डस्मयः ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कुर्वन्व्याक्रिययाऽतिविश्रुततरं कौमारिलं दर्शनं
गोप्ता नित्यगवीरसौ विजयते गोविन्दयज्वाग्रणीः ॥ १९ ॥

किञ्च ;

षड्दर्शनाभिनवदुग्धसरित्परिण्यो
निर्मथ्य यत्नरहितं निजया धियैव ।
विश्राणयन्नुदिनं विबुधावलीना-
मेतद्रसं मुररिपुं भुवि योतिशेते ॥ २० ॥

अपि च ;

चत्वारः कृतसर्वतोमुखमहासत्रेण गाढं शिला-
यूपा येन निखानिताः प्रतिदिशं युक्तं चिरावास्थितेः ।
सौराज्यं रघुनाथभूमिपतिना संप्रापिते क्ष्मातले
पारेसह्यसुतं वृषेण वसता पादा इव स्थापिताः ॥ २१ ॥

रथ्यावाजिकधेनुकाश्वगजतामुख्याजहद्दक्षिणं
पार्षादाप्तपदोत्तरं क्रतुवरं तं वाजपेयाभिधम् ।
येनाहार्यं किमप्यहार्यविभवं साम्राज्यलक्ष्मीपदं
संप्राप्तो रघुनाथभूशतमुखो जेजीयते सांप्रतम् ॥ २२ ॥

नटकेसरी—समश्रौषि च पुरा त्रैस्रोतसप्रवाहपवित्रितायां तस्यां वाराणस्यां वसतामेव सतां प्रत्यहं तत्कृतहिरण्यगर्भतुलापुरुषादिमहादानप्रतिग्रहनिरर्गळविभवागमानुदिवसप्रशंसनादाप्तवाजपेयनाम्नि सप्ततन्तुवरे निरन्तरेक्षणकुतूहलिना रघुनाथभूतलवलद्विषा द्विषाहास्त्रेष्टकचितश्येनचयनस्य प्रतीष्टकमध्वर्यवे सकलाध्वरक्रमाविदे विष्युक्ता दक्षिणा दापितेति ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नाट्याचार्यः—स एवाध्वर्युरध्वरभोजनजनविविधहव्यपरिवेषको नव्य-शब्दप्रपञ्चनिर्माणकर्माऽभिनवपितामहः पुनरस्यापि तावन्नाटकस्य कवयिता।

नटकेसरी—तस्य कथं सवत्रापि तत्तादृशमखण्डितं पांडित्यम्

नाट्याचार्यः—

शास्त्रे नैकविधे विधेयमतयरसामर्थ्यमव्याहत-
व्याहारेष्वपि ते समं विदधते वासिष्ठवंशोद्भवाः।
ख्यातस्तेषु स एष किञ्च कवितारीतौ दृढं शिक्षितः
प्रौढश्रीरघुनाथभूमिपतिना प्राज्ञावतंसेन यत् ॥ २३ ॥

नटकसेरी—तत्र भवता रघुनाथभूभृता शिक्षित इत्यनेनैव तावदस्यापि कवयिता 'यज्ञनारायणयाजूक' इति जानामि। यो वा रजनाथभूपविजयसाहित्यरत्नाकरयोः काव्ययोः कर्ता। स एव खलु साहित्यरत्नाकरनाम्नि काव्ये तत्कृतां शिक्षां बहुमतिं चैवमुपश्लोकितवान्।

काव्यालंकृतिनाटकादिकलनापाण्डित्यमत्यद्भुतं
सर्वज्ञो रघुनाथभूशतमखो यस्योपदिश्य स्वयम्।
आदातुं गुरुदक्षिणामभिमतामर्होप्यहो दत्तवान्
कर्णालंकरणं निजं च पतगं पादांगदं कंकणम् ॥ २४ ॥
तस्मादस्माभिरस्य कवेरतिवेलरसरमणीया वर्णनीया वाणी।

नाट्याचार्यः—प्रागेव वर्णिता सा वावदूकविद्वद्वतंसायितवचसा विधुतालंकारिकाविबुधाहंकारेण कृष्णयज्वना। तथाहि—

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

द्राक्षामद्राक्षमिक्षुद्रवमपिबमपां क्षौद्रमक्षुद्रमादं
मोचामाचाममुच्चैः क्वथितमदपयः शर्करामप्यचर्वम् ।
तानि श्रीयज्ञनारायणमखिवरवाङ्मौखरीवैखरीभिः
तायन्ते यातयामान्यमृतमविषयो नन्दितुं निन्दितुं वा ॥ २५ ॥

किञ्च; डिण्डिमकुलमण्डनेन पंडितशिखामणिना, सोमनाथेन;

तथाहि—

अमृतमृगमदादीनाद्रियन्तां वराकाः
कतिचन करणानां शर्म निर्मातुकामाः ।
अपि तु वयमपारां यज्ञनारायणोक्त्या
निखिलकरणनाडीनिर्वृतिं कल्पयामः ॥ २६ ॥

नटकेसरी–अस्ति, श्रूयत;

नाट्याचार्यः—सखे! नटकेसरिन्नत्याश्चर्यकरी खलु बुद्धिमत्ता भवतः। यदहं वासिष्ठकुलसौष्ठवकृते कृतावतारं गोविन्दमखीन्द्रं निर्दिश्य, 'तस्य तनुजोय'मिति पार्श्ववर्तिनमेनं कवीन्द्रं यावन्न निर्दिशामि; ततः प्रागेव देशान्तरेषु तत्प्रसिद्धिमाकर्णितवता भवता, प्रकृते विविक्तमनुक्त एवायं यज्ञनारायणयायजूकोजूको विज्ञकुलशेखरः पादांगदादिनृपासाधारणभूषणभूषितस्सदसि, स एवायमिति प्रत्यभिज्ञातः कवयिता ।

नटकेसरी–आर्य नाट्याचार्य! मादृशानां बुद्धिमत्ता नाम भवादृश-महानुभावानुग्रहायत्ता ।

नाट्याचार्यः—अलमलमियत्या प्रसक्तानुप्रसक्त्या। प्रस्तुतं वस्तु तावदावामवतारयितुं सशिष्याविह यतिष्यावहे ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नटकेसरी–आर्य नाट्याचार्य! विचार्य सम्यगनुबोधितं भवता।

कृती बालः सोयं निरवधिकृपालोकनकन-
त्सुधावीचीनीचीकरणचणसूक्त्या दिशिदिशि।
अमुष्य प्रख्यातो वसति रघुनाथावनिपतेः
सभायामेतस्यां ध्रुवइव समीपे मुररिपोः ॥ २७ ॥

कुत्रापि नाटकस्य कर्ता, नायकोप्युभावेकसभावस्थितौ, मयेत्थमभिनयसमये न दृष्टचराविति, विस्मयातिशयेन विस्मृतवानस्मि। तत्प्रतिपात्रमाधीयतां यत्नः, यथाधिकारं वर्णिकापरिग्रहणक्रियासु। गायनाश्च, कर्णरसायनानि तत्तद्वर्णिकोचितानि गीतानि परिचिन्वन्तु। पाणविकवैणिकवैणविकमौरजिकप्रमुखाश्च; यथायोग्यमेतानि पणवाद्यानि वाद्यानि वादयन्तु। पुनरपरे; अपि नेपथ्यान्तरे, तत्तद्वेषधारणानुरूपप्रतिशीर्षकवर्णचूर्णनविविधपटकल्पनप्रभृतीनि सज्जयन्तु।

(प्रविश्य प्रियदर्शिका)

प्रियद–अज्ज! सव्वं सज्जं। णाडअणायअस्स रहुणाहभूविहुणो भूमिअं, सारंगणामहेयस्स विदूसअस्सवि अहिवियकलाए अनुभववंता णं माणुसा वहंति। देवीए अ चंदकलाए कलावदी वहदीयं। अहं उण णाडयणायआणं एव्वाण्णोण्णं संघडणपासवं मअंतीए वहेमि जोइणीए पडिहावदीए। विक्खंभजोग्गणारअपव्वदभूमिआणि तक्कमं विदंतं भवंतं, णाअरिअं वि णियोजयन्ति भरअउत्ता।

(छा) [आर्य! सर्वं सज्जं। नाटकनायकस्य रघुनाथभूविभोः भूमिकां सारंगनामधेयस्य विदूषकस्यापि; अभिविधकलाया अनुभववन्तएनां मानुषा वहंति। देव्याश्च चन्द्रकलायाः कलावती

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वहतीयम् । अहं पुनर्नाटकनायकयोरेवान्योन्यं संघटनपाटवं भरन्त्या वहामि योगिन्याः प्रतिभावत्याः । विष्कंभयोग्य-नारदपर्वतभूमिके, तत्क्रमं विदन्तं भवन्तं; नागरिकं च नियोजयंति भरतपुत्राः] ।

नटकेसरी–आर्ये! अद्य प्रस्तुतं शरत्समयं सकलराजकविजययात्रा-मौहूर्तिकमधिकृत्य गीयतां तावत् ।

प्रियद–तहा (इति गायति) [तथा]

परिइदपव्वदणारअणिव्गमणं
तअणु राअहंसोयम् ।
विविहसुतित्थविहारी
व्पमदं विअ पद्दुमिणिं अणुसुरेइ ॥ २८ ॥

(छा) [परिचितपर्वतनारदनिर्गमनं तदनुराजहंसोऽयम् ।
विविधसुतीर्थविहारी प्रमदामिव पद्मिनीमनुसरति]

नटकेसरी—आर्ये! इतःपरमप्यनन्तरकरणीयं संविधेहि ।

प्रियद–जं अज्जो आणवेदि (इति निष्क्रान्ता)

(छा) [यदार्य आज्ञापयति]

नाट्याचार्यः—एषोऽस्मि नारदः संवृतः ।

नटकेसरी—अहमपि पर्वतः ।

(इत्युभावपि नेपथ्यान्तरं प्रविशतः)

॥ इति प्रस्तावना ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

॥ ततः प्रविशति विष्टरोपविष्टो नारदः ॥

नारदः—(विषादं विस्मयमप्यभिनयन्नन्यत्रासक्तचित्त इव तूष्णीं तिष्ठति ; प्रविश्य पर्वतः सोद्वेगम्)

पर्वतः—अहो ! दुःसहो मे सुहृद्वियोगः । यदयं समाधिपरवशहृदयं विहाय मामप्यसहाय एव दक्षिणसमुद्राभ्यर्णचरं लोपामुद्रा सहचरं मुनिवरमवलोकितुं भूलोकं चिरादुपगतो ; न पुनरायातः कलहानन्दी कर्मन्दी । (विमृश्य) मध्येपथं किमथवा महीपाला नामालोकयन्समीक्रमसावगस्त्यं विस्मृत्य, मामपि च ; विस्मृत चित्तवृत्तिरास्ते ! कुहापि रणपारणपारिकाङ्क्षी । तावदेन-मन्विष्यामि । (इति नाट्येन परिक्रामन्पुरस्तादवलोक्य) कथमत्रैव मम बालमित्रं वृसीमध्यासीनो वल्लकीमौनिमल्लः । (उपसृत्य) तावदेनमभिवादयामि । (इत्यभिवदयति) ॥

नारदः—(अजानन्निव तूष्णीं तिष्ठति)

पर्वतः—किमयमसहायतया न सहाय इति विचारयन्मां न सम्मानयति! (विचिंत्य) अयं प्राणादपि मानसिके मयि, वीणामौनी न कदापि तथा विचारयिता । किमुतानेन ब्रह्मध्यानपरेण चिरमध्यास्यते! (विमृश्य) कथं पुनर्ब्रह्मसमाधिरहितोऽयमध्येति मध्येपदम् ? अस्य हि ;

उल्लिखति किमपि मानसमुल्लसितविषादविस्मयस्तिमितम् ।
नासाग्रे नयनयुगं न निहितमास्ये च न प्रसादलवः ॥ २९ ॥

नारदः—(श्रुतिमभिनीय) (चिरेण पश्यति)

पर्वतः—(पुनरभिवादयति)

नारदः—(मस्तके हस्तं निधाय) ब्रह्मध्यानपरायणो भव ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पर्वतः—(साञ्जलिबंधं) अत्रभवतः प्रतिगृहीतमाशीर्वचनम् ।

नारदः—(विष्टरार्धं उपवेशयन्सानन्दबाष्पगद्गदम्)

सुहृदं परमं हित्वा सुचिरं हि त्वा समानसुखदुःखम् ।
समयमियन्तं समचरमेकाकी येन निष्ठुरोस्मि ततः ॥ ३० ॥

पर्वतः—

सख्यं भवादृशजनैः सकृदप्यवाप्त-
मस्मद्विधान्ननु कृतार्थयितुं समर्थम् ।
अव्याहतं यदि तदेतदसन्निधाने-
प्येयं भवेत्परमितोपि किमर्थनीयम् ॥ ३१ ॥

नारदः—पर्वत! किमुपचारवचनोपन्यासेन? सर्वत्राव्याजसौहार्ददृष्टान्तत्वेन, दिक्षु यौ ख्यातौ; तावेव खल्वावां, सखे नावदपर्वतौ ।

पर्वतः—सखे! नारद! सखेद इव किं दृश्यसे? विस्मेर इव च;

नारदः—पर्वत! सर्वमेतं मे वृत्तान्तमभिदधामि । सावधानमवधारय।

पर्वतः—(अवहितश्रुतिमभिनीय तिष्ठति) ।

नारदः—पुरा खलु मया पुराभियातिचरणपरिचरणमहिमातिशयसमासादितक्षमानमंकरणचरित्राभिनन्द्यं मैत्रावरुणिं मुनिलोकतिलकमालोकितुं भूमण्डलमाहिण्डमानेन; प्राभातिकपवनेरितक्रमुकपाळीमहलीपरिमळलहरीदूरीकृताध्वपरिश्रमेण; विविधाध्वरसमाहूतपुरुहूतप्रमुखसकलबर्हिर्मुखसन्ततकृतसान्निध्यो, विद्योतमाननिखिलविद्योपदेशविजितसुरदेशिकभूदेवसमाजधन्यतमः, समतन्यत नयनविषयश्चोळविषयः ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सदा यस्मिन्निन्द्रे वसति सति हव्यैकरसिके
न गृह्णीते कोपि प्रसवकलिकं नन्दनवने ।
अथो गृह्णीते चेत्प्रसवधनुरेको दळयितुं
शरौघैरिन्द्राणीं सहचरवियोगव्यसनिनीम् ॥ ३२ ॥

किञ्च ;

प्रयोगे यागानां पारचयावधा यज्ववटुकैः
समन्तात्संभूताः सरभसमुपेताः क्रतुभुजः ।
अथालोक्यामीषामहुतहविषां शुष्कयजनं
हसन्तो यत्रान्यं मखविधिमयन्ते प्रमुदिताः ॥ ३३ ॥

अपि च ;

प्रत्यग्रैः कदळीफलैः परिणतिप्रभ्रंशिभिः संततं
माकन्दप्रसवासवैश्चामिळितैर्मार्गोखिलः पंकिलः ।
पार्श्वद्वन्द्वतरुप्रसूननिपतद्धूलीभरैर्मेदुरो
यस्मिँल्लांगलिभिर्विपाकगळितैरेवाधिकं घट्यते ॥ ३४ ॥

तत्र किल विलसति, निखिलमहाबलनृपकुलविजयमहास्तिकहास्तिकप्रशस्तिमति, गभस्तिमदितनिशान्तशिखरभृशान्तरितदिशान्तरा, निरन्तरायतन्तन्यमाननिरन्तरायतकल्याणवाद्यमानपणवाद्यमानवाद्यकन्दळितध्वनिदळितगिरिकन्दरा, दिगन्तरागतसकलसामन्तराजकोपनीयमानतपनीयरुचिपुञ्जपिञ्जरितधराणितलमीनकेतनमणिनिकेतनचत्वरा, रिपुजित्वरालघुत्वराऽजितरणोद्भटहृद्भटसंघसंकटतरविशंकटविविधहाटकशृंगाटकप्रदेशा; विदेशागतसमुन्नतमुखलीनखलीनखचिततत्तादृशमुक्तामणिविसरदुद्दामधामगरिमपरिहसितहरिहयपुरहयरथवियदंकणविलंघनचतुरगतितुरगचटुलखरतरखुरपुटकुद्दालनिर्दारितबाह्यालिभूपरिसरा, सौधोपरि सरागमणिसरा पाकाहितवनपरिपाका

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

हितविशरणवशरभसपतितवीजपूरफलवीजसन्दोहसन्देहसन्धानगन्धर्व-करसमिन्धानकेळीशुकनिकरसंहितसन्ततसान्निध्या, रसान्निध्यानपर-मानसपरमानन्दनिष्यन्दनिर्माणकर्मान्तिकहर्म्यान्तिकचरलीलाकलापि-कलापभरकलादेशिककैशिक-रजनीकरजनितकदनानुबन्धबदनारविन्द--पाठीनपाटवविनयननयन---निन्दितदन्तिवरकुम्भकुचकुम्भ--निजसेव-नकरपद्मकरयुग्म--दुष्करतरपुष्करकलहलग्नमृणाळविसवलग्न--कृतपल्लव-तल्लजकृपणतोपपादनपादनळिनवारकञ्जाननावारशिञ्जानमणिमञ्जीरसं-जीवितपञ्चाशुगा, प्रपञ्चातीतमहिमनृपतिपंचाननसञ्चारदरी, तञ्जा-नगरी ॥

तामावसन्पुरविमाथिसमानधामा
कामातिशायिसुषमागरिमाति धीमान् ।
धत्ते भुजेन धरणीवलयं वलारि-
रत्नांगदेन सदृशं रघुनाथभूपः ॥ ३५ ॥

पर्वतः—अस्ति, श्रूयते; ततस्ततः ।

नारदः—नानाद्वीपजनाधिपैरनुसृतो नम्रैः प्रकीर्णद्वयी-
वीटीपेटकहेमवेत्रलतिकाभृत्या स्वभृत्यायितैः ।
प्राज्यं राज्यमयं स्वमंत्रितिलकं प्रापय्य स प्रास्थित
प्रौढश्रीरघुनाथपार्थिवमणिस्तीर्थानि संसेवितुम् ॥ ३६ ॥

पर्वतः—येषां योषाः सरसहृदयाः यौवनं भोगहेतुः
सौधाः सौधाकरमणिमयाः सौख्यदं चाधिपत्यम् ।
तादृक्षाणां सकलधरणीमंडलाखण्डलानां
*तत्रामोहः (तत्वामोहं) कथमिव भवेत्तीर्थयात्रा
भिलाषः ॥ ३७ ॥

---

* 'नत्वामोहः' इति वा ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नारदः—इतरेषामेव भूतलवलद्विपामेष स्वभावः ।

किन्तु; न तावदसौ तथाविधः ।

वोढा विभूमीवलयं यतोऽखिलं चतुस्समुद्रीलहरीसमुद्रितम् ।

धर्मानुरोधेन धरावलाहितो विभर्ति नित्यं विषयाभिलाषिताम् ॥३८॥

पर्वतः—भवतु; तथाप्यवितथावाप्तसर्वाकारसम्पदस्तस्य,

साम्प्रतं किं प्रार्थनीयमनेन तीर्थयात्रायासेन?

नारदः—युक्तमुक्तं भवता । तथापि;

दीर्यत्तीरनिवातदन्तुरमहातीर्थं च शीर्णोपल-

त्रुट्यद्दोपुरदुष्प्रवेशविपुलद्वारं च देवालयम् ।

सर्वत्रापि महीतले कलयितुं सद्यः समग्रं नवं

धीरेणाखिलतीर्थसेवन(मिषा)त्तेनाधुना प्रस्थितम् ॥ ३९ ॥

तदाप्रभृत्यहमपि तदालोकनकुतूहलेन, विहाय प्रस्तुतमपि कार्यं, विहायसपदेन सञ्चरमाणो विविधसेनानिवहसेव्यमानेन क्ष्मातलवलविमाथिनानेन, सकलदेशगततीर्थयात्रारसिकेन कुत्रापि सांपरायः परराजकस्य संभवेदिति; आरभ्य सद्यजाप्रभवं भूभृता सममेव, च्छायारण्यपर्यन्तं पुण्यस्थलं सपरितोषमशेषमपि समयासिषम् । तत्र च:

केचित्संत्यज्य राज्यं घनवनकुहरे क्वाप्यलीयन्त भीत्या

मुक्त्वा शौण्डीर्यमन्ये(द्रुत)जलधिजवाद्वीपमापुर्दुरापम् ।

पृथ्वीपालाः परेपि व्यदधत विनताः प्रीतिमेतस्य राज्ञः

तस्मादस्माकमासीत्समरविरहतो हन्त चिन्ता दुरन्ता ॥४०॥

तदा खलु मया, निखिल(तीर्थ) निषेवणजनिताभ्युदयस्वजहृदयस्नानेच्छया लवणापगापरिवृढमवगाहमानस्सबहुमानमुपहारितचिरत्नरत्नराशिरालोक्यत भूलोकनाथः;

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सक्रोधं झटिति वहन्स मण्डलाग्रं
निष्कोशं द्विषदसवे तु लेलिहानम् ।
अंभोधिस्थितमखिलं कुलं धराणां
दम्भोलिं दधदिव जम्भजिन्निहन्तुम् ॥ ४१ ॥

तदा मरुत्तरळतरंगसंकुलः
तरंगिणीपतिरपि चाश्वदृश्यत ।
निवारयन्निव तरवारिवल्लरी-
निपातमुच्चलितकरोच्चयो भिया ॥ ४२ ॥

तदनु तस्य संरम्भमवलोकयन्विश्वंभरावलयजंभभेदिनो महान्केनापि सांपरायस्संभविष्यतीति; ब्रह्मानन्दादपि कमपि महान्तमानन्दमनुभवन्नेव स्तिमित इव क्षणमात्रमवस्थितोऽस्मि ।

पर्वतः—(स्वगतं) वयस्यस्यायं दुःस्वभावः । यदमुष्य ब्रह्मानन्दादपि, विशिष्य सांपरायसन्दर्शनानन्दस्सततं बहुमन्तव्यः । (प्रकाशं) तपनसमप्रतापः खलु रघुनाथभूपः । ततः;.....

नारदः—अपश्यमग्रतो राज्ञस्ततः कमपि दारितम् ।
ब्राह्मणग्रहणव्यग्रं नक्रं कर्कशविग्रहम् ॥ ४३ ॥

पर्वतः—प्राणसंरक्षणमेव कुलधर्मः, तेषां च नृपतिसंततिजनुषां; सर्वेषामपि सर्वसहातुरासाहाम् ।

भर्तुस्तस्य धारित्र्या भक्त्या सक्तस्य तीर्थयात्रायाम् ।
भवतात्किमपि श्रेयो भव्यं सि(द्धंतु)ते झटिति ॥ ४४ ॥

नारदः—तथैव । तस्य महानुभावस्यातर्कितं महत्तरं श्रेयस्तत्रैव तीर्थे समुपस्थितम् । तेनैवाधिकं विस्मितोऽस्मि । तदिदं भवदाशीर्वचसा शीघ्रमेव फलतु ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पर्वतः—कीदृशं तत् ?

नारदः—अस्ति सिंहळद्वीपजुषो धरणीतलवलद्विषो विजयकेतुनाम्नः साकारेव कामकला चन्द्रकला नाम दुहिता। द्वीपे च तस्मिन्द्वीप(द्विप) वत्यामैरावत्यां प्रत्यहमाप्लुत्य, तया सुचिरमुपास्यमानः स भगवान्प्रसीदन् रमाविलासी; तस्यै घनमौक्तिकनासाभरणगर्भितं रत्नसमुद्गकं प्रयच्छन्नेवमभिहितवान्।

धीरोदात्तो नरपतिवरो दीप्रबाहुप्रतापो
जम्बूद्वीपे वसति खलु यो जम्भजेतेव भोगे।
तत्तादृक्षं प्रसभममुना तेन नीतं समक्षं
मन्यस्वेमं स्मरमिव परं मामकीनावतारम् ॥ ४५ ॥

अहं तावदेनं वृत्तान्तं भगवत्समीपगत एव जानामि। अद्य पुनस्तमेव मण्डलाग्रखण्डितनक्रपिचण्डनिर्गळितं रत्नसमुद्गकमादाय प्रमोदाधिको जयति; रघुनाथजनाधिनाथः ॥ (निष्क्रान्तौ) ॥

॥ शुद्धविष्कम्भः ॥



(ततः प्रविशति रत्नसमुद्गकहस्तो राजा; विदूषकश्च)

राजा—अहो! निजमहोभिरतिपृथुलजम्बीरफलपरिमाणं चिरत्नमिदं रत्नं निस्तुलं कौस्तुभमप्यतिशेते।

(विचिन्त्य)

मन्थानशैलमथितादुदधेरुदीतौ
चन्द्रादिवस्तुनिकरैः सह कौस्तुभौ द्वौ।
एकस्तयोर्विजयते हृदि कैटभारे
रन्यः करे मम विभात्यधुनेति जाने ॥ ४६ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(तै रत्नमुद्रकं हृदि निवेश्य) अयं मणिरसहाय एव पतगतया, मम वक्षःस्थले स्थातुमर्हति ।

विदूषकः–(भयमभिनयन्संभ्रान्त इव तिष्ठति)

राजा–लोकोत्तरं वस्तु विलोक्य लोके
न स्तौति शक्तोपि नराधमो यः ।
प्राज्ञा रसज्ञां प्रवदन्ति तस्य
दुर्मांसभेदं खलु दुर्विभेदम् ॥ ४७ ॥

विदूषकः–लक्खणाए मं एव्व लक्खीकदुअ, किं अदिमेत्तं दूसेसि ? ण दाव मे रसणा दुम्मंसभेदो । किन्तु जं रअणंति मंतेसि : तं एव्व सोदग्गमंडलग्गखंडिअदुट्ठग्गाहदुम्मंसभेदो । अहं जणणीए गब्भादो पुणोतिए एव्व जादोह्मि । जं अदिकक्कसदुट्ठणक्कवअणादो (ढा जाणिअ गाढापोहदिए विवआए ?) तुह मण्डलग्गेण णिक्कोसेण साणुक्कोसेण णिम्मुक्को ; एण्हिं खु समुद्देसु ण्हादोसि । पुणोवि सिबिरं पच्चागमिअ, सिंहासणमज्झं अलंकरोदु ! दुवारेवि णाणादेसणराधीसरा चिट्ठंति । ता अयं ण समयो मुद्धग्गाहमंसपिंडदंसणेण मं विहीसइदुं । पुढमं एव्व संभंतोह्मि ।

(छाया) [लक्षणया मामेव लक्ष्यीकृत्य, किमतिमात्रं दूषयसि ? न तावन्मे रसना दुर्मांसभेदः । किन्तु ; यद्रत्नमिति मन्त्रयसे, तदेव सोदग्रमण्डलाग्रखंडितदुष्टग्राहदुर्मांसभेदः । अहं जनन्या गर्भात्पवित्राया एव जातोऽस्मि । यदतिकर्कशदुष्टनक्रवदनात् (असंगत प्रामादिकः) तव मण्डलाग्रेण निष्कोशेन सानुक्रोशेन निर्मुक्तः ; (अत्र) इदानीं खलु समुद्रेषु स्नातोसि । पुनरपि शिबिरं प्रत्यागत्य, सिंहासनमध्यमलं

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

करोतु । द्वारेपि नानादेशनराधीश्वरास्तिष्ठन्ति । तस्मादयं न समयो मुग्धग्राहमांसपिंडदर्शनेन मां विभीषयितुम् । प्रथममेव संभ्रान्तोऽस्मि ।]

राजा—(विहस्य) प्रायेण हरिणा इव प्रकृतिभीरवो ब्राह्मणाः । मा भजस्व वयस्य सारंगभयतरंगितमन्तरंगम् । नायं मांसपिण्डः । किन्तु मणिरेव । (इति तदंके स्थापयति) ॥

विदूषकः—परिदोवि वण्णसमाउलकररुहं मूसलपादं समासादिदं । अव्वह्मण्णं अव्वह्मण्णं । अहिजाद ! जम्मणो खु एसो बह्मणो ; सोहं इमिणा उव्विपइणा एव्वं उव्वेइदोह्मि ।

(इति सोद्वेगं भूमौ पतति) ।

(छाया) [परितोपि वर्णसमाकुलकररुहं मुसलपादं समासादितं । अब्रह्मण्यमब्रह्मण्यं ; अभिजात ! जेमनः खल्वेष ब्राह्मणः ; सोहमनेनोर्वीपतिना 'एव' मुद्वेजितोऽस्मि]

राजा—(तदंगपरिकम्पपतनविघटितपुटे रत्नसम्पुटे धनमौक्तिकं दृष्ट्वा ! सविस्मयम्)

कान्त्या रत्नसमुद्गको विजयते कंसद्विषा यत्नतः
लब्धं कौस्तुभमप्यहो तदुदरे गोपायितं मौक्तिकम् ।
धर्तुं नाधिकरोति सोपि भगवांस्तस्मादिहास्मादृशां
धर्तुं सम्प्रति का कथा कथय भो कस्यार्हमेतत्सखे ॥ ४८ ॥

विदूषकः—(धैर्यमवलम्बमानः कथंचिदुत्थाय)

(स्वं) अंहो वयस्सस्स विस्रन्तरंगणा ; येण भमस्सोवरि भमो संवुत्तो । तहहि । पुढमं मांसपिंडे रअणभमो जादो ; तदो तदंतव्वट्ठिणि अंट्ठिणि मुत्ताहलभमो । प्रजुत्तं एव्व उत्तं महाराएण । भअवंतस्स मुरारिणो भत्तारिसाणं वि, तत्तारिसं मुत्ताहलं धत्तुं णाहिआरो ; किंतु ; अंट्ठिमालहारिणो महेसरस्स एव्व ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [अंहो! वयस्यस्य वीर्यतरंगना; येन भ्रमस्योपरि भ्रमः संवृत्तः। तथाहि। प्रथमं मांसपिण्डे रत्नभ्रमो जातः। ततस्तदन्तर्वर्तिनि, अस्थनि मुक्ताफलभ्रमः। प्रयुक्तमेवोक्तं महाराजेन। भगवतो मुरारेर्भवादृशानामपि तत्तादृशं मुक्ताफलं धर्तुं नाधिकारः; किंतु; अस्थिमालभारिणो महेश्वरस्यैव।]

राजा—मूढ; कथाप्येवं; अवस्थितं किमस्थि दृष्टं भवता?

विदूषकः—एण्हिं एव्व दीसइ। एव्वं च दक्खिणो भवं एव्व सक्खिणो।

(छाया) [इदानीमेव दृश्यते; एवं च दक्षिणो भवानेव साक्षी]

राजा—प्रलपत्वयं भयपरतन्त्रः। तावदेतदवलोकयामि। (इति मुक्ताफलमादाय)

आस्वाद्याधिकशोधितामृतरसानंभोधराः शारदाः
शुक्तौचेन्नखनिस्तुषीकृतसुधारोचिःकलानिर्मितौ।
वर्षेणाधिपयःपयोधि मिळितस्वातीदिना मौक्तिकं
यत्किञ्चिज्जनयन्ति तस्य कथमप्येतेन साम्यं वदे॥ ४९॥

आकुञ्चितकाञ्चनशलाकिकाञ्चितमिदं मुक्ताफलं नासाभरणमित्यव धारयामि। (विचिन्त्य)

नासामौक्तिकमापगाप्रणयिना नव्यं स्वकन्यामणे
रेतद्दत्तमपत्यवत्सलतया यत्नेन सम्पादितम्।
तस्याः प्राणसखेन किं भगवता तस्योचितः संपुटो
व्यातेने निजभूषणेन मणिनेत्यूहोयमुन्मीलति॥ ५०॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(सविमर्शं) अलमन्यथा संभाव्य। प्रायेण कस्याप्यन्तरीपान्तरजुषो भूपावतंसस्य कन्यामणेरन्यादृशेन तावदनेन नासाभरणेन भवितव्यम्। यतः—

सञ्चारिता नयनयोः श्रवसोश्च मार्गं
भूमौ कदापि विधिना न पुराऽधुना तु।
नासामणिं धृतवती तमिमं नतांगी
सा कापि मे परिचितेव तनोति रागम् ॥ ५१ ॥

(पुनर्विचिन्त्य) अत एव हेतोरद्याप्यनिर्वर्तितविवाहमहोत्सवा सा भवेत्। भवतु; कथं वा नासाभरणगर्भितं रत्नसमुद्गकमिमं जग्राह स ग्राहः? (सविमर्शं)

आनीतमेनमवनीपरिणीकुमारी
कूलं विभूषणकुलेन मणीसमुद्गम्।
विस्मृत्य वारिनिधिवारिविहारहर्षात्
सेयं युता परिजनेन चिरायति स्म ॥ ५२ ॥

पुनरंभोनिधानादुज्जृम्भमाणो महानवहारोयमामिषखंडधिषणया, स परितोषमह्नाय तमिममगृह्णात्। (आघ्राणं स्पर्शं चाभिनीय) नूनमनेन रत्नसमुद्गकेन महावहारकुक्षिकुहरे न चिरेणावस्थितम्। यतः;

मेदोमिश्रैः सुरभिरुदरे मेदुरो विप्रविष्टो-
ज्वालाज्वालैरपि विसृमरे जाठराग्नौ तदीये।
नासाभूषामणिरयमहो न त्यजत्येव तस्याः
श्वासामोदं रुचिरमधुना स्वस्य नित्यं च शैत्यम् ॥ ५३ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विदूषकः-(सौरभघ्राणमभिनीय) ही ही अणवहिदो; अदिव्ठपुव्वो कोवि दिव्वो सौरहविसेसो एसो विजिंभइ। ता णायं अव्ठि। किंतु मुत्तामणि एव्व।

(छाया) [ही ही अनवहितः; अदृष्टपूर्वः कोपि दिव्यः सौरभविशेषो विजृम्भत्येषः। तस्मान्नायमस्थि। किंतु मुक्तामणिरेव।]

राजा-(सोपहासं) अहो वयस्यस्येदमपूर्वमनुमानकौशलम्। यदयमव्याप्येनाप्येतेन सौरभविशेषेणाव्यापकमपि मुक्तामणित्वमनुमिमीते।

विदूषकः-तह ओं, अवहाणेवि समाणं अणवहाणव्तणं। जं पुढमं एव्व तुए अणुमाणदाए उवण्णव्थं एव्व। मएवि एव्वं पहिवादिदम्।

(छाया) [तथा ओं, अवधानेपि समानमनवधानत्वम्। यत्प्रथममेव त्वयाऽनुमानताया उपन्यस्तमेव; मयापि, एवं प्रतिपादितम्]

राजा-मूढ; मुक्तामणित्वे मया नेदमनुमानमभिहितम्; किन्तु महावहारकुक्षिकुहराचिरावस्थाने।

विदूषकः-जह तह वा होदु हेदू; सव्झमिखुणवव्झव्तकम्।

(छाया) [यथा तथा वा भवतु हेतुः .....?]

राजा-सारंग सखे संगतवचनोपन्यासेन कथमधुना मनागिह सुमनायसे?

विदूषकः-असंगदवअणेवि संगदवअणे; किं परिहसासि? ता तुण्हिव्को होमि। (इति तूष्णीं तिष्ठति)

(छाया) [असंगतवचनोपि संगतवचनः; किं परिहससि? तस्मात्तूष्णीको भवामि]।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–इदमेव खलु मे पुनरभ्यर्थनीयम् ।
(स्वं)

तस्या भाषणमीक्षणं च सुलभं तन्वीत तन्वीमणे
धाता चेत्तव तावतैव भविता चेतः परा निर्वृतिः ।

(सविमर्शं) सर्वथा दुर्लभमेतत् ।
द्वीपे क्वापि पयोधिना परिवृते दीव्यत्यहो नायिका

(धैर्यमवलम्बमानः पुनर्विचिन्त्य)
नासारत्नमिहेव तत्परिसरे नाकर्षयेत्किं स माम् ॥ ५४ ॥

(भूयोपि विचार्य) किमनेन केवलमनोरथविनोदनेन ?
कर्मानुभवं विधिना कश्चिद्घटितं निदर्शयन्नर्थम् ।
अपरमितोप्यतिदुर्लभमुत्कण्ठे हा भ्रमोदयः कोयम् ॥ ५५ ॥

तथापि विधिमेतावदेव तावदभ्यर्थये ;

भाग्यं हन्त पचेळिमं मम न चेत्कान्तामणेरीक्षणे
स्वप्ने वाथ विधे विधेहि तदिदं सोहं कृती तावता ।
कर्ता त्वं खलु याच्यसे त्रिजगतां कर्तव्यमीषत्करं
याञ्चेदंप्रथमा ममाप्यगणनादेनां वृथा मा कृथाः ॥ ५६ ॥

विदूषकः–(स्वं) हव्धि हव्धि ! दुव्वारचिंताभरणिव्वाविअसंतदसेवा-
हेवाअमाणसपरिअणवीणाणुहवव्स एण्हिं इमव्स, मामके
वयव्सव्तणं ; सिमिणपरवसजणचरणव्पणामसरणिं अणुसरइ ।
अव्ज मए इदो किं करणिव्जम् ? ।

(छाया) [हा धिक् हा धिक् ! दुर्वारचिन्ताभरनिर्वापितसन्ततसेवा-
हेवायमाणसपरिजनवीणानुभवस्येदानीमस्य ; मामके वयस्यत्वं ;

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्वप्नपरवशजनचरणप्रणामसरणिमनुसरति । अद्य मयेतः किं करणीयम् ?]

राजा–(श्रुतिमभिनीय साश्चर्यानन्दं) कापि पुनरियमकाण्डे कथमवतरति श्रवणसरणिमशरीरिणी वाणी !

ऐरावत्यां नद्यां प्रवहन्त्यां सिंहळद्वीपे ।

स्नात्वा चिन्तितमन्तः सत्वरमेतल्लभस्वेति ॥ ५७ ॥

विदूषकः–एव्वमेव (एमेअ) मेत्रि सवणसरणिं अवतरइ । (खं) अणवरदसअलभूवलयगद (तित्थ) सेवणपरायणव्स रव्णो इमव्स, वयव्सहावेण हा परिव्सन्तो म्हि । तहहि; पुढमं मरुव्दहाए पहवव्थलादो सव्झसेलादो आरहिअ; पुरिमलोणाव आरमणावहि पए पए 'इदं पुव्णं छेव्तं, एदं विपुव्णं छेव्तं 'ति अणुदिणे तेण कारिदेहिं व्हाणोववासेहिं; अदिदूरसरणिलंघण जंघालदुव्ठवाहअणिवहोदूढराअमणिसिविआणुहावणेहिं वि; अव्ठिचव्ममेव्तावसिव्ठाइ मह एव्वं गव्ताइ संवुव्ताइ । ता इदो पदादो पदं विचरेदुं ण सव्कुणोमि । एदारिसव्स मे इमादो दीवादो, वारिणिहिमव्झगददीवंतरगमणं; अरुंतुदपास-वेदणासिव्ठिलिदसिरासंधिबन्धव्स उत्तमंगव्सवि असंगदो गंडपाहाणपादो । का गई ? कहं दाव एण्हि इमादो पआणादो अव्ता(णं)णिम्मोअइव्सं ? होदु एव्वं दाव व्पवदे; तह एव्व झत्ति करिअदु । (चिन्तामभिनयन्) हव्धि हव्धि ! सहे एव्ताहे मह णं बह्मणव्तणं सिलाहणिव्जं वि सव्चं अवरइव्झइ ।

(छाया) [एवमेव; ममापि श्रवणसरणिमवतरति । (स्वगतं) अनवरतसकलभूवलयगततीर्थसेवनपरायणस्य राज्ञोऽस्य, वयस्यभावेन हा परिश्रान्तोऽस्मि । तथाहि; प्रथमं मरुद्वहायाः प्रभवस्थलात्सह्यशैलादारभ्य, पूर्वलवणापगारमणावधि; पदे

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पदे "इदं पुण्यं क्षेत्रं, एतद्विपुण्यं क्षेत्र"मिति अनुदिनं तेन कारितैः स्नानोपवासैः; अतिदूरसरणिलंघनजंघालदुष्टवाहकनिवहोद्दूढराजमणिशिबिकानुधावनैरपि; अस्थिचर्ममात्रावशिष्टानि ममैवं गात्राणि संवृत्तानि। तस्मादितः पदात्पदं विचरितुं न शक्नोमि। एतादृशस्य मेऽस्माद्वीपाद्वारिनिधिमध्यगतद्वीपान्तरगमनम्। अरुन्तुदप्रार्श्ववेदनाशिथिलितसिरासन्धिबन्धस्योत्तमांगस्याप्यसंगतो गण्डपाषाणपादः। का गतिः? कथं तावदिदानीमस्मात्प्रयाणादात्मानं निर्मोक्षयिष्ये?। भवत्वेवं तावत् प्रवदे; तथैव झटिति करोतु। (चिन्तामभिनयन्) हा धिक् हा धिक्! सखे! एतावत्येव ममैनद्ब्राह्मणत्वं श्लाघनीयमपि सत्यं; अवरयिष्यसि]।

राजा–सखे! किमिदमकाण्ड एव त्वं ब्राह्मणत्वं बालवदुपालभसे! न तावत्कमपि तवैतावद्दुःखिताहेतुमवलोकयामि। अथवा पुनरिदानीमहं दानीयाय भवते हृदयंगमहैयंगवीनपूरपक्वानि विविधगोधूमापूपवटकमोदकप्रभृतीनि भक्ष्याणि प्रदापयितुं किं विस्मृतवानस्मि?

विदूषकः–अणुकावेरीतीरं पएपए अणुदिणपुण्णच्छेत्तोववाससोसणाट्ठिचम्मावसेसिदसरीरस्स मे, एवं तुए विदिण्णेण विविह भक्खवग्गेण उपबंहिदो देहो। किंतु; एदस्स विप्पस्स तुए विप्पयोओ भविस्सदित्ति अत्तणो बंहणत्तणं उवालहे।

(छाया) [अनुकावेरीतीरं पदे पदेऽनुदिनपुण्यक्षेत्रोपवासशोषणास्थिचर्मावशेषितशरीरस्य मे, एवं त्वया वितीर्णेन विविधभक्ष्यवर्गेणोपबृंहितो देहः। किंतु; एतस्य विप्रस्य त्वया विप्रयोगो भविष्यतीति; आत्मनो ब्राह्मणत्वमुपालभे।]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–कथमिव ?

विदूषकः–बंहणाणं समुव्दजाणं खु सव्वव्तणेण णिसिद्धं। ता वयव्स! णअरमहं गमिव्सं। गमिउण चदुर(ह)देवीए जादरूवाए (वंसजोव्गं)सरअणसमुव्गयं तव्तारिसं णासाहरण मुव्तामणिं उवहरिव्सं।

(छाया) [ब्राह्मणानां समुद्रयानं खलु सर्वथा निषिद्धम्। तस्मात् वयस्य! नगरमहं गमिष्यामि। गत्वा चतुरदेव्यै जातरूपायै वंशयोग्यं सरत्नसमुद्गकं तत्तादृशं नासाभरणमुक्तामणिमुपहरिष्यामि]।

राजा–(स्वं) कथमियमापतिता पुनरुभयतःपाशा रज्जुः! तथाहि;

अभ्येति चेन्नगरमेनमदां प्रियायै
दद्यान्मया सपदि तत्र समागतश्चेत्।
ईक्षेत तां सुदृशमित्यधुना विकल्पो-
द्वेधाऽधिचेतसमुदञ्चति दुर्निवारः ॥ ५८ ॥

(विमृश्य) नगरं प्रति प्रेषणतो वरमस्य द्वीपान्तराकर्षणम्। तत्र; कथञ्चिदस्य देवीपक्षपातिनो दृष्टिपातादुपायेन तां परिहरिष्यामि। तत्कथमिदानीमस्य नगरप्रयाणनिवारणोपायः? भवत्वेवं तावत् (प्रकाशं) तथैव; दिव्या मणिरियं मम देव्या एव भवितुमर्हति। (इति मणिं प्रदाय) वयस्य! गच्छ गच्छ।

(विदूषकः गन्तुमिच्छति)

राजा–(पार्श्ववर्तिनं सेनापतिं प्रति) द्विषंतप! सेनापते! तत्र सिंहळद्वीपवासिनो देवस्य; नानाविधसूपापूपाज्यशर्कराचित्रान्नपरमान्नमुख्यान्यतिहृद्यानि नैवेद्यानि, पूर्वमेव गतवता च भवता

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सम्पाद्यानि। इदं च बलमखिलं सकलभूपालकुलसमाकुलं; अत्रैव स्कन्धावारे स्थापयन्नेवाहं तत्र परिमितपरिवारस्सवेगमागमिष्यामि। तदर्णवतारणकुशलं कर्णधारकुलं सत्वरमतिदूरगत्वरामभिनवां तरीमप्यन्तरीपान्तरद्वैव संविधेहि।

द्विषंतपः–यदाज्ञापयति देवः (इति निष्क्रान्तः)।

विदूषकः–(स्वगतं) आसादिदं एदं णासाहरणमुव्ताहलं। ता एणं चउरगदाए देवीए अव्चायासेण उपदीकदुअ दीसं; जं एव्तिअं एव्व संपदं संपादणिव्जं। हि हि इमव्स महीवशारिणो वयव्सव्स सआसे अणायासेण एव्थ एव्व तं सव्वं अवगतिअव्स मे दिव्ठिआ मिव्ठं उवव्ठिदं। जह णिहाणलाहाय अंजणमूलिअं जणव्स खणव्तव्स तव्थ एव्व थलव्मि किदसव्णिहाणं णिहाणं। ता सव्वव्तणा इमिणा सपरिवारेण णरेसरेण गलहंडेआए; इदो अ सव्कारेण णिव्कासिदोवि णाहं णअरजव्ता। कहं सि(सा)मिणेवि कहइव्सं। (प्रकाशं) भवंतं एव्व अहं दाणिं णरेसरं अणुसरेमि।

(छाया) [आसादितमेतन्नासाभरणमुक्ताफलं; तदेतच्चतुरगतायै देव्यायनायासेनोपदीकृत्य दास्ये; यदेतावदेव्येव सम्पत्सम्पादनीया। हि हि; अस्य महीपशालिनो वयस्यस्य सकासे, अनायासेनात्रैव तत्सर्वमवगतिकस्य मे दिष्ट्या मिष्टमुपस्थितम्। यथा निधानलाभायाञ्जनमूलिकां जनस्य खनतस्तत्रैव स्थले कृतसन्निधानं निधानम्। तत्सर्वथाऽनेन सपरिवारेण नरेश्वरेण गळगंडायितम्। इतश्च सत्कारण निष्कासितोपि नाहं नगरयाता। कथं स्वामिनेपि कथयिष्ये? (प्रकाशं) भवन्तमवाहामदानीं नरेश्वरमनुसरामि।]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–(सोपहासं) सर्वात्मना समुद्रयानं ब्राह्मणानां निषिद्धमिति कथमुदीरितमधुनैवावधीरितं भवता ?

विदूषकः–परमत्थदो मए तह णहि कहिदं; किन्तु मयि पिअवयस्सत्तणं तुह कीरिसं रिवुमरिढेहुएव्व (रिवुमरिढेयव्सेव्ति । असंमदोवि अहं इदो दीवंतरेवि भवंतं एव्व अणुसरेमि । मज्झण्णमेव्तसमुव्दजाण खु बंहणाणं ण दोसावहं । इदं च णासाहरणं कोसघरे करेमि । (इति तथा करोति)

(छाया) [परमार्थता मया तथा न हि कथितम्; किन्तु, मयि प्रियवयस्यत्वं तव कीदृशं रिपुमर्षणीयस्येति । असम्मतोपि, अहमितो द्वीपान्तरेपि भवन्तमेवानुसरामि । मध्याह्नमात्रसमुद्रयानं खलु ब्राह्मणानां न दोषावहम् । इदं च नासाभरणं कोशगृहे करोमि]

(तथा करोति)

(नेपथ्ये)

णावा मंखु णवा खु वारिणिहिणो एदव्स संतारिणी
सव्णव्धा पअरंति संतदमिमे वेळाणुकूलाणिला ।
एसो किञ्च नियामओ णियमिदो एदारिसिं ता कदा
आरोहेण किदव्थइव्सदि अयं भूमंडलाहंडलो ॥ ५९ ॥

(छाया) [नावा मंक्षु नवा खलु वारिनिधेरेतस्य सन्तारिणी
सन्नद्धाः प्रसरन्ति सन्ततमिमे वेलानुकूलानिलाः ।
एष किञ्च नियामको नियमित एतादृशीं तत्कदा
आरोहेण कृतार्थयिष्यत्ययं भूमण्डलाखंडलः ॥]

राजा–(श्रुत्वा सवंभ्रमं) ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सारंग तत्र सरितां सुहृदस्सकाशात्
कोलाहलः श्रवसि कोपि ममावतीर्णः ।
प्रायेण नाविकपरिभ्रमसंभवोयं
तत्साधयाव तरणेरधिरोहणाय ॥ ६० ॥

(इति विदूषकहस्तमवलम्ब्य, नाट्येन परिक्रामन्पुरस्तादवलोक्य)

अर्णवतीराभ्यर्णे निहिताऽस्मिन्कर्णधारनिवहेन ।
तरिरियमधुना परिमितपरिवारं मां त्वया सह वहेत ॥ ६१ ॥

(इति तथैव नावारोहणं नाटयति ; विदूषकं प्रति साश्चर्यम्)

विस्तारिते सति पदे गुणवृक्षभाजी
कोप्यागतोऽनुगुणवायुकुमारकोयम् ।
अंभोनिधेः सपदि पात्रमये विचित्रं
नावं सखे स्वयमिमां नयते सखेलम् ॥ ६२ ॥

नियाम्रकः–

दुव्वंकूरा विअ महिरुहा अंग दे दूरदूरे
दीसंते जे तुह अहिमदे दिव्वदेसे वसंता ।
एदे भूमीतलवलरिवो एहमाणा खणादो
णावावेआदिशय महुणाणव्खरं वाहरंतो ॥ ६३ ॥

(छाया) दुर्वांकूरा इव महिरुहा अंग ते दूरदूरे
दृश्यन्ते ये तवाभिमते दिव्यदेशे वसन्तः ।
एते भूमीतलवलरिपो! एधमानाः क्षणात्
नावावेगात्पश्य मधुनाऽनक्षरं व्याहरन्तः ॥]

राजा–अहो! वेगवैचित्र्यम् । तथाहि—

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आगच्छतीव जलधेर्द्रुतमस्य पारं
अक्ष्णोरवारमचिरादपसर्पतीव ।
अर्कोऽपि दक्षिणदिशामनुधावतीव
धावन्त्यसावपि तरीरति निश्चलेव ॥ ६४ ॥

विदूषकः—(हस्तद्वयेन मस्तकमवलम्ब्याधोमुखीभूय सनिर्वेदं)
हद्धि हद्धि; इमस्स दासीए उत्तस्स समुद्दस्स महन्तम्मि जलब्भमे परिब्भमइ तरीयम् । एत्थ च अतिमेत्तघुण्णमाणं मह उत्तमंगं पमाणं । सहे ! ए ताहेवि किंति उवेक्खसे ? ।

(छाया) [हा धिक् हा धिक्! अस्य दास्याः पुत्रस्य समुद्रस्य महति जलभ्रमे परिभ्रमति तरीयम् । अत्र चातिमात्र-घूर्णमानं ममोत्तमांगं प्रमाणम् । सखे! एतावत्यपि किमित्युपेक्षसे ?]

राजा—(सोपहासं) एवं । नावारोहणानभ्यास एवाधुना तुभ्यम-पराध्यति। वैधेय! मया किमत्र प्रतिविधेयम् ? (पुरस्तादवलोक्य) सखे! मा भैषीः । यदभिमतमिदमेव पारावारावारं विलासादस्माभिरासादितम्। नियामक! तदिमां नियमयाशु समया तीरम् ।

नियामकः—जं देवो आणवेदि। [यद्देव आज्ञापयति] (इति सपरिवारस्तथा करोति)।

राजा—(विदूषकहस्तमवलम्ब्य सहपरिवारेण नावावरोहणं नाटयति) (परितो विलोक्य साश्चर्यं) इह केचन सखे! जलधितीरान्तिके जयन्ति; स्वच्छन्द-कन्दलितमुकुन्दकुन्दमुचुकुन्दमुचुलिन्दपिचुमन्दनागपुन्नागनाग केसरकेसरहिन्ताळताळतमालकृतमालसालरसालकपित्थाश्वत्थ-बिल्वचिरिबिल्वमधुद्रुमाक्षरुद्राक्षभद्राक्षादिमानेकानोकहनिव-हप्रच्छायस्वेच्छाविहरणनिर्वृतकेवलविविधमृगालंकृता वनान्ताः।

एते हि—

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वेतण्डव्रजगण्डपिण्डकषणव्यत्यस्तगण्डोपल-
त्रस्तग्रस्तनिजस्तनंधयचयव्याघ्राकुलव्याकुलाः ।
स्वैरं सर्पदनल्पसर्पविसरान्निश्वासवैश्वानर-
प्रौढोष्मासहकासरप्रणिभवत्कासारवासादराः ॥ ६५ ॥

किञ्च ;

तरक्षुभिरतिक्षुधाक्षुभितमानसैरावृताः
क्वचित्क्वचन हास्तिकैरपि मृणालिनीनास्तिकैः ।
कुहापि च महागुहान्तरविहारिवाहद्विष-
द्विषाणकषणक्षतक्षतजसक्तसत्वैरपि ॥ ६६ ॥

अपि च ;

त्रासेन द्युतिनिकरात्सरोजबन्धो-
रेतेषु प्रतिदिनमेयुषो निवासम् ।
चापल्यादये तमसस्तनन्धयानां
भल्लूका विहृतिजुषां भजन्ति रीतिम् ॥ ६७ ॥

सम्प्रति हि ;

अभीक्ष्णं पश्यन्तो वलितमुखमसाननुसृता-
नपांगैरुन्नम्रश्रवणमधिकत्रासतरलैः ।
स्थले पर्णास्तीर्णे स्वखुरहतिजातादपि रवात्
कुरंगाः साशंकाः कुहचिदिह धावन्ति मिलिताः ॥ ६८ ॥

किञ्च ;

दूरं वक्त्रायतमुपचितं दुर्वहं दन्तभारं
बोढा दानाकुलमलिकुलं वारयन्कर्णताळैः ।
धैर्यादस्मान्सरसमपि ता धावमानाः करेणूः
दर्शं दर्शं चलति शनकैर्दारुणो यूथनाथः ॥ ६९ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अपि च;

क्रूरैर्व्याघ्रवृकादिभिस्सरभसं कुत्रापि सौम्याः समं
सत्वास्ते शशरोहितप्रभृतयः सन्त्यज्य वैरं मिथः ।
संघीभूय परस्परप्रवनतस्साशंकमस्मान्मुहुः
पश्यन्तो गतदिग्विभागमतयः प्रान्त्येषु धावन्त्यमी ॥ ७० ॥

(अनुचरान्सर्वानपि विलोक्य) एतानि पुनरग्रहतानि कंटकबहुळानि स्थलानि; तदिह सर्वेपि सावधानमेव सरणिमनुसरत । (सर्वेपि तथैव पुरस्सरजन-चरणविन्यासप्रणिहितपदाः कतिचित्पदानि परिक्रामन्ति) ।

विदूषकः–(समन्तादवलोक्य, साश्चर्यानन्दम्) ।

सहे! एव्वादिसो अपुव्वव्स अदिहिणो भवंतव्स रव्णो समुइअं, णाणाविहपरिणदफलेहिं पदे जहेच्छं आदिव्थं कुणंति कान्तारघेरन्ता। ता भव्खामो वयं सोव्खाय इमाणि फलाइ पएलिमाणि ।

(छाया) [सखे! एतादृशोऽपूर्वस्यातिथेर्भवतो राज्ञः समुचितं, नानाविधपरिणतफलैः पदे यथेच्छमातिथ्यं कुर्वन्ति; कान्तारगृहस्थाः । तद्भक्षयामो वयं सौख्यायेमानि फलानि पचेळिमानि] ।

राजा–आद्यून! सन्ततं कथं तव सारंग! प्रत्यवसानचिन्तासन्दानितमन्तःकरणम्? । सोयं नभोमध्यभागमासीदति भगवान् सरसीरुहिणीपरिणीः । तदारादेव त्वामैरावत्यामाप्लुत्याशु तत्तीरवासिनो रमाविलासिनो देवस्य नैवेद्यशिष्टानि चिरमभीष्टानि यावदहं प्रत्यवसाययामि ।

विदूषकः–(सावज्ञं) सुणीयदि कोवि आहाणओ "सिव्धमव्णं परिव्चजिअं भिव्खं अटइ दुव्मदिव्ति" (सर्वे हसंति) ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [श्रूयते कोप्याभाणकः "सिद्धमन्नं परित्यज्य भिक्षामटति दुर्मतिः" इति]

राजा–यथाभिमतं विहर (इति हस्तं विसृजति)।

विदूषकः–(पार्श्वतो विलोक्य) ही ही मइ सच्चं एदं, खाइरमूले कइत्थ-हललाहोत्ति ।

(छाया) [ही ही मयि सत्यमेतत्; खादिरमूले कपित्थफललाभ इति]

राजा–(स्वं) प्रायेण गजभुक्तनिर्मुक्तमिदं कपित्थम् । अयमाद्यूनः किं करोतीति प्रतिपालयामि (इति तथा करोति)।

विदूषकः–(सभ्रममुपसृत्य तदादाय दशनेन दशति (दष्टमवलोक्य) हद्धि हद्धि! कहं आआसमेत्तावसेसिदो; दरं एदं ।

(छाया) [हा धिक् हा धिक्! कथमायासमात्रावशेषितः? दरमेतत्]

राजा–(विहस्य) सखे! साधु भवता सिद्धमन्नं भक्षितम् ।
(सर्वेप्युच्चैर्हसन्ति)

विदूषकः–(लज्जावनम्रितमुखो राजानमुपसृत्य) सहे; तुह आणावअणाणा-कण्णणादो एदारिसं फलं अणुहूदं; इह दिव्वे दिट्ठिमेत्ता-णुरंजआणि सव्वाणि मायाफलाणि; ता इदोप्पहुदि तुह वअणं एव्व अणुसरेमि ।

(छाया) [सखे! तवाज्ञावचनानाकर्णनादेतादृशं फलमनुभूतं; इह दिव्ये दृष्टिमात्रानुरञ्जनानि सर्वाणि मायाफलानि; तदितः-प्रभृति, तव वचनमेवानुसरामि ।]

राजा–(सोपहासं) (विदूषकहस्तमवलम्ब्य कतिचित्पदानि गत्वाऽन्यतोऽवलोक्य) (सहस्तनिर्देशं) इतो नातिदूर एव;

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वन्यैः समं परिचयेन वसन्ति यस्मात्
ग्राम्याः कुहापि विहगैः कलविंकमुख्याः ।
प्रायेण तानि पुनरग्रहतेतराणि
तन्वन्ति हन्त विपिनानि ततो दिदृक्षाम् ॥ ७१ ॥

विदूषकः—तह महवि दिदिव्खा समुव्जिभइ । एदु एदु भवं ।

(छाया) [तथा ममापि दिदृक्षा समुज्जृम्भते । एतु एतु भवान्]

राजा—(नाटयेन सपरिवारः परिक्रामन्समन्तादवलोक्य)

एतेषु ;

गर्तास्ते वन्यहस्तिग्रहणपरिजनैः क्वाप्यगाधखाताः
सारंगाणां ग्रहाय क्वचन मृगयुविस्तारिता वागुरास्ताः ।
सत्वाश्चोपद्रुतास्ते मनुजचरणविन्यासत्रस्यामवन्यां
त्रासात्कुत्रापि वासं न विदधति परं तामुदीक्ष्य द्रवन्ति ॥७२॥

(अनुसृतान्सर्वानपि विलोक्य)

आलोक्यते किमपि गोपुरमग्रदेशे
प्रायो भवेत्तदिदमेव परस्य पुंसः ।
द्वारग्रहाय खलु गच्छत तत्र यूय
मैरावतीमहमनेन गवेषयामि ॥ ७३ ॥

अनुचराः—यदाज्ञापयति देवः । (इति निष्क्रान्ता)

राजा—(विदूषकेण सह परिक्रामन्समन्तादवलोक्य)

अत्र च विविधविचित्रतरवन्यद्रुमसहजन्यपरस्परसंबद्धलतावितानतिरस्करिणीसहस्रतिरस्कृतदिशाविभागे विपिनाभोगे ; मरिदैरावती कुत्र वा प्रवहतीति पुनरावामतित्वरयैव गवेषयावः । (इति चिन्तामभिनीय परिश्रान्तविव च्छायामाश्रयतः)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–(स्पर्शमभिनीय सानन्दम्)।

उचितविचलद्वीचीतीरोपमर्दनसंभवः
नलिनतलिने हंसस्त्रीपक्षपातसमेधितः ।
अयमिह लतामालम्ब्यालम्ब्य हन्त पदे पदे
सविधमयते मन्दं मन्दं समीरकिशोरकः ॥ ७४ ॥

तदिह नातिदूरत एव तया प्रवहन्त्या भावितव्यम् ।
एनं शीतलपवमानमावामभिमुखमेवानुसरावः ।

(उभावपि तथा कुरुतः)

राजा–(पुरतोऽवलोक्यश्रुतिमभिनीय साश्चर्यानन्दम्)।

पार्श्वद्वन्द्वप्ररूढक्षितिरुहनिवहप्रौढशाखाशिखान्त-
र्वेल्लद्वल्लीमतल्लीजनितजवनिकामध्यमध्यासितेयम् ।
शंसन्ती हंसकौघैर्निजवसतिमहो मांसलैः किं सघोषै
रारादैरावती सा विलसति विजने सिन्धुनेतुःपुरंध्री ॥ ७५ ॥

(उपसृत्यावलोक्य च साश्चर्यं)

पार्श्वद्वन्द्वक्षितिरुहचरत्प्रौढशाखामृगौघ-
स्वैरक्रीडारभसगलितैः सूनगुच्छान्तराळात् ।
धूलीजालैः सममविरतं धूसरैरासवेयैः
प्रायः सेयं प्रवहति नदी न द्रुतं नापि मन्दम् ॥ ७६ ॥

तावदेनामावामनुसरावः । (उभावपि तथा कुरुतः)

राजा–(पार्श्वतो विलोक्य सविस्मयं) सखे! मम नयनखेदमपनुदति कथम-
यमविरतखेलनपरमानन्दपरवशमानसकोकिलदम्पतिकुलजृंभित-
कलकलसम्पदमुपश्लाघमानैरिव जीवनोत्तरशीतलपवमानेरित-
शाखाशिखाशिरोभिरतिशिशिरोपचितप्रच्छायस्वेच्छाविहरणरसि

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

करथांगचक्रांगप्रमुखविहंगमसंगैरिह लवंगलतालिंगनसुखित-
सरसकेसरनागपुन्नागमाकन्दचन्दनचम्पकमुखानेकानोकहनिव-
हैरावृतनिजतटाभोगस्तटागः ।

सकुतुकमुपकण्ठं सागरक्षीरकण्ठं
सततमुपनयन्ती सानुरागं तटागम् ।
विपुललहरिदम्भादत्र विस्तार्य हस्ता-
नयि सरिदियमारादंगमालिंगतीव ॥ ७७ ॥

(स्पर्शमभिनीय साश्चर्यं)

कण्डूलवन्यकरिमण्डलगण्डपिण्ड-
संघर्षकन्दलितचन्दनगन्धसान्द्राः ।
श्रान्ति हरन्ति सरसीजलशीकरार्द्राः
सम्प्रत्यमी मम समीपचराः समीराः ॥ ७८ ॥

राजा–(स्वगतं) सेयमैरावती च नयनगोचरमासादितवती ।
इयं च जनसञ्चरणरहिता वर्तते ; कुतस्तादृशो नलिनीदृशो
दर्शनम् ?

शश्वत्तद्दैववचो विश्वस्याकर्षदब्धिमुत्तार्य ।
हृदयं मामिह गहने न दयन्निन्दाम्यहं मदीयमपि ॥ ७९ ॥

(विमृश्य) सोयं मनसो नापराधः ; किन्तु तस्य स्वभाव एव । तथाहि–

तामेणीदृशमेष पञ्चविशिखः स्वप्नेप्यदृष्टामिमा-
मातन्वन्नतिसंस्तुतामिव मनस्यासीदनुग्राहकः ।
सोयं मां हतको विधिस्तु जलधिं सोपद्रवं वञ्चकः
सन्तार्यात्र वने चिराय विजने सञ्चारयत्याः कथम् ॥ ८० ॥

(पुनर्विचिन्त्य)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

धाता चेत्स्वयमेव पञ्चविशिखः तस्यां ममैतादृशं
तन्वंग्यामनुरागमप्रतिहतं तन्वन्नहो सांप्रतम् ।
इन्दुर्वा मधुरेव वा विरचयन्नेतस्य साहाय्यकं
वेदाभ्यासजडः प्रतारयति मां वेधाः कथं प्राकृतः ॥ ८१ ॥

(तटागतटादैरावतीमवतीर्णस्य सुलक्षितां महावहारस्य पदपंक्तिं दृष्ट्वा साश्चर्यानन्दम्) सर्वथा मया दारितस्यैव महतो ग्राहस्य तानि पुनरेतानि पदांकितानि । इतस्तटागतटभूमेर्नासामरणरत्नसमुद्गकं नातिचिरमेव मांसपिंडशंकया जग्राह स ग्राहः ।

आकर्ण्य वाक्यमशरीरि निरीक्ष्यचेदं
सान्द्रं वनं हृदय! संशयडोलिकायाम् ।
भ्राम्यद्भुतं त्वमवदो ह भजस्व धैर्य-
मासीद्यतो विधिवशेन विशेषदृष्टिः ॥ ८२ ॥

पुनरप्यशरीरिवचनमेवानुसरिष्यामि । अमुं तावदितस्तटागान्ताद्देवी-पक्षपातिनं केनोपायेनापरत्रापसारयामि ? (विमृश्य) भवत्वेवं तावत् (प्रकाशं) सखे ! मा भैषीः ।

विदूषकः—(सोत्त्रासं) वयस्स ! किमिदमकण्डे अहयव्वदाणसंसणं ?

(छाया) [वयस्य ! किमिदमकाण्डेऽभयप्रदानशंसनम् ?]

राजा—(महावहारपदांकितं तत्तीरसैकतं हस्ततो निर्दिशन्) सखे ! पश्य पश्य ।

विदूषकः—(दृष्ट्वा साश्चर्यं) अपुव्वेयं पअपंति तिरव्वीणं दीसइ ।

(छाया) [अपूर्वेयं पदपंक्तिस्तिरश्चीना दृश्यते]

राजा—प्रायेण सेयं महावहारस्य पदपंक्तिरिव दृश्यते । तदत्रापि तादृशं महावहारं खण्डयन्नयमेव मण्डलाग्रो मे भवन्तमक्षतं रक्षिष्यति । तदिह सहैवावगाहस्व ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विदूषकः-(सभयकम्पं; अपसृत्य) तुह एदं मण्डलग्गं दिढं रक्खदित्ति सअं एव्व पेक्खंतो, एदस्सिं कइतववअणे विअ महावहारणिहाणे तडाअंमि सहे! कहं अवगाहेमि? कोणु खु सिद्धमूलिआ लब्धेति दव्वीअरेण दव्ठो होदि? ता अण्णदो गमिउण एदाए एरावदीए पवाहे णिब्भअं अब्भुव्वेमि। (इति निष्क्रान्तः)

(छाया) [तवैतन्मण्डलाग्रं दृढं रक्षतीति, स्वयमेव प्रेक्षमाण एतस्मिन्कैतववचन इव महावहारनिधाने तटाके सखे! कथमवगाहे? को नु खलु सिद्धमूलिका लब्धेति दर्वीकरेण दष्टो भवति? तस्मादन्यतो गत्वा, एतस्या ऐरावत्याः प्रवाहे निर्भयमभ्युक्षामि।]

राजा-(समन्तादवलोक्य साश्चर्यानन्दं) प्रायेण सेयं विलासेन सह वयस्याजनैः सरस्याः पुनरस्यास्समीपभूमिमनतिचिरं निजचरणविन्यसनादेव धन्यतमतामानीतवती सुदती। यतः—

अचिरमपचितानामम्बुजानां रजांसि
प्रचुरमधिफलाशं पद्मिनीनां लसन्ति।
सलिलविहृतिवेगात्सारितं पार्श्वदेशात्
सरसि मिळति मन्दं शैवलानां च वृन्दम्॥ ८३॥

तावदिदं तटागान्तरमवगाहे। (तथा करोति; सौरभाघ्राणमभिनीय सानुस्मरणं) असौ नासाभरणसौरभविशेषे सौहार्दमात्मनो वहन्ती, कथं तीरदेशमितः समन्तादमुं तावदावरीवरीति परिमळलहरी!

अवैमि हिमवालुकामहमवैमि कस्तूरिका-
मवैमि नवकुङ्कुमद्रवमवैमि पिष्टातकम्।
अवैमि च पृथक्पृथक्पुनरवैमि तान्मिश्रिता-
नहो जगति सौरभं त्वननुभूतमेवंविधम्॥ ८४॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(विमृश्य) तदिह सुस्नातामेतां नतांगीमणिं जात्या पद्मिनीति जानीमः ।

कासारेऽस्मिन्विहृतविहृतिः कामिनी पद्मिनीयं
जात्या नो चेदिदमुदझरी तच्छरीरानुषंगात् ।
मन्दारद्रुप्रसवविसरन्माकरन्दप्रवाहैः
मिश्रेवाम्भुं कथमिव समुन्मीलयेद्दिव्यगन्धम् ॥ ८५ ॥

इतः कासारसकाशादेषा भूषा भुवो योषामणी रमणीयभावमापादयति कतमं वा समीपावस्थितं प्रदेशम् ? अये ! केनोपायेन पुनरासादयेयमितस्तादृशं प्रदेशम् ? (विचिन्त्य) तदिह तस्याः कृतविहरणायाश्चरणांकनसरणिमेवानुसराणि । (तीरमधिरुह्य) (चरणांकनगवेषणं नाटयति) अन्यतोऽवलोक्य साश्चर्यानन्दम्) स्त्रीणामिह तिसृणामलक्तकारुणानि चरणार्पणानि दृश्यन्ते ;

उभयोरिह समसुत्पललोचनयोश्चलितयोर्विलोक्यन्ते ।
चरणार्पणानि पुरतः सैकतमृदुले परिस्फुटं मार्गे ॥ ८६ ॥

पश्चादपि कस्याश्चिदनुसृतायाः पुनरिमानि पदांकनानि । (विभाव्य) तदेतेषु ; पश्चादनुसृतायाः पदाङ्कनानि, करङ्कवाहिकाया एव ।

नखदळितनागवल्लीदळपुटपर्यन्तशकलकीर्णानि ।
पादांकनानि यस्मात्प्रायेणैतानि दृश्यन्ते ॥ ८७ ॥

(पुरस्तादवलोक्य सविस्मयानन्दम्)

अविरळसरळांगुलीदळानि
प्रथितयवांकुशपंकजांकितानि ।
अतिमृदुलतयाऽर्पितानि गाढं
पथि विलसन्ति पदाङ्कनानि यानि ॥ ८८ ॥

तानीमानि ; तस्या महाभागाया एव । (पुनर्निरूप्य सबहुमानम्)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पादार्पणेषु तस्याः पद्मानि स्पष्टरेखमीक्ष्यन्ते ।
पादेन साम्यरोषात्प्रतिपदमेतान्यधःकृतानीव ॥ ८९ ॥

किञ्च ;

अथ नौनवयावकारुणानि प्रमदायाः कलये पदार्पणानि ।
जघनस्तनभारजातपादद्विगुणारुण्यविभानुरञ्जितानि ॥ ९० ॥

अन्यानि, कन्यामणिहस्तावलम्बनविनियुक्ताया व्यवस्यामि पदानि वयस्यायाः ।

पद्मेक्षणायाः पथि दक्षिणासमं
तस्याः प्रयान्त्याः पदमेतदेककम् ।
हस्तावलम्बावनतार्धविग्रह-
स्फीतेन भारेण भृशं यदर्पितम् ॥ ९१ ॥

भवत्वमुमेव मार्गमनुसरामि । (तथा करोति)

(नेपथ्ये)

विजव्यस महाराय! विजयव्स ।

राजा—(श्रुत्वा ससंभ्रमं) प्रकृतिकुटिलोयमिहापि कथं संगतः सारंगः ? सर्वथा पुनरयमिह सहवयस्यायाः प्रेयस्याः पदार्पणानि विज्ञास्यति । तावदहमन्यत्र गमिष्यामि । (इति पन्थानं विमुच्यान्यत्र तिष्ठति)

(ततः प्रविशति कृतस्नातनैपथ्यो विदूषकः)

विदूषकः—(अग्रतः सरसीमवलोक्य, राजानमदृष्ट्वा संभ्रान्तः ।)

इह मं महागहणे विसज्जिअ, एत्थ किअण्हाणविही जेमणुक्कण्ठिदमणो देवालयं किं पव्विदो देवो ! (विमृश्य) अहव किदं सन्देहेण । पव्वहं एक्कावोसणचउव्विससहव्स-व्वह्मणमिव्ठव्णदाणकुसलो रहुणाहणरवालो बुहुव्खिअं णं एव्कं वह्मणं अहोजिअ, सयं एव्व जेमणव्थं कहं गमिव्सदि ?

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ता एव्थ एव्व पच्छायसीअळे कहिं वि पायवमूळे चिव्ठइ। (परिक्रम्य, अवलोक्य सहर्षं) कहं एव्थ एव्व महारायो चिव्ठइ। (उपसृत्य) वयव्स! एरावदीपव्जंते णिव्वव्टिअमव्झंदिणकव्मो एसो वह्मणो। ता जेमणव्थं देवालयं गमिव्सामो। एव्थ किदं अणेण वव्थविलंवेण।

(छाया) [इह मां महागहने विसृज्यात्र कृतस्नानविधिर्जेमनोत्कण्ठितमना देवालयं किं प्रस्थितो देवः? अथवा कृतं सन्देहेन। प्रत्यहमेकापोशनचतुर्विंशसहस्रब्राह्मणमिष्टान्नदानकुशलो रघुनाथनरपालो बुभुक्षितमेनमेकं ब्राह्मणमभोजयित्वा, स्वयमेव जेमनार्थं कथं गमिष्यति? तदत्रैव प्रच्छायशीतळे कुत्रापि पादपमूळे तिष्ठति। कथमत्रैव महाराजस्तिष्ठति। वयस्य! ऐरावतीपर्यन्ते निर्वर्तितमाध्यन्दिनकर्मैष ब्राह्मणः। तज्जेमनार्थं देवालयं गमिष्यावः। अत्र कृतमनेन व्यर्थविलम्बेन।]

राजा–किमनुष्ठितं निरवशेषं माध्यन्दिनकृत्यम्?

विदूषकः–(श्रुत्वा सासूयं) अव्ज एव्व सव्वोवि एव्वसंवच्छलपव्जंतं मव्झण्णकव्मो समं आकण्ठो अणुव्ठिदो। वयव्स! किं ण पव्सासि? अदव्भेण दव्भपविव्तेण अंगुळीसव्णिवेसिदेण, णिडालतळलिव्तेण भव्माहिदेण तिवुण्डेण च अप्पा मंडिदो। इदो किं करणिव्जं विणा जेमणेण? एसो वह्मणो बहुव्खिदोव्ति। संपदं अहिलंवि व्भमइ भुवणं। किं ण पेव्खसे? तहवि, तुह अहिजादजेव्मणे एदव्सि वंहणे दया ण दीसइ। अयं उण उण्हव्पकिदी तवणो णिडालं तवइ। एसो वि देसो पादणहंपचो। इमिणोवि उदरं जालाजडालउव्वव्गिद-

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जाठराग्गिजज्जरिदं। केणवि अन्दट्ठिदेण जंघासिरा आयट्ठियदि। मज्झदिणसुज्जादवसंतावाहिरिसंदुक्खिदजाठराग्गिसिहाग्गणिग्गदधूमाकुलिदा विअ अच्छिणो मह ण पेच्छंति। कण्णेसु कोवि मज्झण्णमहासंखं धमइ। किं तुए ण सुणीयदि? किं बहुणा; एदस्सि पदेसे वणमहिसा विअ दंसा दिढपक्खा अंतरिक्खे परिब्भमंति। ता णिरंतरपाअसद्दुमसंतदिसाहासिहाणुहावदाए असुज्जंपस्से, अविरळसिसिरसिअदामणहरदाए सेवणजोग्गे तस्सि मग्गे जेमणत्थं झत्ति गमिस्सामो।

(तथा कृत:)

(छाया) [अद्यैव सर्वमप्येकसंवत्सरपर्यन्तं मध्याह्नकर्म सममाकण्ठमनुष्ठितम्। वयस्य! किं न पश्यसि? अदभ्रेण दर्भपवित्रेणांगुलीसन्निवेशितेन निटालतललिप्तेन भस्माहितेन त्रिपुंड्रेण चात्मा मंडितः। इतःकिं करणीयं विना जेमनेन? एष ब्राह्मणो बुभुक्षितोऽस्ति। साम्प्रतमखिलमपि भ्रमति भुवनम्। किं न प्रेक्षसे? तथापि तवाभिजातजन्मन्येतस्मिन्ब्राह्मणे दया न दृश्यते। अयं पुनरुष्णप्रकृतिस्तपनो निटालं तपति। एषोपि देशः पादनखंपचः। अस्याप्युदरं ज्वालाजटालोद्वलितजाठराग्निजर्जरितम्। केनाप्यन्तःस्थितेन जंघासिराऽऽघट्यते। मध्यदिनसूर्यातपसन्तापाहिरिसन्धुक्षितजाठराग्निशिखाग्रानिर्गतधूमाकुलिते इवाक्षिणी मम न प्रेक्षेते॥ कर्णयोः कोपि मध्याह्नमहाशंखं धमति। किं त्वया न श्रूयते? किं बहुना; एतस्मिन्प्रदेशे वनमहिषा इव दंशा दृढपक्षा अन्तरिक्षे परिभ्रमन्ति। तस्मान्निरन्तरपार्श्वद्रुमसन्ततिशाखाशिखानुभावतयाऽसूर्यं पश्ये, अविरळशिशिरसिकतामनोहरतया सेवनयोग्ये तस्मिन्मार्गे जेमनार्थं झटिति गमिष्यावः। (तथा कृत:)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–(स्वगतं) तानि पुनरेतानि पादांकितानि नायिकायाः, कथ मन्यथा नयामि ? तावदेनमन्यत्रासक्तदृष्टिं करोमि । (प्रकाशं) ऊर्ध्वमवलोक्य) अहो ! नैरन्तर्यसरणिपर्यन्तकन्दलितविविधानोकहनिवहशाखाशिखानां ;—

विदूषकः–अहइं ; सरदागमुत्तेजिदसुज्जकिरणवज्जपडणाविघडिअसिरकप्परकवालपच्चापत्तिकप्पणचणपच्छायसिसिरसमीरणाणं अन्तरा अणिआमआणु(ले)सेवणेहिं अजव्सं णिवादाए महाविवआए णिम्मुक्कोह्मि ।

(छाया) [अथ किं; शरदागमोत्तेजितसूर्यकिरणवज्रपतनविघटितशिरःकर्परकपालप्रत्यापत्तिकल्पनचणप्रच्छायशिशिरसमीरणानामन्तराऽनियामकानुसेवनैरजस्रं निवाताया महाविपदो निर्मुक्तोस्मि ।]

राजा–सखे ! सम्यगभिहितं भवता । (उच्चैरालक्ष्य सहस्तनिर्देशं) वयस्य ! पश्य पश्य ! इमानि पचेलिमानि स्वत एव विदीर्णानि वनान्तरेषु सुवर्णसावर्ण्यमावहन्ति निरन्तरं वर्षन्ति रसानिह पनसानि ।

विदूषकः–(अवलोक्य साश्चर्यं) तुह अन्तेउरमज्झवड्ढिदव्स बालुज्जाणव्स सव्मं वहइ समपरिणव्मफलभरमानन्दणिरन्तरं विविहरुव्खसंतदिसंपुव्णं णं रव्णं । पमदवणपणसा विअ एदेवि किं पादेसु फलन्ति । दाव विलोअइव्सं ।

(छाया) [तवान्तःपुरमध्यवर्धितस्य बालोद्यानस्य साम्यं, वहति समपरिणामफलभरमानन्दनिरन्तरं विविधवृक्षसन्ततिसम्पूर्णमेनदरण्यम् । प्रमदवनपनसा इवैतेपि किं पादेषु फलन्ति ! तावद्विलोकयिष्ये ।]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–(स्वगतं) एनमन्यत्रासक्तदृष्टिं करोमीति सम्यगुपक्रान्तम्; यदयमेव पुनरवश्यशंकनीयनायिकापादांकनदर्शनोपायः। भवतु; किं करोतीति प्रतिपालयामि। (तथा करोति)

विदूषकः–(अधस्तात्स्त्रीणामलक्तकारुणानि चरणार्पणानि दृष्ट्वा सभयकम्पं) हव्वी! दारुणणहरव्पहरणविदारिअसव्तसोणिहविदूसिआ दुव्ठसव्दूलाणं पअपंति दीसइ। ता इमं बह्मणं परिव्तायदु (इति सोद्वेगं भूमौ पतति)।

(छाया) [हा धिक्! दारुणनखरप्रहरणविदारितसत्वशोणितविदूषिता दुष्टशार्दूलानां पदपंक्ति र्दृश्यते। तदिमं ब्राह्मणं परित्रायतु।]

राजा–(स्वागतं) एतदशनाययैव महत्या सम्प्रत्याचरिता मदनुकूलता। यदनया पुनरेतेषु यावकारुणेषु पादार्पणेषु सत्वरुधिरसक्तशार्दूलपदबुद्धिरुत्पादिता। कथमिदमनेनान्यथा चिन्तितमनुमोदयामि? भवतु; एवमभिधास्ये। (प्रकाशं) सखे! मा भैषीः। नूनमेतानि पुण्डरीकमुख्यनिन्दितरूपाणां चरणार्पणानि। भवतु; भवन्तमदसीयदृष्टिपातादुपायेन दूरत एवाहमिह परिहरिष्यामि। (इति हस्तमाकर्षति)

विदूषकः–(कथंचिदुत्थाय) पुणोवि पुंडरीअमुव्खणिंदिअमिआणं एदाणं चरणंकणसरणं कहमणुसरेसि? एव्थ अणुसरंतं मं एदाणं दिव्ठिपादादो परिहरिव्संति कहं तुए रव्णा पडिव्णादं? कहं तुह वअणविव्सासेण एआरिसे आउलव्पदेसे णरेसर! अणुसरेमि? ण खु एदे तुह देसगदा जणा विअ दुव्ठमिआणिदेसआरिणो होंति ता वयव्स! देवालयं गमिव्सं। मह तुए सहायदाए होदव्वं।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [पुनरपि पुण्डरीकमुरव्यनिन्दितमृगाणामेतेषां चरणांकणशरणं कथमनुसरसि? अत्रानुसरन्तं मामेतेषां दृष्टिपातात्परिहरिष्य इति कथं त्वया राज्ञा प्रतिज्ञातम्? कथं तव वचनविश्वासेनैतादृशयाकुलप्रदेशे नरेश्वर! अनुसरामि? न खल्वेते तव देशगता जाना इव दुष्टमृगा निदेशचारिणो भवन्ति। तद्वयस्य! देवालयं गमिष्ये। मम त्वया सहायतायै भवितव्यम्।]

राजा–(खड्गं निष्कोशयन्) स एष खड्गो मे निष्कोशः खण्डितमहावहारः पुनरत्रापि त्वामक्षतं रक्षिष्यति। तदिह मा भैषीः।

विदूषकः–(खड्गधारानिम्बितमात्मानमवलोक्य सभयकम्पमक्षिणी निमील्य) इमिणं अच्चुग्गमंडलग्गं णरेसर! कोसंतरे झडिइ करेहि। अग्गहा, महाकुलीणोयं बंहणोहं तत्थ पहिहलिदो गाहो विअ विदारि ददेहो जाव होमि।

(छाया) एनमत्युग्रमंडलाग्रं नरेश्वर! कोशान्तरे झटिति कुरुष्व। अन्यथा, महाकुलीनोयं ब्राह्मणोहं तत्र प्रतिफलितो ग्राह इव विदारितदेहो यावद्भवामि]।

राजा–(सोपहासं) खड्गं सकोशयन्) सखे! कोशान्तरितः खड्गः। अहो! कथमायुधावलोकनेपि सभीतिरग्रजातिः?

विदूषकः–(अक्षिणी उन्मील्य, सासूयं संस्कृतमाश्रित्य)।
'परिक्षार्थमप्यायुधं नाददीत' त्ति तत्तभवंतेण आवत्थंबेण मुणिणा बह्मणधम्मो एव्वं ववत्थाविदो। तं अतिमेत्तं अणुसरंतेण मए बह्मणुत्तमेण दंसणं वि ण करणिज्जंति एव्वं करिअदि। मह धीरं कायबलं साहसं वि किं तुमं ण जाणासि? (इति खड्गं गृह्णाति)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) ['परीक्षार्थमप्यायुधं नाददीते'ति तत्रभवताऽऽपस्तम्बेन मुनिना ब्राह्मणधर्म एवं व्यवस्थापितः। तमतिमात्रमनुसरता मया ब्राह्मणोत्तमेन दर्शनमपि न करणीयमिति 'एवं क्रियते'। मम धैर्यं कायबलं साहसमपि किं त्वं न जानासि?]

राजा–(खड्गं दत्वा) (स्वगतं)।

कराळतरकरवाळकरं मां निध्याय, ते मुग्धा जना भजेयुरतिभयमिति सन्दिहानस्य मे; साहाय्यकमाचरितमनेन पुनराददानेन तावदेतामसिधेनुलताम्। वहत्वेष मूर्खः। भवत्वेवमभिधास्ये (प्रकाशम्) तथैव त्वं निर्मर्यादसत्वधैर्यशौर्यादिगुणगणानां विपणिः। अतस्तव हस्तमेव पुनरविनयमेदुरपरनरस्वामिपरिषदविरतरुधिरास्वादनव्यग्रो मण्डलाग्रोयं मण्डयतु।

विदूषकः—अह इं; सव्वं एव्व उव्वरिअं अव्वेण महारायेण।
(अतिभारतया खड्गं शिरसा वहन्मन्दं मन्दं परिक्रामति)

(छाया) [अथ किं? सत्यमेवोच्चरितमार्येण महाराजेन]

राजा–अनार्यमिति धार्यते शिरसा खड्गः।

विदूषकः–(स्वगतं) एदव्स बलाहावं अहं कहं कहेमि? होदु एव्वं दाव (प्रकाशं) महारायकरव्गहजोव्गं खव्गं अहं बह्मणोवि कहं हव्थे वहेमिव्ति; उव्तमंगेण एव्व वहेमि। (उभावपि कतिचित्पदानि परिक्रामतः)

(छाया) [एतस्य बलाभावमहं कथं कथयामि? भवत्वेवं तावत्; (प्र) महाराजकरग्रहयोग्यं खड्गमहं ब्राह्मणोपि कथं हस्ते वहामीति; उत्तमांगेनैव वहामि।]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–(पुरतोऽवलोक्य) किमिदमग्रत एव प्रत्यग्रतरसमग्रसहकारपल्लव-तल्लजास्वादनविकस्वरपिकस्वरसंगीतभंगीसमानमंगीकृतमलयाचलनिलयानिलाहतीरितमालतीकिसलयाघट्टनकरताळलयानुकूल्यमुद्वेल्यमानरुचिरकलापमुदीर्यमाणकेकालापमुररीक्रियमाण-विविधमुखाभिनयमुदञ्च्यमानचतुरचरणलयमूरीकृतनटनरीतिमयूरीकुलं निरीक्षमाणैः, विकचपयोजमणिमयोदग्रभद्रासनमध्यमध्यासीनै राजहंसैरविरतप्रशंसैकतानसनादमधुकरसनाथैरुपशोभितोयं प्रदेशो निखिलऋतुधर्मोपचितमुपवनमिव नयति नयनयुगळममन्दमानन्दम् । यतः;

क्रमुकवकुललोध्रनाळिकेरीकनकपट्टीररसालसालमुख्याः ।
समभिततरवस्समेधमाना विदधति मोदममी विभिन्नरेखाः ॥९२॥

किञ्च;

वीक्ष्यन्ते मणिवेदिकाविटपिनां रेखाजुषामन्तरा
सारण्यः सुमधूळिकल्पिततटाः सान्द्रा मधूळीरसैः ।
कण्ठा(कर्णा)लंकृतिघंटिकाघणघणात्काराभिरामा मृगाः
विस्तीर्णाश्च चतुष्किकास्ततइतो विश्रान्तये निर्मिताः ॥ ९३ ॥

विदूषकः–(सोपहासं) जाणेमि जणेसर! तुह अहिच्छिदं अपुव्वसंदंसणकोऊहलं उव्पाअअंतेण मह अव्पा भवंतेन (ण) आलव्हिअदि । ता एव्थ एव्व उरुव्खसआसे संविसेमि। वयव्स! जह अहिमदं तुह संचरिअ, एव्थ एव्व पासुव्तेण मए सव्दुदियो जेमणव्थं देवालयं गच्छेहि ।

(छाया) [जानामि जनेश्वर! तवापेक्षितम् । अपूर्वसन्दर्शनकौतूहलमुत्पादयता ममात्मा भवता नालक्ष्यते । तदत्रैव वृक्षसकाशे संविशामि । वयस्य! यथाभिमतं तव, सञ्चरित्वात्रैव प्रसुप्तेन मया सद्वितीयो जेमनार्थं देवालयं गच्छ ।]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–किमेवं भणितव्यं! बालमित्रं खलु भवान्।

विदूषकः–(श्रुतिमभिनीय) अहो कोवि सवणसुहावहो सुहारसो विअ सुणीयदि एसो आलावो। संहे! किमिदं कहेहि परमेव्थदो।

(छाया) [अहो कोपि श्रवणसुखावहः सुधारस इव; श्रूयत एष आलापः। सखे! किमिदं कथय परमार्थतः]

राजा–(स्वं) अहो! पुनरिहोपवने सैषा योषामणी वल्लकीमंगुळीपल्लवेन क्वापि निक्वाणयन्ती तिष्ठति। कथमिदमस्यै कथयामि परमार्थतः? कथं वा तदिदमपलपामि? भवत्वेवं तावत्। (प्रकाशं) सखे! सारंग! द्वीपान्तरगतकोकिलवाण्याः पुनरयं विलासः।

विदूषकः–अह्मकेरदीवगदाए कोइलवाणीए एसा कोइलवाणी सहस्सहा अदिसइदा। ता एसा तुह एव्व आअरणिव्वा।

(छाया) [अस्मदीयद्वीपगतायाः कोकिलवाण्या एषा कोकिलवाणी सहस्रधाऽतिशयिता। तदेषा तवैवाहरणीया]

राजा–(स्वं) (साश्चर्यं) फलतु सेयमुपश्रुतिः। तावदेनमन्यासक्तचित्तं करोमि। (प्रकाशं) (अंगुल्यग्रेण वृक्षाग्रं प्रदर्शयन्) सखे! वृक्षाग्रे व्याममात्रमिदं मधुच्छत्रं दृश्यते।

विदूषकः–(दृष्ट्वा साश्चर्यं)
(आवेष्टितमुत्तरीयमुपवर्हयन्नुत्तानशयस्तत्रैवासक्तदृष्टिर्मधुच्छत्रं पश्यति।)

राजा–अञ्चुमेव मे समयः। (इत्युपवनं प्रविशति) (मुहूर्तमवधाय सविस्मयं)

वीणातन्त्रिगुणक्वणेन गुणितं विष्टब्धसत्वारवं
वामाक्षीकलकण्ठनाळगळितं बालानिलेनाहृतम्।
संगीतं बत जातु जातु विलसत्तारस्वरं केवलं
दूरादस्फुटरागभेदमधुना दुग्धे सुधां श्रोत्रयोः ॥ ९४ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(समन्तादवलोक्य साश्चर्यं)

अमी वेदीभागाः क्वचिदरुणकान्तोपलमयाः
ज्वलन्तः पर्णान्तर्विगळितसमग्रातपतया ।
यदा नीतं गीतं तदिदमनुकूलेन मरुता
तदैव स्विद्यन्ति स्फुटपिमिसिमाकारनिनदम् ॥ ९५ ॥

(अधस्तादवलोक्य)

नेदीयसा वेदिपथेन पुनरेतेन, सौत्रामणिभिरिह मणिभिराकलितेन, पार्श्वयुगळबालवकुळपादपस्तबकान्तरपरिग्रस्तकोमळतरपरागभरमेदुरतया सुलक्षितविन्यासैः कन्यामणिचरणांकनैरधिगतधन्यभावेन तदभ्यर्णमुपगम्य; कर्णरसायनं गानं सम्यगाकर्णये ।

(इति परिक्रम्य मुहूर्तं दत्तकर्णायति)

अंगीकृतं नताङ्ग्या संगीतं वल्लकीरवोल्लसितम् ।
मिळितं मिळिन्दनादैः कोकिलकोलाहलं विडम्बयति ॥ ९६ ॥

(भूयोपि कर्णं दत्वा सविमर्शं)

विशदगमकभेदं वीतकाकु प्रकाम-
प्रकटितपटुताळप्राप्ति सप्राणशक्तिः ।
मुहुरुपचितनादा मूर्छना स्वच्छनाना-
स्वरनिकरविभेदं श्रूयते व्यायतेयम् ॥ ९७ ॥

किमयमौडवो वा षाडवो वा सम्पूर्णो वा रागः ? (पुनरपि सविशेषमाकर्णयन्) असौ सम्पूर्ण इति मे निर्णयः । सप्तापि यत्तावदावर्तन्ते मधुरं ते स्वराः । एतेषु—

आरूढषड्जुती तावुभावृषभधैवतौ ।
निषादः काकलीसंज्ञो गान्धारश्चान्तराभिधः ॥ ९८ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शिष्टास्त्रयोप्यविकृता एव श्रूयन्ते। तदयं नाटराग एव। भवतु; तामेव द्रक्ष्यामि। (इति नाट्येन कतिचित्पदानि परिक्रामन्पुरस्तादवलोक्य, साश्चर्यानन्दं)।

माद्यत्षट्पदशोभिपुष्पविगळन्माध्वीरसस्रोतसः
पाटीरार्द्रसमीरबालकचलच्छाखाशिखाःशाखिनः।
एते गीतमिहावकर्ण्य कुतुकादेणीदृशांगीकृतं
सानन्दाश्रुभरं ध्रुवं विदधते श्लाघाशिरःकम्पनम् ॥ ९९ ॥

(भूयोपि कर्णं दत्वा)

कङ्कणघणघणरणितैः सविधस्थसखीजनस्तवैरपि च।
कल्पितकरावलम्बनमेतद्गीतं समेधते सुदृशः ॥ १०० ॥

तदिह सन्निहिततरमहितबालकर्पूरकदनकाननपरिणतिविदळितदळविगळितकर्पूरपूरकरीषपाषाणस्वच्छन्दकन्दळितचन्दनविटपिविटपच्छटागाढावलीढाधिकतमैलालवंगलतावितानप्रच्छायशीतळे मरतकचतुष्किकातले पुनरबलेयमनंगावलेपादयत्नसिद्धमूलिका मुग्धगन्धर्वविद्येव मूर्तिमती कर्णामृतवर्तिकायमानं गायन्ती परिजनाभ्यामुभाभ्यामुपास्यमाना तिष्ठति। भवतु तावत्; अत्रैव चन्दनलतानिकुञ्जे निगूढोहममुष्या मृगाक्ष्या रूपातिशयं द्रक्ष्यामि। (निभृतपदं तथा करोति)

(ततः प्रविशति मरकतवेदिकायामुपविष्टोपवीणयन्ती नायिका सखी चेटी च;)

राजा—(साश्चर्यानन्दानुरागं) नूनमियं नासासादितनासामणी रमणी। (पुनर्निरूप्य) अहो निर्वापितरतिगर्वातिरेकमस्यास्सर्वायवलावण्यम्।

(केशपाशं निरूप्य)

अत्यायतानमुष्याः स्रष्टा केशान्सकौतुकं सृष्ट्वा।
अनतिक्रमाय पदयोरद्धा तेषामराळतामाधात् ॥ १०१ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नूनमस्या महीतलस्यालंकृतेरतिनिबिरीसकबरीभरसौन्दर्यलवचौर्य-मिथ्यापवादादत्याहितेन; सत्यापनमृत्या परमद्यापि वनपद्ययाऽनुसञ्चरन्ति, चञ्चुपुटेन कञ्चुकिगणग्रहणसोत्कण्ठा नीलकण्ठाः ।

(अक्षिणी निरूप्य)

तारव्यविभ्रमतरंगिततारकं त-
दस्या विभाति नयनद्वयमम्बुजाक्ष्याः ।
आकर्णजाहमवगाहमवाप्य रुद्ध-
मत्याकुलं मुखमिवाखिलमावरीतुम् ॥ १०२ ॥

किञ्च;

स्पर्धावशेनेव परस्परस्य दृशौ भजन्त्यावतिदीर्घभावम् ।
उदीक्षितुं प्रापि समुन्नतत्वं मध्यस्थया नासिकया मृगाक्ष्याः ॥ ।

(कपोलद्वितयमालक्ष्य) नूनमप्रतिहतमण्डलाभोगं, द्विधाकृतेन सुधासूतिमण्डलेन तावदन्तराकलितदलितभागेन गल्लयुगलमस्याः सृष्टमम्बुजविष्टरेण ।

अन्तर्निश्चयोतदमृतस्रोतः श्रोतृरसायनम् ।
गानव्याजेन गन्धेभगतेरुज्जृम्भते यतः ॥ १०४ ॥

(मुखमवलोक्य)

असंशयमस्या हंसगमनायाः कैरवधवगौरवधनचोरवदनमरीचिवीचिकया, पराजिताडम्बरमम्बुरुहनिकुरुम्बमम्बरमणिबिम्बरचितदृष्टि शम्बरमधितिष्ठदतिनिष्ठुरमद्यापि दुश्चरं तपश्चरति ।

(आपादचूडं विलोक्य)

लावण्यमंगमखिलं ललनामतल्याः
नीत्वाऽतिविस्मयकरं नियतं विधाता ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आधादुरोजयुगळीमपदिश्य राशी
शिष्टेन तेन धृतचूचुकनैल्यमुद्राम् ॥ १०५ ॥

किञ्च ;

कचश्चेन्निश्चेता क इह तमसश्चेतसि तुलां
मुखश्चेत्किञ्चेन्दुर्मदमहह मुञ्चेत नियतम् ।
स्तनौ चेद्याचेत क्षितिभृदपि नीचेतरपदं
पदं चेत्पञ्चेषोर्विधुतिमिषुरञ्चेदचरमः ॥ १०६ ॥

अपि च ;

केशांशुर्यदि कालिका कलयतामद्धा विषास्वादनं
नेत्रश्रीर्यदि नित्यमेणनिवहाश्चर्वन्तु सर्वे तृणम् ।
वक्त्रेन्दुर्यदि तिग्महेतिदळनं वाञ्छेत्सुखं वारिजं
किं वर्ण्येत ततः परं कृशतनोरंगं जगन्मोहनम् ॥ १०७ ॥

(पुनर्निरूप्य) अहो वपुरभिरूपतानुरूपरमणीयमस्या रमणीशिरोमणेरनवद्यं वीणावाद्यवैशारद्यम् ।

अभ्रूविकारमनराळसिराळकर्ण-
मस्पन्दगात्रमनुदीतनिदाघतोयम् ।
अङ्कूरिताननविलासमपास्तकाकु
विस्तारितानमुपवीणयते यदेषा ॥ १०८ ॥

अनया भुवि तनयामण्या कस्य धरण्याखंडलस्य विलसति कुलम् ? कीदृशी वा कान्दिशीकमृगेक्षणाया नामतोपयोगेन धन्यतरा विराजति पुनरक्षरानुपूर्वी ? अनयोरिह परिजनयोरियं वीटीदानविनियुक्ता वधूटी चेटी । अर्धासनमध्यासीनेयं सरसीरुहदायादमुखी पुनरपरा सखी - कया वाभिरव्यया पुनरेते विख्याते ? तदिदं तत्तादृशनासाभरणमुक्ता-मणिवृत्तान्तमप्येतासाममृतासारसहसंभवेन विस्रंभवचनगुम्भेन साव-

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

धानमवधारयामि । (कर्णं दत्वा, सानुरागं) अहो ! साम्प्रतमासां प्रवृत्त एवायं विस्रंभवार्तारम्भः ।

सखी–हले चन्दकले ! एरावदीतीरावणीवसंतभअवंतदाणववइरिवर-व्पदाणलव्धं णासाहरणमुव्ताहलगव्भि णं रअणसमुव्गअं, समुव्दअरमहावहारेण हठादो अवहृदं अविआरिअ, एआरिसं वि आयासं अविगणिअ, कहं अदिपेलवेहिं अंगुळीपल्लवेहिं वल्लइं पमोदेण चिरं वादेसि ? अव्ज दाव मुव्तादीवमव्झगदताद-विजअकेदुसमीवादो तुह उवजणणी जोइणी पडिहावदी विहाय-ससंचारिणा जइ सव्णिहिदा भवे ?

(छाया) [हले चन्द्रकले ! ऐरावतीतीरावनीवसद्भगवद्दानववैरिवर-प्रदानलव्धं नासाभरणमुक्ताफलगर्भि, एतद्रत्नसमुद्गकं समुद्रचरमहावहारेण हठादपहृतमविचार्यैतादृशमप्यायासम विगण्य, कथमतिपेलवैरंगुळीपल्लवैर्वल्लकीं प्रमोदेन चिरं वादयसि ? अद्य तावन्मुक्ताद्वीपमध्यगततातविजयकेतु-समीपात्तवोपजननी योगिनी प्रतिभावती विहायससंचारिणा यदि सन्निहिता भवेत् ?]

चेटी–तदो दिव्ठिआ विलसिदं भव्टारिआए ।

(छाया) [ततो दिष्ट्या विलसितं भट्टारिकायाः]

सखी–कहं विअ ?

(छा) [कथमिव ?]

चेटी–जं भअवदी पडिहावदी भव्दिदारिआए अहिमदं झडिदि घडेदि ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छा) [यद्भगवती प्रतिभावती भर्तृदारिकाया अभिमतं झटिति घटयति]

नायिका--हंजे चंदिमे! इमाए कुमुव्जईए तं एदं सव्वं वि णासाहरणमुव्ताफलवुव्तंतं अहं एव्व कहइव्सं।

(छा) [हला चन्द्रिके! अस्याः कुमुद्वत्यास्तमेतं सर्वमपि नासाभरणमुक्ताफलवृत्तान्तमहमेव कथयिष्ये]

चेटी--अहइं [अथ किं]

राजा--(स्वं) एषा तु योषामणी विजयकेतुवंशभूषा। अहो! चन्द्रकलेति रूपधेयानुरूपमस्या नामधेयम्। तदनुरूपं चानयोः कुमुद्वतीचन्द्रिकेत्यभिधानम्। अस्याश्च सुदतीमणेरुपमाता प्रतिभावती योगिनी। सा च योगिनी मुक्ताद्वीपवासिविजयकेतुसमीपादाकाशयानेन सरयमायास्यति। भवतु; मुक्तामणिवृत्तान्तमवशिष्टमप्यमुष्या मुखतः श्रोष्यामि। (इति दत्तकर्णस्तिष्ठति)

नायिका--हला कुमुव्जइ! णासाहरणमुव्ताफलगव्भिणं रअणसमुग्गअं पअव्छंतेण भअवंतेण एव्वं अहिमदं अहिहिदं। एदं समुव्गअं अवाविअ एव्थ जम्बूदीवेसरो कुणइ दे पुरसव्णिहाणं। सोव्छाया (सोश्वेअ) णिव्जिअसुमायुहरूवहेयो णाहो भविव्सदि; णअंगि! मदंसजादो। एव्थ विव्सासादो उव्लासेण चिरं वल्लई वाइआ। दाणिं च ण कोवि णरवालो आसादिअणासामाणिसमुग्गओ समागदो ता इमादो बालुव्जाणादो घरं पविसामो।

(छाया) [हला कुमुद्वति! नासाभरणमुक्ताफलगर्भितं रत्नसमुद्गकं प्रयच्छता भगवतैवमभिमतमभिहितम्। एतं समुद्गकमवा

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्यात्रं जम्बूद्वीपेश्वरः करिष्यति ते पुरसन्निधानम्। स्वच्छायानिर्जितसुमायुधरूपधेयो नाथो भविष्यति; नतांगि! मदंशजातः। अत्र विश्वासादुल्लासेन चिरं वल्लकी वादिता। इदानीं च न कोपि नरपाल आसादितनासामणिसमुद्गकः समागतः। तदस्माद्वालोद्यानाद्गृहं प्रविशामः]

चेटी–(वीणामादत्ते)

सखी–(हस्तावलम्बं ददाति)

नायिका–(उत्थातुमिच्छति)

राजा–अयमेव मे सन्निधानसमयः! (इति समीपमुपसर्पति)

(सर्वा राजानं दृष्ट्वा भयादुत्तिष्ठन्ति; सखी चेटी च विस्मयस्तिमिते राजानमवलोकयन्त्यौ तिष्ठतः)

नायिका–(लज्जावनतमुखं पादांगुष्ठेन लीलानलिनदलानि गणयन्ती)

(स्वगतं)

एसो हन्त महानुहावपकिदी एत्थावलोईयदि
खोणीए वरिणी विअ व्पडिभडो को वा पसूणेसुणो।
किं मोहो सिमिणो पुणो किमहवा लव्धो महुव्दोहिणो
अंसो संपदि जम्बुदीवमहिवो आणीदणासामणी ॥ १०९ ॥

(छाया) [एष हन्त महानुभावप्रकृतिरत्रावलोक्यते
क्षोण्याः परिणीरिव प्रतिभटः को वा प्रसूनेषोः।
किं मोहः स्वप्नः पुनः किमथवा लब्धो मधुद्रोहिणः
अंशः सम्प्रति जम्बूद्वीपमहिप आनीतनासामणिः ॥]

विदूषकः–(सांगभंगमुत्थाय) एत्थ पासुत्तं म विसज्जिअ जेमणत्थं देवालयं किं पडिणिवुत्तो अज्जवुत्तो? (इत्यधस्तादवलोक्य)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पडिणिवुत्ताणि चरणव्पणाणि रण्णो ण दिसंति। ता तत्थ एव्व फलमव्भवहरंतो चिव्ठइ। अहं वि असणाआविणोदाय जहेच्छं एदं महु विज्जेमि। (इति वृक्षमारुह्य मधुच्छत्रं गृह्णन्सरघावाधां निरूपयति) अविहा अविहा! जम्बूदीवमण्डलाहण्डल रहुणाहण-रणाह मं बाहंतं महंतं महावहारं मंडलग्गेण विदारिअ णासा हरणमुत्ताहलगब्भिणं रअणसमुग्गअं विअ इमाओ दासीए उव्वितओ सरहाओ वि विदारिअ अण्णं वि महंतं फलं लहेहि।

(छाया) [अत्र प्रसुप्तं मां विसृज्य जेमनार्थं देवालयं किं प्रतिनिवृत्त आर्यपुत्रः? प्रतिनिवृत्तानि चरणार्पणानि राज्ञो न दृश्यन्ते। तत्तत्रैव फलमभ्यवरंस्तिष्ठति। अहमपि 'अशनायाविनोदनाय' यथेच्छमेतमन्मधु पिबामि। अविहा! अविहा! जम्बूद्वीप-मंडलाखण्डल! रघुनाथनरनाथ! मां बाधन्तं महान्तं महा-वहारं मंडलाग्रेण विदार्य, नासाभरणमुक्ताफलगर्भितं रत्नसमुद्ग-कमिवेमा दास्याः पुत्रीः सरघा अपि विदार्यान्यदपि महत्फलं लभस्व।]

नायिका–(श्रुत्वा साश्चर्यानन्दानुरागं)।

(खं) एसो एव्व आसादिअणासामणिसमुग्गओ जम्बूदीव-मण्डलाहण्डलो रहुणाहणरवालो समागओ।

(छाया) [एष एवासादितनासामणिसमुद्गको जम्बूद्वीपमण्डला-खण्डलो रघुनाथनरपालः समागतः।]

राजा–(खं) अहो! रसविच्छेदः। यदस्य पुनरार्तस्वरमाकर्णयन्तो मदन्वेषिणः परिजना युगपदत्रैवापतन्ति।

(नेपथ्ये कलकलः)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नायिका–(स्वं) आगदा एव्व एदव्स रव्णो अव्णेसिणो परिजणा। ता घरं पविसामि।

(इति सव्याजं विलंव्य ताभ्यां सह निष्क्रान्ता)

(छाया) [आगता एवैतस्य राज्ञोन्वेषिणः परिजनाः। तद्गृहं प्रविशामि।]

राजा–(सोत्कंठं)

एणीदृशं त्वरितमेत्य मदीयमेत-
त्तामेव चित्तमनुधावति धन्यधन्यम्।

(विचिन्त्य)

स्थाने तदस्य परदा स्मरसायकानां
सद्यो ममेव भवितैव शरव्यभावः ॥ ११० ॥

विद्युदिव लक्षिता सा विपुलाक्षी घनवनान्तरिता।
अतनुरसौ शरधारामधिकमहो दिग्भ्रमं च पोषयति ॥ १११ ॥

(नेपथ्ये)

देवतातिथिपूजनैरवन्ध्या भवतु सुखाय, देवस्य माध्यन्दिनी सन्ध्या।
पादेषु पथि निलीना पान्थानां हन्त सम्प्रति च्छाया।
तप्तेव तपनदीप्त्या प्रणमिति कर्तुं प्रयाणवैमुख्यम् ॥ ११२ ॥

अन्यत्किमध्वगजनद्रुहमस्य ताप-
मह्नां विभोरसहमान इवातपोपि।
धात्रीतले मरुमरीचितरंगदम्भा-
दालोक्यते बत लुठन्नखिलैरिदानीम् ॥ ११३ ॥

गाहन्ते सरयं सरांसि विपिने गन्धद्विपेन्द्राः करैः
पाथः संसहयांशुतप्तमसकृद्बाह्यं विधूयाभितः।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्वैरं त्वत्परिकल्पितेषु शतशस्मन्त्रेषु भुक्त्वाधुना
नानादेशजुषः प्रवासमिळिता नन्दन्ति पान्था द्विजाः ॥ ११४ ॥

विदूषकः–(राजानमुपसृत्य) अह्मे एव्वाहे ससंभमं विज्जिभइ देवालयादो णिवेव्वजघण्टाणिणदजुव्वो मव्झव्वणसंखसव्दो । ता देवालयं गच्छामो ।

(छाया) [अंहो ! अत्रत्यः ससंभ्रमं विजृम्भते देवालयान्नैवेद्यघण्टानिनदयुक्तो मध्याह्नशंखशब्दः । तद्देवालयं गच्छावः]

राजा–(विदूषकेन सह नाट्येन परिक्रम्य निष्क्रान्तः)

॥ श्रीरामाय नमः ॥

इति पदवाक्यप्रमाणपारावारपारीण श्रीमदद्वैतविद्याचार्यसाग्निचित्यसर्वतोमुखाति
रात्रसाग्निचित्याप्तवाजपेययाजिगोविन्ददीक्षितवरनन्दनस्य श्रीयज्ञनारायण
यज्वनः कृतिषु रघुनाथविलासनाम्नि नाटके प्रथमोऽङ्कः

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

॥ द्वितीयोऽङ्कः ॥

(तत प्रविशति वेत्रिणा राजपुरुषेणाकृष्यमाणो निद्रापरवशो विदूषकः)

विदूषकः–(सांगभंगमुत्थाय, सजृम्भणमक्षिणी निमीलिते करतलाभ्यामुन्मृजन्) को वा एत्ताहे पच्चूहे मह सिमिणपच्चूहं करेदि ?

(छाया) [को वा एतावति प्रत्यूषे मम स्वप्नप्रत्यूहं करोति ?]

राजपुरुषः–अय्य सारंग ! जवणणामहेयोहं वेत्तिलोआज्झक्खो, रहुणाहक्खोणीपइणा पहिदो समागदो । ता एदु एदु भवं ।

(छाया) [आर्य सारंग ! जवननामधेयोहं वेत्रिलोकाध्यक्षो रघुनाथ क्षोणीपतिना प्रहितः समागतः । तस्मादेत्वेतु भवान् ।]

विदूषकः–दाहिणलोणसेवलिणीरमणमज्झवट्टिणं सिह्मळद्दीवं पट्ठिदेण इमिणा भट्टिणाहं सद्दुइओ, आमज्झण्णं तत्थ सव्वं वि वणमज्झं परिक्कमिअ, तदो एरावदीतीरावणीवासिणो कन्दप्पवइरिणो णिवेज्जसिट्ठं विविहसूवावूवचित्तवणपरमण्णमुक्खं भक्खवग्गं जहेच्छं भक्खिअ, तदो दीवादो तदाणीं एव्व एदं जम्बूदीवं समुद्दजाणेण पच्चागमिअ, अद्धरत्तपेरंतं तदुवासणं च कदुअ, घडिआदुअं एव्व एत्थ पासुत्तो । (आध्मातमुदरं प्रदर्शयन्) ता भक्खिदो विविहभक्खवग्गो एण्हिं वि ण जुण्णो । ता इमस्स ब्राह्मणस्स कावि तुए कादव्वा अब्भत्थणेत्ति; एत्थ खंधावारे कुत्थवि पडमंडवे चवलप्पकिदी पासुत्तो सारंगो ण दिट्ठोत्ति रण्णो विण्णवेहि ।

(छाया) [दक्षिणलवणशैवलिनीरमणमध्यवर्तिनं सिह्मळद्वीपं प्रस्थितेनाऽनेन भर्त्राऽहं सद्वितीय, आमध्याह्नं तत्र सर्वमपि वनमध्यं परिक्रम्य; तत ऐरावतीतीरावनीवासिनः कन्दर्प-

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वैरिणो नैवेद्यशिष्टं विविधसूपापूपचित्रान्नपरमान्नमुख्यं भक्ष्यवर्गं यथेच्छं भक्षयित्वा, ततो द्वीपात्तदानीमेवैतं जम्बूद्वीपं समुद्रयानेन प्रत्यागत्य, अर्धरात्रपर्यन्तं तदुपासनं च कृत्वा, घटिकाद्वयमेवात्र प्रसुप्तः। (आध्मातमुदरं प्रदर्शयन्) तद्भक्षितो विविधभक्ष्यवर्ग इदानीमपि न जीर्णः। तदस्य ब्राह्मणस्य कापि त्वया कर्तव्याऽभ्यर्थनेति; 'अत्र स्कन्धावारे कुत्रापि पटमण्डपे चपलप्रकृतिः प्रसुप्तः सारंगो न दृष्ट इति' राज्ञो विज्ञापय]

राजपुरुषः—रण्णो एदस्स असच्चविण्णावणं! स एसो ण समयो! जं एसो किं वि मंतअंतो विअ चिन्ठइ।

(छाया) [राज्ञ एतस्यासत्यविज्ञापनम्! स एष न समयः! यदेष किमपि मन्त्रयन्निव तिष्ठति।]

विदूषकः—(सानुस्मरणं) तस्स हिअअगदस्स(मं) अणुबोहिदं तुए (हिओहिर)। एसो रहुणाहजणाहिणाहो वणसञ्चरणादो पच्चागच्छंतो मम्महबाणलस्खीकिदो विअ पेक्खिदो। ता तंजापुरीवासिणिं देवीं चिंतिअ विरहदसा एदिणा आसादिदा। ता अस्स वयस्सस्स मणोविणोदणत्थं चित्तफलअविलेहणसामग्गिं सम्पादिअ, झत्ति णिव्वट्टिअसंझावंदणो तत्थ समागमिस्सं।

(छाया) [तस्य हृदयगदस्यानुबोधितं त्वया। एष रघुनाथजनाधिनाथो वनसञ्चरणात्प्रत्यागच्छन्मन्मथबाणलक्ष्यीकृत इव प्रेक्षितः। तत्तञ्जापुरीवासिनीं देवीं चिन्तयित्वा, विरहदशैतेनासादिता। तदस्य वयस्यस्य मनोविनोदनार्थं चित्रफलकविलेखनसामग्रीं सम्पाद्य, झटिति निर्वर्तितसन्ध्यावन्दनस्तत्र समागमिष्ये।]

॥ इति निष्क्रान्तौ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

॥ प्रवेशकः ॥

(ततः प्रविशति कामयमानावस्थो राजा)

(विवश इव ध्यानमन्दं परिक्रम्य दीर्घमुष्णं च निश्वसन्)

तत्तादृशं हृदय भो तरुणीमवाप्तु-
मेवं भ्रमन्मुहुरहो यतसे कथं वा।
व्यस्मारि किन्नु भवता विधिचोदितेपि
तद्दर्शने जलधिसन्तरणादियत्नः ॥ १ ॥

(विचिन्त्य) अहो महानेष मोहोदयः। यदसदेव हृदयं सदिव सम्बोधयामि सम्प्रति हि—

आलोकितेपि विषये बहुधाऽनुभूते
हा हन्त सोयमिति रोहति नावबोधः।

किं बहुना;

एतद्विधेयमधुनेति मतिं विनैव
प्राग्वासनातिशयितः पदमादधाति ॥ २ ॥

यान्ती केळिवने सखीमनुसृतामेणेक्षणा वीक्षितुं
वाञ्छन्तीव करावलम्बमसकृद्व्यावृत्य पश्चान्मुखम्।
साकूतप्रबलैरपारललितैः शंके कटाक्षैस्ततः
सेयं मे विजने शरण्यरहितं चेतो हठादाहरत् ॥ ३ ॥

(विचिन्त्य) इदं तु पुनरनुपपत्तिदन्तुरितम्। तथाहि—

परममहदाहुरेके परमाणु परे च मन्वते चेतः।
तत्सर्वथापि कथमिव तनुमध्या सा तदेतदाहरतु ॥ ४ ॥

(पुनर्विचिन्त्य) मध्यमपरिमाणं चेति केचिदाचक्षते। तदेवेदानीमस्मासु फलितम्। अथवा—

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चेतो मामकमेतदक्षिसरणेः शीघ्रं तदा निर्गतं
तन्वंग्या नवयौवनादनुकलं तत्तादृशः पुष्यतः ।
अभ्येत्य स्तनकुम्भयोर्नवनवामन्यादृशीमाकृतिं
शंके तत्र तदात्मना परिणमत्सम्मोदते साम्प्रतम् ॥ ५ ॥

(मदनवाधां निरूप्य, साञ्जलिवन्धं मन्मथमभ्यर्थयते)

तानेव स्वदमानचाप भगवन्सञ्चोदयाऽस्मिञ्जने
ये पूर्वं प्रहितास्त्वया दृढमुरस्येणीदृशः सायकाः ।
एवं चेदुभयोर्व्यथा न भविता यस्मादिदं वर्मितं
वक्षोजाद्रियुगेन तत्प्रतिहतेस्ते चाशिताग्रा यतः ॥ ६ ॥

(विचिन्त्य सानुस्मरणं) नन्वधुनैव तन्वंग्याः स्तनात्मना परिणमते चेत इत्यभिहितम् ; यद्येवमतनुरस्त्रैरेतद्बाधेत् । (तादृशं चेतोधैर्यमवलम्बमानः पुनर्विचिन्त्य) तस्मादस्मिन्नेव जने शाताग्रानपि शरान्मुञ्च ।

(इति पञ्चेषुमभ्यर्थयते) भूयोपि विचार्य सविषादं)

एवमपि यदि तदाकृतिरन्तःस्फुरिता तु हन्त विध्येत ; तदिह सर्वथा मदहितसन्धाता हन्तासौ दम्पतिलोकनियन्ता देवः ।

यत्नादुद्धृतमध्यभागमवनौ यद्यैन्दवं मण्डलं
तन्वन्केळिसरः स्रुतैः परिमुहुस्तत्रामृतैः पूरिते ।
स्वच्छन्दं निवसापि पुष्पधनुषः शस्त्राभिघातज्वरः
शाम्येदेष तदा कथञ्चित् (विमृश्य, तापातिशयं निरूपयन्)
अथवा शान्तिं ततो न व्रजेत् ॥ ७ ॥

अयमेव हि मे पुनरसमेषुतापातिशयविनोदनोपायः । एतादृशोपि तावदनुतापविनोदनमीषदपि न तनोतीव । तदसारैरन्यैः किमिह साध्यते ? तथाहि--

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रालेयस्रोतसा किं तनुमिलनवशात्प्रादुरुष्णेन शीघ्रं
भाद्रैर्वा कर्दमैः किं सपदि हृदि परं शुष्कचूर्णायमानैः ।
प्रत्यग्रैः किं मृणालैर्झटिति करतलस्पर्शनान्म्नानिभाग्भिः
हारैस्तारैश्च किं वा श्वसितपरिचितैर्हन्त सद्यः स्फुटद्भिः ॥८॥

अद्य तावदेतादृशोहमतनुशरतापकृताभिषंगः केनोपायेन मनो विनोदयामि ? (विमृश्य) अहो दिष्ट्या गृहीतः परमार्थः । अधुना चिरमन्तरावसन्तं विधुनानात्ववदाननानुबिम्बं कलयन्फलकेलिखामि। कामं सरयं किञ्च मनो विनोदयामि । (दक्षिणाक्षिस्पन्दनमभिनीय । अहो मुहुरपि स्फुरति दक्षिणं चक्षुः । (सानुस्मरणं) तदनेन शुभशकुनेन तस्या वनितामणेरुपमाता, सरयमाकाशयानेन यावदायाति; इह सा प्रतिमावती भगवती । सा च योगिनी सरयमेव योजयति मामन्तरीपान्तरवर्तिन्यापि तया राजन्यावतंसकन्यामण्या । (विचिन्त्य) सवेगमिहागमिष्यति स देवीपक्षपाती कुटीरान्तरंगः सारंगः । तदिदानीमहं जोषंभावमेव संभावयामि । (इति तूष्णीं तिष्ठति; ततः प्रविशति गूढं संभृतचित्रसंभारो विदूषकः; विकटं परिक्रम्य यथोचितमुपविशति) ।

राजा-(स्वं) धनपवनव्याधिनिरवधिनाटितरदनपथोयं मंक्षु किमपि विवक्षुरिव लक्ष्यते । अपि नाम मदनवेदनामिमामेष मामकीनामाक्षिपेत् ?

विदूषकः-(पवनव्याधिपीडित इव चिरेण सविकारं वदति) सहे ! तुह तारिसं धीरं मम्महेण ओधीरिदं विअ दीसइ । णूणं जातरूवाणिबंधना एसा मअणवेअणा । ता एव्व अलं एदाए तिव्थजव्ताए । झव्ति तंजापुरिं एव्व गमिव्सामो ।

(छाया) [सखे ! तव तादृशं धैर्यं मन्मथेनावधीरितमिव दृश्यते नूनं जातरूपानिबन्धनैषा मदनवेदना । तदत्रालमेतया तीर्थयात्रया । झटिति तञ्जापुरीमेव गमिष्यावः ।]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–(स्वं) अयमेव तावदेतत्प्रतारणोपायः। अस्मन्मदनवेदनायां निदानं जातरूपामेव निरूपयामः। (प्र) सखे! सारंग!

पश्यालीको मम हितकृते प्राप्तमद्रावधाक्षीत्
पुण्ड्रेष्वासं द्रुतमितिरुषा भूधरेन्द्रस्य कन्या।
तादृक्षाणामसृजदवनौ तावदद्धा परार्धं
बाधन्ते यत्प्रतिदिशममी बाणवारैरपारैः ॥ ९ ॥

विदूषकः–(साटोपमुत्थाय) सहे! सच्चं किमेदं?

(छाया) [सखे! सत्यं किमेतत्?]

राजा–(सोपहासं) सत्यमेवैतत्।

विदूषकः–तह! एदाणं मम्महाणं पुंडमयकोयंडकीडाबिसखंडं खंडिअ मंखु णिव्सेसं भव्खेमि। सहे! एत्ताहे मह व्पहावेण णिव्विदं लहेहि। (इति परिक्रामति)

(छाया) [तथा! एतेषां मन्मथानां पुण्ड्रमयकोदण्डक्रीडाबिसखंडं खण्डयित्वा, मंक्षु निःशेषं भक्षयामि। सखे! एतावति मम प्रभावेण निर्वृतिं लभस्व।]

राजा–(हस्तमाकृष्य, विदूषकं यथापुरमुपवेशयति)

विदूषकः–(उपविशति)

राजा–(शीघ्रमुत्थायोपविष्टं विदूषकमाकर्षति)

विदूषकः–(उत्थाय) एदिणा णमणुव्णमणेण अव्खराव्भाससमये उवाव्झायकारिदणमणुव्णमणं अणुह्मारिदो ह्मि।

(छाया) [एतेन नमनोन्नमनेनाक्षराभ्याससमये उपाध्यायकारित-नमनोन्नमनमनुस्मारितोऽस्मि।]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–(विहस्य) बालोद्यानमासाद्याशु जातरूपाया देव्या रूपरेखां चित्रफलके विलिखन्मनो विनोदयामि ।

विदूषकः–जं अहिरुइदं महाराजव्स । (खं) गूढं संपदि चिव्तफल अलेहणसंभारं एदं, वालुव्जाणमव्झावव्ठिदव्स दे जाव दंसेमि।

(प्रं) एदु एदु भवं । (इत्युभावपि परिक्रामतः)

(छाया) यदभिरुचितं महाराजस्य । गूढं संप्रति चित्रफलकलेखन-संभारमेतं बालोद्यानमध्यावस्थितस्य ते यावद्दर्शयामि । एत्वेतु भवान् ।]

विदूषकः–एदं वालुव्जाणदुवारं । ता एव्थ पविसामो ।

(उभावप्युद्यानप्रवेशं नाटयित्वा परिक्रामतः)

(छाया) [एतद्बालोद्यानद्वारम् । तदत्र प्रविशावः]

विदूषकः–णं एव्व उव्जाणमव्झालंकरणं चन्दअंतसिलासीकरावसि-सिरंतं णिरंतरदिव्णसौव्खं चउव्खं । ता एव्थ उपविसामो (यथोचितमुपविशतः) ।

(छाया) [एनमेवोद्यानमध्यालंकरणं चन्द्रकान्तशिलाशीकरावशि-शिरान्तं निरन्तरदत्तसौख्यं चतुष्कम् । तदत्रोपविशावः]।

विदूषकः–(खं) एदं समव्गसंभिदचिव्तफलयविलेहणसामव्गिं या जिदो एव्व दे पदिसेमि ।

(छाया) [एतां समग्रसंभृतचित्रफलकविलेखनसामग्रीं याचित एव ते प्रदिशामि ।]

राजा–(साञ्जलिबन्धं विधिमभ्यर्थयते)

तस्या रूपमहं लिखामि सुदृशस्तत्तादृशं साम्प्रतं
पाणौ साधु विधे विधेहि भगवन्सान्निध्यमस्मिन्नतः ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रेयो मे भविता तवाप्यपयशः प्रायो न भूयादिदं
सर्वोत्कृष्टगुणा घुणाक्षरनयात्त्वत्सृष्टिरासीदिति ॥ १० ॥

(विमृश्य) अयं च पुनरदसीयरूपरेखाविलेखानुरूपवर्णसंभारे संभाविते; विचारः। तथाहि—

श्यामाकामुकमण्डलं पृथगथ श्यामं च तल्लाञ्छनं
चाञ्चल्येन विनाकृतश्च मथितं किञ्च द्रुतं विद्रुमम्।
चूर्णीकृत्य सुधारसेन सुतरामेतानि चेत्संभृता-
न्यस्या रूपकलां कथञ्चिदखिलां शक्नोमि तां लेखितुम् ॥११॥

(भूयोपि विचार्य) संभाविते वा कथमपि वर्णसंभारे तादृशे! वितथ एव मे मनोरथः। यदिदानीम्—

स्मृता चेत्सा तन्वी स्थगयति दृशावश्रुलहरी
न तन्मार्ष्टेरीष्टे कथमपि शयः स्तम्भवशतः।
अथापि प्रोन्मार्जन्हरहर निजस्वेदसलिल-
प्रवाहैस्तामाशु प्रथयति च कम्पं च भजते ॥ १२ ॥

अपि च;

दृष्टि र्मानसमप्यहो मम यदा दृष्टा चकोरेक्षणा
तामेवाश्रयतस्तदाप्रभृति तद्गात्रानुषंगेण ते।
संप्राप्याशु कृतार्थता नहि पुनः स्पर्ष्टुं च मा वाञ्छितः
पौरस्त्येपि यतो न वस्तुनि मितिर्नैवानुभूते स्मृतिः ॥१३॥

(धैर्यमवलम्बमानः) भवतु; सखे! सारंग! प्राकृतं वा वर्णसंभारं संभर ससंभ्रमम्। कथञ्चिदपि सकिलिकिञ्चितं देव्या दिव्यामाकृतिं फलकान्तरे विलिखामि।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विदूषकः–(शंखधवळितपटस्निग्धं फलकं, वर्णभेदान्, तूलिकाश्च ददाति)

राजा–चित्रफलकलेखनसामग्री कथमचिरेण संपादिता भवता ?

विदूषकः–(सोत्प्रासं) मह तारिसब्राह्मणव्वणाणुहावेण आसु एसो सम्पादिदो चिव्तफलअलेहणसंभारो। ता तुवरेदु चिव्तफल अविलेहणे जणेसरो।

(छाया) [मम तादृशब्राह्मणत्वानुभावेनाश्वेष सम्पादितश्चित्रफलक-लेखनसंभारः। तत्त्वरतु चित्रफलकविलेखने जनेश्वरः।]

राजा–(प्रमाणरेखां चित्रफलकमध्ये, ऋजु विलिख्य, किमपि मन्त्रयमाण इव तिष्ठति)।

विदूषकः–सहे! एव्वाहे चिव्तावव्खेवेण चिव्तलेहकरणे अव्थभवंवि किं विलम्बेदि ?

(छाया) सखे! एतावति चित्तावक्षेपेण चित्रलेखकरणे अत्रभवानपि किं विलम्बयति ?]

राजा–(विहस्य) वयस्य! किं न जानासि ? प्रतिप्रतीकं प्रमदाशिरो-मणेरवेक्ष्य, रूपातिशयं मनोरमं निरूप्य, विलेखनीया खलु सा; विचार्यतां; अकाण्ड एव त्वरयस्यहे! कथम् ?

विदूषकः–(सोत्प्रासं) महाराय! जदाणिं तुह ताए विलोयणं होदि; किं विलेहेण ? सुरसरिअं समुवेदो मिअदिण्हिआं कोणु पेव्खेदण्हो।

(छाया) [महाराज! यदानीं तव तस्या विलोकनं भवति; किं विलेखेन ? सुरसरितं समुपेतो मृगतृष्णिकां को नु प्रेक्षेदह्नः ?]

राजा–(सरोषं) कथमाभासं विभाययसि ? मे भावमन्यथाकारम्। मनोगताया एव सुतनोर्चिंतनोमि रूपरेखामात्रकाम्। (इति तां चित्रफलके लिखन्स्वकरमभ्यर्थयते)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नियोक्ष्ये त्वां रूपं कर विलिखितुं नीरजदृशः
विलिरव्यैतत्सद्यो वितर भुवि मे जीवितकलाम् ।
अतो भूयः श्रेयस्तव हि भविताऽनन्यसुलभं
परिष्वङ्गादस्याः फलति सति भाग्ये मम शुभम् ॥ १४ ॥

(किञ्चिद्विलिखन्स्पर्शं श्रुतिं चामिनीय, सोद्वेगं तूलिकां भूमौ विक्षिप्य)

स्पन्दन्ते मकरन्दशीकरहराः पार्श्वे समीरांकुराः
संधीभूय विवृण्वते मधुलिहः संगीतभंगीं क्वचित् ।
दत्वा किञ्च कुहापि चञ्चुविधृतं दष्टावशिष्टं बिसं
कोकाः स्वप्रमदासु ते रतिकृते कोलाहलं कुर्वते ॥ १५ ॥

तदिह ममैकाग्रता मनसः कथं भवतात् ?

विदूषकः—सरदाअमणिरंतरविअसंतविविहपाअवणिवहसंपुण्णे इमस्सिं लीलारण्णे उवविसिअ, अरविंदकन्दोट्टसंदोहमअरंदवहणमंद-संचरणफलभाहपवणपरिव्फंदणं, भमलकुलकलअलं, रतिविर-हासहचक्कवाअसमवाअव्ववाअसंभमविजिंभिअबहलकोलाहलं वि कहं णिवारेदुकामोसि? ण खु एदे तुह विरहवेदणं जाणंदि । ता जाणेमि जणेसर! अव्तणो वअणे चउरव्तणं णरवर! तुमं दंसेसि ; ण उण चिव्तविलेहणे ।

(छाया) [शरदागमनिरन्तरविकसद्विविधपादपनिवहसंपूर्णे, अस्मिँल्ली-लारण्ये, उपविश्य, अरविन्दकान्तोष्ठसन्दोहमकरन्दवहन-मन्दसञ्चरणफलभागपवनपरिस्पन्दनं भ्रमरकुलकलकलं रति-विरहासहचक्रवाकसमवायव्यवायसंभ्रमविजृम्भितबहळको -लाहलमपि कथं निवारयितुकामोऽसि? । न खल्वेते तव विरहवेदनां जानंति । तज्जानामि जनेश्वर! आत्मनो वचने चतुरत्वं नरवर! त्वं दर्शयसे, न पुनश्चित्रविलेखने ।]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–वयस्य! मे वचनेप्येवमेव न चातुर्यम् ।

तामिन्दुबन्धुवदनां मदनांकमीन-
सच्छात्रनेत्रकमलामबलामतल्लीम् ।
आलोक्य कातरतया कतमामपि द्रा-
गापं यतस्तिमितवाग्विभवामवस्थाम् ॥ १६ ॥

(इति प्रियतमास्मरणेन दीर्घमुष्णं च निश्वसन्नर्धनिमीलितलोचन. स्तंभं नाटयति)

विदूषकः–(स्वं) पसंगंतरसंपादणेन विह्मारयिव्वए विभू पिअदमावु-व्वंतं एव्व सुमरिअ, दुव्विणवारं मणोविआरं समुवेदो वयव्सो । का गई? कतरेण वि णव्मवअणोवव्णासेण दे मणोविणोदणं करेमि । (पुं) विविहविव्जाणिडणविबुहसमव्जाए वअणमुव्द-णव्पदाणचणोवि तुमं, एण्हिं मह सव्णिहाणे वअणणिवहं धारेसि । ता तुवव्तोवि मे सव्चं अहंडिअं पंडिव्चं ।

(छाया) [प्रसंगान्तरसम्पादनेन विस्मृतये, विभुः प्रियतमावृत्तान्तमेव स्मृत्वा, दुर्निवारं मनोविचारं समुपेतो वयस्यः का गतिः? कतरेणापि नर्मवचनोपन्यासेन ते मनोविनोदनं करोमि? (पुं) विविधविद्यानिपुणविबुधसमाजे वचनमुद्रण-प्रदानचणोपि त्वमिदानीं मम सन्निधाने वचननिवहं धारयसे । तस्मात्त्वत्तोपि मे सत्यमखण्डितं पाण्डित्यम् ।]

राजा–(विहस्य) वयस्य! नायं दुःखभावः । यन्नर्मसमये चतुरवचन-निर्माणकौशलप्रदर्शनम् । भवतु; अवशिष्टं लिखामि । (इति तूलिकामवष्टभ्नाति)

विदूषकः–(चित्रफलकमुन्नम्य प्रदर्शयन्) वयव्स पेव्ख । किं व एव्थ लिहिदं? किं व अवसिव्ठि?

(छाया) [वयस्य! प्रेक्षस्व । किं वात्र लिखितं? किं वावशिष्टम्?]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–(विहस्य, चित्रफलकमादाय) (सविमर्शम्)

कैश्यं केकिकलापदेश्यमलिकं चन्द्रार्धसामाजिकं
नेत्रं नीलसरोजमित्रमधरं बिम्बीफलैः सोदरम् ।
बाहे बल्लिमदासहे कुचभरौ खर्वीकृतोर्वीधरौ
पद्मौपम्यपदं पदन्तु पुरतः किं वा लिखेयं सखे ! ॥ १७॥

विदूषकः–सअं एव्व तव्कमं वदंतोवि भवंतो किंति मं पुच्छदि ; सो एव्व व्कमो, जो वयव्सेण उवव्णव्थो ।

(छाया) [स्वयमेव तत्क्रमं वदन्नपि भवान्किमिति मां पृच्छति ? स एव क्रमो यो वयस्येनोपन्यस्तः ।]

राजा–(साभ्सुपगमं) तथा । (इति कवरीं विलिख्य, कुटजगर्भकं विलिखितुं तत्र विशदरेखां विरचयति)

विदूषकः–सहे सामि पलिदो किं वि अदमाए केसपासो ?

(छाया) [सखे सामि पलितः किमप्यमुष्याः केशपाशः ?]

राजा–(सस्मितं) वैधेय ! तदिदमवधेहि कुटजगर्भकम् । (मुखे विलिखितं लोचनमवलोक्य, तद्विलासनं च स्मृत्वा) (स्वं)

कर्णोल्लंघनजांघिकीमिह दृशं कान्तामणेस्तादृशं
पाणिर्मे विलिखन्नयं सफलकः प्रायेण जातः कृती ।
चेतस्त्वं च निधाय तद्विलसितं तस्मिंश्चिरं सञ्चितं
जीयाः क्लिश्यति किं तदेतदथवा त्वत्स्वल्पताचेष्टितम् ॥ १८ ॥

विदूषकः–वयव्स ! अव्णं णयणं कव्णं वि विलेहिदुं विसुमरिअ किं विआरेसि ?]

(छाया) [वयस्अ ! अन्यन्नयनं कर्णमपि विलेखितुं विस्मृत्य किं विचारयसि ?]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा–कथं मुखस्यैकस्मिन्नेव पार्श्वे श्रवणद्वयं नयनद्वयं च शक्यते लिखितुम् ?

विदूषकः–ता पासंतरे ताइं वि किं विलिहिदाइं ?

(इति चित्रफलकं व्यत्यस्य पश्यति)

(छाया) [तत्पार्श्वान्तरे तान्यपि किं विलिखितानि ?]

राजा–(प्रहस्य) सौतधलविविधमणिभक्तिष्वनेकेषु एकपार्श्वचित्रं शश्वदपि पश्यन्कथमेवं पृच्छसि ?

विदूषकः–अवरेण विअ महाराएण तुए वि किं एव्वितअं एव्व लिहिदव्वं ?

(छाया) [अवरेणेव महाराजेन त्वयापि किमेतादृशमेव लिखितव्यम् ?]

राजा–एवं हि नाम सारंग ! बुद्धिसारं गतोसि। अलमियता दुर्विकल्पजल्पनप्रागल्भ्येन। किं बहुना : आविलेखनमनाविलेन भवता भवितव्यम्। इदमेव हि मे भूयःश्रेयसे।

विदूषकः–एस तुण्हिक्को होमि। (इति करद्वयेनास्यमपिधाय पश्यंस्तिष्ठति)

(छाया) [एष तूष्णीको भवामि।]

राजा–(कर्णं विलिख्योरसि स्तनौ विलिखन्)

स्तनौ तस्यास्तन्व्यास्तरुणिमवयोवैभवजुषः
तदा धत्तः कार्ष्ण्यं दिनमधिमुखं चूचुकमिषात्।
अहं वक्षो व्याप्नोम्यहमिति रुषान्योन्यमपि ता-
विदानीं तु व्याप्तौ कियदिति न जाने विलिखितुम् ॥ १८ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(विचिन्त्य) तथापि दर्शनसमयसमुन्मिषितपरिमाणावेव स्तनौ विलिखामि । (इति स्तनौ विलिख्य ; विलिखितौ बाहू विलोकयन् ; स्वगतम्)

एषा सा युगळी बाह्वो र्या नखाहतिकौशलात् ।
अचेतनां विपश्चीमप्यतानीदतिरागिणीम् ॥ १९ ॥

(विलिखन्तं पाणिं विलोकयन्) (स्वं)

वदनं गळमपि बाहू करयुग्ममुरोजकुड्मलौ पाणे ।
विलिखन्नधिकश्रान्तो वियदुपमे मध्यमे समाश्वसिहि ॥ २० ॥

(विचिन्त्य) तथापि न कथं विलेखनीया रोमावळी !

(भूयोपि विचार्य) प्रथममेव लिखितया सर्वत्रापि वर्णविन्यसनेन तिरोभूतया, परमविलेखनादत्र लक्ष्यमाणया प्रमाणलेखयैव सेयमन्यथासिद्धा । (स्वं)

गच्छन्त्याश्चरमांगकं मृगदृशः कान्तं यदालोकयन्
प्रातःकालदळत्सुवर्णकदळीपत्रोपमाभाजनम् ।
तस्या व्यस्मरमाभिमुख्यमपि हा तस्मिन्क्षणे तत्क्षणं
हित्वा तादृगिहालिखामि फलके यत्नेन किं वापरम् ॥२१॥

(विचिन्त्य) भवतु ; तथाप्यत्र प्रस्तुतैकपार्श्वचित्रविलेखनसंविधानानुगुणं नितम्बबिम्बमारभ्य पादारविन्दपर्यन्तं विलिखामः ।

(तथाकृत्वा) (लिखितं चरणद्वितयमालक्ष्य, स्वगतम्)

एतत्तदेव चरणद्वितयं यदीय
सौवर्णनूपुररवः श्रवणावतीर्णः ।
तस्यास्तदोपवनसीम्नि तिरोहितायाः
सान्निध्यसौख्यमकरोत्प्रदयं मुहूर्तम् ॥ २२ ॥

सखे ! सारंग ! पश्य कथमेतत् ? (इति पृच्छति)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विदुषक :-(चित्रफलकं विलोक्य, भूमौ विलिखति)

राजा-(विलिखितं चिरं निध्याय) अष्टादशस्वपि लिपिषु न कुत्रचिदेवं-विधां लिपिमवधारयामः। तथापि वयमिच्छालिपिग्रहणचातुरीमेवावलम्ब्य वाचयामः। (वाचयति) अहो वयस्यस्यापि मोहोदयः! यदेकपार्श्वचित्रानुगुणमेकमेव श्रोत्रं नेत्रं च विलिख्य, तदननुगुणमेव भुजयुगळं कुचद्वितयं चरणद्वितयं च फलके विलिखितम्; यावदिदं सुष्ठु विलिखितं पश्यामि तावदहं जोषंभावमेव संभावयामि।

राजा-(विहस्य) अयमेव पुनरेकपार्श्वचित्रविलेखनक्रमः। तदिह वैधेय! न विधेहि मौनमुद्राम्।

विदूषकः-(चित्रमवलोक्य साश्चर्यं)

कत्थूरीतिलअं णिडालसुसमारोहाय कायज्जुइं
कुप्पासो वद साहरेइ सरिदो भूसाहिताए सहे।
ताएदे हि विभूसणे हि वदकिं तण्णीमणीए भवे (विचार्य),
ताणं एव्व विभूसणाण्णियदिसिद्धं तवव्साहलं॥ २३॥

(छाया) [१]

(नासिकां निर्दिश्य) नासाभरणशुण्णा इयं णासिआ दीसइ। ता विलिहेहि सहे णासाभरणमुव्ताहलम्।

(छाया) [नासाभरणशून्येयं नासिका दृश्यते। तद्विलिख सखे! नासाभरणमुक्ताफलम्]

राजा-सारंग! किमनया वैकल्यशंकोद्भावनया? अवलोकय तदिदं विलोचनलोभनीयविविधभावरसभावनातिविचित्रं प्रियायाश्चित्रम्।

(अंगुल्यग्रेण तस्या दृशं निर्दिशन्)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सैषा चलेव निभृतेव शनैस्ततेव
तावत्स्पृहेव चतुरेव समन्मथेव ।
लज्जावतीव चकितेव रसालसेव
चित्रं प्रतारयति चित्रगतापि दृष्टिः ॥ २४ ॥

(मुखं निर्दिश्य)

अनिर्वाच्यं लज्जामयितमिव शृंगारशबलं
समिन्धे तद्वक्त्रं शशधरमहोवञ्चकमहो ।

(स्तनौ निरूप्य)

स्तनद्वन्द्वं चित्रे लिखितमपि तन्व्या नवनवं
तदेतद्वैशाल्यं दधदिव विभाति प्रतिकलम् ॥ २५ ॥

(पादौ निर्दिशन्)

पादौ विलोकय सखे फलके किमन्य-
दाभ्यामियं विलिखिताप्यभिगच्छतीव ।

किं बहुना ;

हा हन्त सारसनहंसकशिञ्जितेन
भूयः पुरेव परिपूरयतीव कर्णौ ॥ २६ ॥

विदूषकः—(विलिखितं चित्रमुत्कीर्णमानं राजानं चावलोक्य) (स्वं) एसा अण्णा एव्व योसा रण्णा दाणिं विलिहिदा । ण दाव जाद-रूवा देवी । एसो हदासो बह्मणो इमिणा जणाहिणाहेण समं पदारिदो । 'विण्णा पच्छिमबुद्धिणो' त्ति आहाणओ मयि एव्व फलिदो । तर (पुरा) वारिखंडिअनक्कपिचंडनिग्गदं णासाहरणसमुग्गअं आसादिअ, केणवि असरीरिवअणेण सिह्म-ळदीवं तिव्थजत्ताव्वाजेण गमिउण, मं तव्थ वणे ताए अंगीकिदं संगीदं दीवांदरगदकोइलवाणीए विलासोत्ति पदा रिअ, तेण एव्व संगीदमग्गेण गच्छंतो ; णूणं दिव्वं वहूं एव्व

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पुरा पेक्खइ णरणाहो। तण्णिबंधणा एव्व एसा मअणवेअणा। जादरूवाणिमित्तेत्ति संवरणं एदं। तदनुरूवं एव्व; मए अभिहिदोवि दाणिं णासाहरणं ण लिहिदं। कदा व एदं वुत्तंतं जादरूवाए देवीए णिवेदइस्सं? होदु; एव्वं दाव। (प्र) तुह लेहणचउरत्तणाणुहावेण एसा जादरूवा अण्णा-विअ देवी दीसइ।

(छाया) [एषाऽन्यैव योषा राज्ञेदानीं विलिखिता। न तावज्जातरूपा देवी। एष हताशो ब्राह्मणोऽनेन जनाधिनाथेन समं प्रतारितः। 'विप्राः पश्चिमबुद्धय' इत्याभाणको मय्येव फलितः। तरवारिखंडितनक्रपिचंडनिर्गतं नासाभरणसमुद्रकमासाद्य, केनाप्यशरीरिवचनेन सिंहलद्वीपं तीर्थयात्राव्याजेन गत्वा, मां तत्र वने तयाङ्गीकृतं संगीतं द्वीपान्तरगतकोकिलवाण्या विलासइति प्रतार्य, तेनैव संगीतमार्गेण गच्छन्; नूनं दिव्यां वधूमेव पुरा प्रेक्षते नरनाथः। तन्निबन्धनैवैषा मदनवेदना। जातरूपानिमित्तेति संवरणमेतत्। तदनुरूपमेव; मयाभिहितोपीदानीं नासाभरणं न लिखितम्। कदा वैतं वृत्तान्तं जातरूपायै देव्यै निवेदयिष्ये? भवत्वेवं तावत्; (प्र) तव लेखनचतुरत्वानुभावेनैषा जातरूपाऽन्येव देवी दृश्यते]।

राजा–(स्वं) अगण्यलावण्यमहिमानमालक्ष्याशु पक्ष्मलाक्ष्या यथाजातोप्येष जातरूपेति; धिषणामुत्प्रेक्षते। अहो! लावण्यातिशयो रमण्याः। अतः केनाप्युपायेनाहमेनमितः क्वापि निष्कासयामि। (पुं) वयस्य! पश्य तावदम्बरमध्यमध्यासीनो भगवानम्भोरुहिणीपरिणीः। तदिह प्रवहन्तीं सह्यसुतामवगाह्य, निर्वर्तितमाध्यन्दिनसन्ध्योपासनाश्चित्रान्नपरमान्नसूपापूपाज्यशर्करामुख्यान्विविधभक्ष्यवर्गान् यथाभिमतमभ्यवहर।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विदूषकः-(खं) एसा जादरूवा देवी, अण्णा वा होदु; एत्थ किमणवत्थविआरेण ? अहं दाव पिट्ठोट्ठपज्जंतं मिट्ठण्णं जहेट्ठं भक्खेमि। (पूं) जह अहिरुइदं पिअवयस्सस्स। (इति निष्क्रान्तः)

(छाया) [एषा जातरूपा देव्यन्या वा भवतु; अत्र किमनवस्थविचारेण ? अहं तावत्पृष्ठोष्ठपर्यन्तं मिष्टान्नं यथेष्टं भक्षयामि। (पूं) यथाभिरुचितं प्रियवयस्यस्य।]

राजा-अद्यापि रयादाकाशयानमासाद्याशु कथन्नायातवती प्रतिभावती ? (इति चिन्तामभिनीय चित्रमालोकयंस्तिष्ठति)

(ततः प्रविशत्युद्यानपालः)

उद्यान-महाराअ! विजयी होहि। एदस्स बालुज्जाणस्स दुवारे कावि जोइणी सीसाए सहिदा आगदा। एसा तुह दंसणं अहिलसदि।

(छाया) [महाराज! विजयी भवस्व। एतस्य बालोद्यानस्य द्वारे कापि योगिनी शिष्यया सहिताऽऽगता। एषा तव दर्शनमभिलषति।]

राजा-(खं) एषैव प्रतिभावतीति मे प्रतिभाति। (पूं) अयि! माणवक! तामाशु प्रवेशय।

माणव-जं देवो आणवेदि (इति निष्क्रान्तः)

(छाया) [यद्देव आज्ञापयति]।

राजा-(चित्रफलकमाच्छाद्य धैर्यमवलम्बमान इव तिष्ठति)

(ततः प्रविशति ताभ्यां सह माणवकः)

माणव-इदो महाराओ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [इतो महाराजः] ।

राजा–(आयन्तीं प्रतिभावतीमालोक्य ; स्वं)

स्वेच्छाचारकृते पदोर्मणिकृते संबिभ्रती पादुके
पाणौ वेत्रलतां च भस्मघुटिकां मायाप्रयोगोचिताम् ।
प्रौढाकर्षणमूलिकावलयितं बाहौ च लोहाङ्गदं
फाले भूतिसिते च वश्यविधये स्पष्टं मषीचित्रकम् ॥ २७ ॥

रुद्राक्षदामकृतकञ्चुकलोलशैव-
सूत्रानुबन्धशिवलिंगसमुद्गकेयम् ।
प्राप्ता मदीयसविधं प्रतिभावती सा
कापालिकी तनुमतीव कला चकास्ति ॥ २८ ॥

प्रतिभा–(उपसृत्यैकहस्तं विस्तार्य) चिरं जीव महाराज ! चिरं जीव ।

राजा–(सस्मितं) अपि कुशलं तत्रभवत्याः प्रतिभावत्याः ?

प्रतिभा–(स्वं) अहो ! सर्वसहाधिपतेरस्य सार्वज्ञ्यम् । यदयमश्रुत-पूर्वस्तथापि मम नाम जानाति । (प्रं) (सस्मितं) वत्स महाराज ! सम्प्रति तव दर्शनातिशयेन ।

राजा–(उपविशेति स्थलं निर्दिशति)

प्रतिभा–वत्से योगविद्ये ! विस्तारय कृष्णाजिनम् ।

योग–(विस्तारयति कृष्णाजिनम्)

प्रतिभा–(नाट्येनोपविशति)

राजा–अपि नाम कुशली विजयकेतुनामा सिंहळद्वीपसुत्रामा ?

प्रतिभा–(आश्चर्यस्तिमिता (स्वं) न परं मम नामधेयमेवायं जानाति ; किन्तु समस्तमपि वृत्तान्तं ; यस्मादस्मत्पक्षपातिनं सिंहळ-

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

द्वीपाधिपालं विजयकेतुं पृच्छति । (पुं) (विचार्य) कुशली स पुरा भवति क्षोणीपरिणीरितो विजयकेतुः: तुभ्यं दत्वा दुहितरमनुरूपायावनीन्द्र! चन्द्रकलाम् ।

राजा–(स्वं) हृदय! समाश्वसिहि ।

या दुर्लभेति तृषितं हृदयाक्षिपं त्वां
सेयं त्वयाद्य सुलभेति विचिन्तयेथाः ।
सम्प्रार्थितेव बत मां स्वयमेव तस्याः
पाणौकृतौ त्वरयति पतिभावती यत् ॥ २९ ॥

प्रतिभा–(कर्णालम्बितां स्फटिकाक्षमालामवलम्ब्यार्धनिमीलितलोचना जपति)

योग–अव्य महाराअ! झत्ति अव्वव्व पेसय एणं उव्जाणपालअं ।

(छाया) [आर्य महाराज! झटित्यन्यत्र प्रेषयैनमुद्यानपालकं]

राजा–माणवक! त्वं तावदस्य बालोद्यानस्य द्वारे स्थित्वा, ममान्तरंगं सारंगमपि न प्रवेशय ।

माणव–जं अव्यो भणदि (इति निष्क्रान्तः)

(छाया) [यदार्यो भणति]।

योग–अव्व! सकलकलाकुसल! रहुणाहणरवाल! एसा मह भअवदी पडिहावदी महाणुहावा । तहहि; एसा हिमवन्तसिहरे संतदसिसिरे सहव्ससंवच्छलपव्जंतं कावालिअव्वदं अवलम्बिअ पुरा हि पुराहियादिं आराहिदवदी भअवदी । तदो भअवं विणदाभयदाणो ईसाणो पसव्णो भविअ; अदिमाणुसं सुआआसयाणादिसु कोसलं परिससव्ज ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [आर्य! सकलकलाकुशल! रघुनाथनरपाल! एषा मम भगवती प्रतिभावती महानुभावा। तथाहि; एषा हिमवच्छिखरे सन्ततशिशिरे सहस्रसंवत्सरपर्यन्तं कापालिकव्रतमवलम्ब्य, पुरा हि पुराभियातिमाराधितवती भगवती। ततो भगवान्विनताभयदान ईशानः प्रसन्नो भूत्वाऽतिमानुषं सुखाकाशयानादिषु कौशलं परिससर्ज]।

राजा–अये योगविद्ये! तर्हि किमनेन पादुकादिवहनेन?

योग–अय्य महाराअ! भवंतेण समं आसंकिदम्। इमाओ जहेच्छसंचरणक्कमीणमणिपादुआओ, विविहमायाप्पयोआणुउणव्वेत्तलअं, भसिअघुडिअं, विअव्ढजणाकव्ढणमूलिआकलिदं लोहकेयूलं, सअलवसीकरणकारणं निरञ्जणमञ्जणं, अव्णाओ तारिसीओ महोसदओवि, पसिद्धा ण वावि दे सिव्धा भअवदीए, सीसव्तणेण दव्तवं; ता एसा तेसु अणुव्गहं कुणिदुं एदाइ दाव णिजदेहे वहेदि।

(छाया) [आर्य महाराज! भवता सममाशंकितम्। इमे यथेच्छसञ्चरणकर्मीणमणिपादुके, विविधमायाप्रयोगानुगुणवेत्रलता भसितघुटिका, विदग्धजनाकर्षणमूलिकाकलितं लोहकेयूरं सकलवशीकरणकारणं निरञ्जनमञ्जनं, अन्यास्तादृश्यो महौषधयोपि, प्रसिद्धा न वापि; ताः सिद्धा भगवत्यै शीर्षत्वेन दत्तवान्। तदेषा तेष्वनुग्रहं कर्तुं, एतानि तावन्निजदेहे वहति]।

राजा=सत्यमेवैतत्; माहानुभावा खल्वियं प्रतिभावती। ततः....

योग–(वक्तुमिच्छति)

प्रतिभा–(श्रुतिमभिनीय सोद्वेगं) हन्त चिरन्तनाभ्यासो न जानाति समयविशेषम्। (इति जपमुपसंहरति)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

योग–रूवं एदमहो हसेइ मअणं खंधेययं दे विहो
पंडिच्चादिसयो कलासु धिसणं बाहेइ धीरं इमं ।
गव्वं दिव्वमहीहरव्स इमिणो गंभिव्जमम्भोणिहिं
पच्चक्खाइ इयं धुणोइ च रविं बाहा महव्संपआ ॥ ३० ॥

(छाया) [रूपमेतदहो हसति मदनं स्कन्धेयकं ते विभो
पांडित्यादिशयः कलासु धिषणं बाधते धैर्यमेतत् ।
गर्वं दिव्यमहीधरस्यास्य गांभीयमम्भोनिधिं
प्रत्याख्याति इयं धुनोति च रविं बाहा महस्सम्पदा ॥]

ता एदारिसं महाणुहावं तुमं पेक्खंतिए एदाए अव्णव्थ मणव्पवुत्तिं ण होइ; तह वि से चिरन्तणव्भासेण मणो एव्थ वि अव्ज जव्पराय्णो होव्ज; किं अव्णव्थ वव्तव्वं ?

(छाया) [तदेतादृशं महानुभावं त्वां प्रेक्षन्त्या एतस्या अन्यत्र मनः प्रवृत्तिर्न भवति; तथाप्यस्याश्चिरन्तनाभ्यासेन मनोत्राप्यद्य जपपारायणमभूत्; किमन्यत्र वक्तव्यम् ?]

राजा–अथ किम् ।

प्रतिभा–सर्वानप्यवनीभृतो विदळयन्सर्वंसहामेकलः
धीरोयं वहतीति तद्भृतिकृतो दिश्या गजेन्द्रा भिया ।
लोकालोकशिलातलार्पितमहाजैत्रांकनं घर्षण-
व्याजेनादधते कपोलफलके दानाम्बुजम्बालिते ॥३१॥

अपि च;

पाशं धर्ममहो विदार्य जनकादासादिता सा धरा-
प्राप्ता कश्चन कालमेव सहितेत्यालोच्य किं राघवः ।
भूयः सोयमिहावतीर्य कुतुकी भूमौ यदीयाकृतिः
धर्मं शैवमये कुलागतमवन्कीर्तिं विभार्ति ध्रुवाम् ॥ ३२ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

रघुनाथनिभः सोयं रघुनाथजनाधिपः ।
अवनेरपरः साक्षादवने द्विभुजो हरिः ॥ ३३ ॥

राजा–(लज्जावनम्रितमुखो हारतरलं परामृशति) ।

प्रतिभा–तदेतादृशस्य महाभागस्य समीपे मयापि जोषंभाव एव सम्भावनीयः । यतः—

लघुना वचसा युक्ता रघुनाथमहीपतेः ।
अशेषं सद्गुणान्वक्तुमशेषं नावनावहम् ॥ ३४ ॥

अयि सरले! तदिह भवत्याः का कथा व्यवहारस्य ? भवतु; तथापि वत्सायास्तस्या नियोगमशून्यं विधास्यामि ।

योग–जं अहिरुइदं भअवदीए ।

(छाया) [यदभिरुचितं भगवत्यै] ।

प्रतिभा–जाने तं भूमिजाने तव पितरमहं प्रत्यहं यत्करोद्य
आनादानाम्बुधारातातिभिरातितरामम्बुधिर्जृम्भमाणः ।
आलिंगन्भंगसंघैः सकलमनुकुलं द्वीपमम्भोदुरापं
संवर्तारम्भनृत्तार्भटिपटिमविधानैकधास्मारयन्माम् ॥ ३५ ॥

राजा–(स्वं) एषा पुनरन्यवर्णनव्याजेन कल्पान्तोप्यालोकित इति सूचयति । (प्र) ततः;

प्रतिभा–चिनचेव्वयाच्युतधरासितद्युतिः
सहितो बलेन स विलंघ्य सागरम् ।
विमतैः पुरा विजयकेतुमावृतं
दययैव तत्क्षणमरक्षदक्षतम् ॥ ३६ ॥

स तु विजयकेतुरच्युतभूतलवलद्विषमुपेत्य तदा हर्षलचित्तवृत्तिः, प्रत्यज्ञास्त कृतज्ञावतंसः ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तनूभुवे तव वसुधासुधारुचे! रयेन संप्रति रघुनाथभूभुजे।
ददामि माधववरदानसंभवां सुतामिमां विजितसुरांगनामिति ॥३७॥

अधुना तु विधिना; तुभ्यमकांडएव रत्नकरण्डकमुपहरता, रत्नाकर-मयत्नादेव समुत्तार्य तत्तादृशं सुदृशं दर्शयता, तत्तातस्य विजयकेतो-रानुकूल्यमाचरितम्। ततः प्रभृति—

हृदि हिमजलैः तन्व्यास्सिक्तिर्हिताय सखीजनैः
न वहसि वसन्त्रत्याः पत्युर्नरेन्द्र शरज्वरम्।
किमिदमुचितं दीनत्राणेन कीर्तिधरस्य ते
निबिडविपदस्तस्याश्चित्ते निगूहनकौशलम् ॥ ३८ ॥

हा हन्त हर्म्यशिखरे हरिणेक्षणा सा
नीहारहारधवळा नितरां कृशांगी।
इन्धे गवाक्षगतिरेककलावशिष्टा
चान्द्रीव मूर्तिरधुना चलितुं न शक्ता ॥ ३९ ॥

अतिपांडुतामदयवा वधूमणे-
स्तदहन्यथापि बत हस्तयोर्द्वयी।
न जहाति पाटलरुचिं नवाहृतैः
बिसकंकणैरिव भृशं नियन्त्रिता ॥ ४० ॥

तस्या विलासतळिमप्रसवैः सदृश्यो-
लग्ना मृदो वपुषि हन्त लसन्ति रेखाः।
त्वद्रूपधेयविभवस्तवमत्सरेण
पुष्पेषुणेव कृतभूरिशरक्षतानि ॥ ४१ ॥

पुरा नीत्वा कार्श्यं पुनरनुशयात्पूर्यत इव
प्रसूनास्त्रेणैषा बत समुचितैः कारणगणैः।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रवालैरम्भोजैः प्रसवविसरैः मौक्तिकसरैः
मृणालै रम्भाणां मृदुभिरपि कांडैरुपगतैः ॥ ४२ ॥

(दीर्घमुष्णं च निश्वस्याश्रूणि मुञ्चन्ती, सगद्गदमाकाशे लक्ष्यं बद्ध्वा)

हा वत्से! चन्द्रकले! प्रतिभावतीबहिश्चरप्राणायिते! पञ्चशरसञ्जीविनि! विजयकेतुकुलपताके! कथमेतादृशीमतिदीनदशामनुभवसि?

योग–(वल्कलाञ्चलेनाश्रुवृष्टिं परिमार्ष्टि) ।

राजा–(स्वं) अहो वत्सलता भगवत्याः ।

प्रतिभा–(सगद्गदं) किं बहुना;

क्षामक्षामतनु र्व्यलोक्यत पुरा कामप्पवस्थां गता
तन्वाना निजमंगुळीयकमियं तन्वी महत्कंकणम् ।
शान्तं पापमितः करोति तदिदं सा किञ्च बाहांगदं
तन्मत्वा रघुनाथभूप कृपया तस्याः प्रसीदाधुना ॥ ४३ ॥

योग–(जनान्तिकं) भअवदि पडिहावदि! एसो पडिहादि, आरोविदधीरो विअ जणेसरो ।

(छाया) [भगवति प्रतिभावति! एष प्रतिभात्यारोपितधैर्य इव जनेश्वरः] ।

प्रतिभा–वत्से! सम्यगुपलक्षितं भवत्या । संप्रति हि;

प्रविष्टे वृत्तान्ते श्रवणसरणौ पद्ममित्रेक्षणायाः
स्फरत्यंगे सद्यः पुळकपटळी भूतलाखंडलस्य ।
कदुष्णो निश्वासो मुहुरपगतान्घर्मबिन्दून्विधत्ते
तथाप्यस्य प्रायः स्थितिरियमहो धैर्यमेवाश्रितेव ॥ ४४ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(प्रं) वत्स महाराज! मुक्ताद्वीपमध्यावस्थितमद्यैव विजयकेतुमासाद्यैनं वृत्तान्तमावेद्य च; सद्य एव तस्मादिमं सिंहळद्वीपमानयन्ती तदनुज्ञया मूर्तिमतीमिव कामकलां चन्द्रकलामुपायेन पुनरनुरूपाय तुभ्यमहमुपहरिष्यामि।

राजा–(स्वं) केनापि कपटोपायेन मणिपादुकादिकमिदमवाप्य, मुक्ताद्वीपं गतवत्यां प्रतिभावत्यां; गत्वा च स्वेच्छाचारेण सिंहळद्वीपं; पुनरपि तादृशं सुदृशमवलोकयामि। भवत्वेवं तावत्। (पूं) भगवति प्रतिभावति! न जानासि किमितः करणीयम्? मया किमत्र वक्तव्यमास्ते? तथापि किञ्चिदभिधास्ये। पुररिपुवरदानमहिम्नैवाकाशयानादिषु सिद्धेषु; किमनेन केवलदेहभारसम्पादकेन मणिपादुकादिवहनेन?

प्रतिभा–(स्वं) सकलमपि मम महिमानमेष जानाति रघुनाथभूपः। (पूं) पश्य! तथैवास्तु। (इति पादुकां भूमौ निधायाकाशयानेन सशिष्या निष्क्रान्ता)

राजा–(ऊर्ध्वमवलोक्य साश्चर्यं)

रुन्धानोऽतिपयोमुचः शरदिजानुद्धान्तमभ्रान्तरे
बन्धूकद्युतिबन्धु वेगविगळद्बन्धं जटामंडलम्।
अस्या व्योमचरः शकुन्तनिवहो हा हन्त देहं दरात्
वारं वारमुदीक्ष्य भैरवरवं हीरं दिशां गाहते॥ ४५॥

(ततः प्रविशति विदूषकः)

विदूषकः–वयस्स! मज्झण्णमारहिअ एसो हदासो उज्जाणपालओ माणवओ दुवारे मं णिरोहिअ, दाणिं एत्त संझासमये एत्थ पवेसिदवंतो। (इति यथोचितमुपविशति)

(छाया) [वयस्य! मध्याह्नमारभ्यैष हताश उद्यानपालको माणवको द्वारे मां निरुध्येदानीमेव सन्ध्यासमयेऽत्र प्रवेशितवान्]।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा—(समन्तादवलोक्य साश्चर्यं) निखिलदिगन्तरनिरन्तरसपसमयमिळद-शेषविहगपरिषदविरतविरुतमुखरस्य, खरकिरणवियोगकृतमुद्रणपयोजिनीविद्रवदळिपटलनिलयविकचकुवलयनिचयकवचितसरसः, सरसदिवसावसानस्पन्दमानमन्दमारुतहिन्दोळितमल्लिकावल्लिसन्दोहाविराचितवनदेवनदेवताडोलाविहरणसाक्षिणो लीलावनस्य, सखे! पश्य स्पृहणीयं रामणीयकम्। सम्प्रति हि नगरेषु—

हर्म्याणां चटुलान्गवाक्षविवरेष्वाधाय चञ्चूपुटान्
पश्यन्ति स्ववधूभिरुत्पिवगणाः प्राचीं दिशं पंक्तिशः।
नीत्वा भाविवियोगभावनगळन्निश्वासकोष्णं बिसं
श्लिष्यन्ति प्रमदाः शुचा श्लथपदाः शीघ्रं पतत्रैस्ततैः ॥ ४६ ॥

किञ्च;

पर्यावर्तितकन्धरं मुकुळिते पक्षे विधायाननं
स्वैरं पञ्जरमञ्चिकासु निभृतं छेकाः शुकाः शेरते।
शय्याधारचतुष्किकासु वलते चन्द्राननाच्छोटना-
दुन्निद्रं च कपोतपोतककुलं हुंकारमंकूरयत् ॥ ४७ ॥

(अंगुळ्यग्रेणाग्रतो निर्दिशन्) सखे! पश्य! उदयमयते रथचरणपत्ररथचयसंहरणचणकिरणप्रचारो, विचारोन्मुखनिखिलपथिककुलगर्भगृहप्रवेशनदेशिकमौहूर्तिकको, विलासिजननयनसुधावर्तिकोपमाननिबिडालोकधवळितनिखिललोकालोकावकाशः, पाकासुहृदाशारमणीधृतमणिकुंडलरमणीयनिजमंडलो भगवानेष रजनीपरिणीः। (ऊर्ध्वमवलोक्य सोद्वेगं) सखे! विप्रयोगिजनं मां बहुविधं ते बाधन्ते चन्द्रपादाः।

विदूषकः—(सोपहासं) एदे किंति मं ण बाहंति? जं अहं वि विव्पजोई होमि।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [एते किमिति मां न बाधन्ते? यदहमपि विप्रयोगी भवामि]।

राजा–(विहस्य) अनुक्षणमधिगताधिककलमान्नकवळभक्षणाद्योगी न कथं त्वम्? अपूर्वो योगी। (भूयोप्यूर्ध्वमवलोक्य सासूयं) अरे दोषाकर! विरहिजनविषादपरिणते! कदाचिदपि ते; हरेण शिरसा चिरेण श्लाघित इति भूयानहंकारो न भूयात्। यदत्र निन्दनीयमस्ति निमित्तम्। तथाहि—

सख्या त्वया वनभुवि स्वदमानचापं
सज्जं हितेतरकृते सविधे निगूढम्।
कौटिल्यमेत्य स भवान्कथयन्पुरारेः
विश्वासपातकमहो व्यतनीत्तदानीम् ॥ ४८ ॥

अतनुं विधिनाप्यशासनीयं भसितत्वं नयता भवेन सद्यः।
परथा कथमस्य बालमित्रं सुलभोपि त्वमशिक्षितः सुधांशो ॥४९॥

निमज्जनोन्मज्जनकैतवेन निषेवसे यत्पयसां निधानम्।
हालाहलादानधिया किमौर्वज्वालाशरावात्पथिकज्वराय ॥ ५० ॥

सन्ध्यानर्तनसत्वरभ्रमिकृतोन्मर्दात्कपर्दान्तरात्
देवस्य स्मरदेहघस्मरमहाकीले निटालानले।
श्यामाधीश! भवान्प्रमादवशतो यत्प्रच्युतो न स्वतः
तत्तादृग्विधदुर्विधेर्विरहिणां शंके फलं केवलम् ॥ ५१ ॥

(स्वं) उपायेन देवीपक्षपातिनमेनं तञ्जापुरीमेव प्रस्थापयामि। (पुं) सखे! सारंग! तञ्जापुरीमासाद्य सद्य एव देव्यै, मामकीनामिमामावेदय मदनवेदनाम्। अहमपि निर्वर्त्य तीर्थयात्राशेषं तत्र सवेगमागमिष्यामि।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विदूषकः–(स्वं) अहो! एसो पुणो वि मं पदारेदुं इच्छदि। जादरूवाणिबंधणा मअणवेदणेत्ति। एदिणा अहं पदारिदो विअ भविअ, झत्ति तञ्जापुरीं गमिउण, एदं अण्णणिबंधणं मअणवेअणं रण्णो, जादरूवाए देवीए णिवेदइस्सं। (प्रं) जं अहिरुइदं महाराअस्स।

(छाया) [अहो! एष पुनरपि मां प्रतारयितुमिच्छति; जातरूपानिबन्धना मदनवेदनेति। एतेनाहं प्रतारित इव भूत्वा, झटिति तञ्जापुरीं गत्वा, एतामन्यानिबन्धनां मदनवेदनां राज्ञो, जातरूपायै देव्यै निवेदयिष्ये। (प्रं) यदभिरुचितं महाराजस्य।]

राजा–अहमिदानीमविनतरजनीरमणदुष्प्रवेशं गर्भगृहं प्रविशामि। त्वं च तञ्जापुरीं प्रतिक्षणमदागमनप्रतीक्षणसञ्जातादरकञ्जानना-विघटितसौधगवाक्षाररप्रपञ्चामञ्जसा पुनरासादय।

(इत्युभावपि परिक्रम्य निष्क्रान्तौ)

इति पदवाक्यप्रमाणपारावारपारीण श्रीमद्द्वैतविद्याचार्यसाग्निचित्यसर्वतोमुखाति रात्रसाग्निचित्यासवाजपेययाजिगोविन्ददीक्षितवरनन्दनस्य श्रीयज्ञनारायण यज्वनः कृतिषु रघुनाथविलासनाम्नि नाटके द्वितीयोऽङ्कः

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 6474

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

॥ श्रीरघुनाथविलासे तृतीयोंकः ॥

(ततः प्रविशति कञ्चुकी)

कञ्चुकी–(दीर्घं निश्वस्य)

शुद्धान्तादवनीविभोरवसरान्सोहं बहिः शंसितुं
यातायातशतेन हन्त पदयोरेतां क्षितिं तक्ष्णुवन् ।
खैराहारविहारबन्धुमिळनस्वप्नादिना वर्जितः
पश्याम्यत्र परानुवर्तनपरः पारं चिरादायुषः ॥ १ ॥

किञ्च ;

यातायातं मम पुनरिदं याममात्रेण कूलप्तं
शक्तं वेगादवधिमवनेश्चक्रवाळं च नेतुम् ।
आर्ते नैकोप्यवति निखिलैश्चाद्रियन्ते परायाः
कष्टो हन्त क्षितिपतिगृहे कञ्चुकित्वाधिकारः ॥ २ ॥

आदिष्टोऽस्मि यथेष्टसञ्चरणकारणमणिपादुकाभ्यां सिंहळद्वीपं प्रस्थितवता रघुनाथभूभृता 'अद्य तावदिमं गर्भगृहप्रतिहारमामाद्य न कोपि भवता प्रवेश्यतां' इति । तदस्य नियोगमशून्यं विधास्यामि ।

(इति निष्क्रान्तः । शुद्धविष्कम्भः)

(ततः प्रविशति मणिपादुकाञ्चितपादो वेत्रहस्तो राजा)

राजा–(समन्तादवलोक्य)

हन्तैते मणिपादुके चरणयोरासञ्जयन्नञ्जसा
हस्तालम्बितवेत्रयष्टिरपरं यावन्न गृह्णाम्यहम् ।
अक्ष्णोरध्वनि तावदेव विलसत्यैरावती सा नदी
यत्सन्दर्शनमेव कार्मणमभूदेतादृशश्रेयसः ॥ ३ ॥

अहो मणिपादुकयोरनयोः प्रभावः ! तथाहि—

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जम्बूद्वीपे चरणघटिते पादुके तत्र कुर्वन्
प्रागद्राक्षं बत समुदितं भानुमन्तं यथैव ।
शीघ्रं प्राप्य प्रथितमधुना सिंहलद्वीपमाभ्यां
पश्याम्येनं बलरिपुदिशि प्रायशोहं तथैव ॥ ४ ॥

(प्राचीं दिशमवलोक्य) अयं खलु भगवानिह मघवदाशाविशालनयना वदनारविन्दहरिचन्दनतिलकायितनिजमंडलो ; जगदण्डभवनकुहरविहरदखर्वशार्वरषण्डखंडनदीपायमानदीधितिधाराविरचितदुःसहविरहज्वरातिशयजर्जरिताङ्गरथाङ्गदम्पतिपरिषदमितंपचसुधाभिषेचनविधिः; उदयसमयाभिषेणनदळितदेहमन्देहदनुजसन्दोहसंक्रान्तरुधिरसन्देहसन्धायिबन्धूककुसुमबन्धुरुचिबन्धुरवपुः ; उदयमहीधरशिखरमधिवसति दिवसपतिः । सम्प्रति हि—

घ्रायं घ्रायं प्रकृतिसुरभिं गल्लपालिं प्रियाणां
सौधे सौधे मुहुरतिरतिश्रान्तमंगं वहन्तः ।
मन्दं मन्दं सविधमयितं मारुतं जालमार्गा-
त्सेवं सेवं भुवि सुकृतिनः स्वापसौख्यं भजन्ते ॥ ५ ॥

विविधसौधवलभिषु ;

आस्वाद्य चन्द्रातपमाप्रभातं चकोराडिम्भा बहुचापलेन ।
अन्योन्यसम्बाधमबुध्यमानाः स्वपन्ति कामं सुखपारवश्यात् ॥ ६ ॥

(ऐरावतीमवलोक्य सहस्रनिर्देशं)

पाथोजानि निशावियोगविवशाः प्रेम्णाऽभिशाप्य प्रियाः
तन्वन्तोऽविकृता यथापुरममी चञ्चूपुटैः पक्षतीः ।
आरादत्र मृगांकपादमृदितस्वांगा रथाङ्गाह्वयाः
पत्रैः सम्प्रति वीजयन्ति विततैः पश्यन्ति हृष्यन्ति च ॥ ७ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(सूर्याभिमुखो भूत्वा साञ्जलिबन्धं) अयि भोः त्रयीमय ! समस्तभुवनातिमिरामयजनितातंकविनोदनागदंकार ! भगवन् ! गगनालंकार ! (अभ्रवंयामिथुना ?) (समन्तादवलोक्य)

अहो मणिचतुष्किका कथमवापमैरावती-
प्रतीरमिह सम्प्रति प्रभुमहं त्विषां भावयन् ।
विलासविपिने यतो मम विधेयभूयं विधे-
र्वशेन बत यातया वनितया पुरा भूषिता ॥ ८ ॥

(स्मृतिमभिनीय) पुरा खलु पुटकिनीपतिं भावयतो मम मनसा सेयमाविष्कृता मरतकचतुष्किका । ततो निमिषार्धादेव मामेते मणिपादुके तामेतामानयताम् । (मणिपादुकाभ्यामवतीर्य मरतकचतुष्किकायामुपविशति ; समन्तादवलोक्य, साश्चर्यानन्दम्)

क्षोणी नव्यहरिन्मणीष्टकचिता गोपानसीसन्ततिः
स्थूलस्थूलकरीन्द्रदन्तरचिता स्थूणाः प्रवाळाहिताः ।
भद्रश्रीकलितास्तुलावलमयो भर्मद्रवैर्वर्मिता-
स्तन्व्या वासचतुष्किकामिह वने तस्याः परिष्कुर्वते ॥९॥

(अभितो विलोक्य) परितोपि मरतकचतुष्किकामिह बालसहकारकेसरचम्पकचन्दनप्रमुखाः कतिचन पादपाः, समानपरिमाणतया जानामि तया योषिता समसमयरोपिता इति ।

(पुनर्निरूप्यांगुल्यग्रेणाग्रतो निर्दिशन्)

चन्द्रातपव्यतिकरद्रुतचन्द्रकान्त-
बद्धालवालवलयस्रुतवारिपूरैः ।
पुष्यत्ययं निशि वतंसितशीतभानौ
सर्वानिह क्षितिरुहः सहकार एकः ॥ १० ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तदयं तस्याः प्रेयस्याः प्रेमानुबन्धमहिमातिशयः। (पुनर्निरूप्य) अन्तिकालवालगताया वासन्तिकालतायाः स्वयंवरणाभिलाषी स लीलासहकारः। (अन्यतोवलोक्य) इह तावदभिमताभीकलोभनीयमविशेषाय प्रतिष्ठापिता पुनरेषा चन्दनविटपिनिकटभुवं हाटकमयी भगवत्या रत्याः प्रतिकृतिरध्यास्ते। (विचिन्त्य)

सुभगंकरणव्रते सुदत्या प्रतिमा हन्त रतेः प्रतिष्ठितेयम्।
वपुषेव जिता तया वसन्ती विपिने क्वापि रतिर्विभाति साक्षात् ॥११॥

(पुरस्तादवलोक्य) इह तावदिमे तया समेधिता विशालदृशा हरिणशावका निशामयन्तो मामपरिचितमतिचापलाद्दूरत एव पलायन्ते। (चिन्तामभिनयन्दीर्घमुष्णं च निश्वस्य) अहो! तत्रभवती मनोभवतीक्ष्णतरनाराचनिकरमोचनलक्ष्यीकृता सेयमम्बुजाक्षी बलवदस्वस्था दुरवस्थामनुभवति। यतः—

प्रमदवनं सवयस्या प्रमदा सेयं प्रमोदहेतुमपि।
न प्रापयति पदाब्जन्यसनेनेदं कृतार्थतामधुना ॥ १२॥

(स्मृतिमभिनीय) सत्यमेवोक्तं तत्रभवत्या प्रतिभावत्या "सेयं क्षामाकृतिरक्षमा चलितुमपि, परमाणुमध्यासौ सौधतलमध्यास्त" इति। भवतु तावत्; आसञ्जयन्मणिपादुके पदयोरञ्जसा तमेव प्रासादमासादये। (विचिन्त्य)

प्रतिभावती यदि भजेत्तदन्तिकं
विभुना च सा विजयकेतुनाऽधुना।
चपलं विचारयति मां चतुष्किकां
यदि चावसाम्यतनुरेष बाधते ॥ १३॥

अहो! तस्या माध्यमिकागमप्रतिपाद्यमध्यमायाः प्रासादतलासादनसामग्र्यामपि समग्रायां सम्प्रति महानयं प्रतिबन्धः। (विभाव्य)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सेयमेव कथञ्चन विलासेन सवयस्या प्रेयस्यागता चेदिममारामं; पचेळिमं मम तपस्याफलम् ।

(इति चिन्तामभिनयन्पुरतस्सुषमातिशयं निरूप्य, साश्चर्यम्)

या काचिद्वकुलद्रुमावळिपदादेषा झरी रोचिषा-
मायान्ती सुखदर्शनापि न मया हा हन्त निर्धार्यते ।
बाहायन्त्रनियन्त्रितेन्दुजठरप्रस्यन्दमानामृतैः
क्लिन्नेवायतिनिर्वृतिन्तनुरियं किं वाऽनया भूयताम् ॥ १४ ॥

(पुनर्निरूप्य) ! अहो कथमिहोपवनवेदिकाभुवं समया वेगेन स मया प्रवहन्नेव विभाव्यते सुषमाप्रवाहः । (भूयोपि सविशेषं निरूपयन साश्चर्यानन्दम्) अनिर्धारितस्वरूपानपि रमणीयस्वभावान् कतिचन पदार्थानेष समाकर्षति (विभाव्य) एते हि पदार्थाः कथञ्चन निर्धारणपदवीमध्यासते । (अंगुळ्यग्रेणाग्रतः क्रमशो निर्दिशन्)

शैवालान्यसिताम्बुजे सरसिजं शङ्खो मृणाळ्यौ पुनः
कोकद्वन्द्वं (विभाव्य) इतो न दृष्टिविषयः कोयं पदर्थो भवेत् ।
(पुनर्विभाव्य) दृश्यते च सूक्ष्मतरा काचन मेचका लतिका !

सान्द्रं सैकतमण्डलं कदलिकास्तम्भद्वयं कच्छपौ
पाठीनद्वितयं नवे किसलये प्रान्ते तयोः कोरकान् ॥ १५ ॥

(पुनर्विभाव्य साश्चर्यं)

अंसुप्रवाहचलवीचिभिरप्रयासा-
त्पुञ्जीकृताः पुनरमी पुरतः पदार्थाः ।
वेधोविधानविभवेन विनाधुना मे
दिव्या वधूरिव दृशोः प्रदिशन्ति हर्षम् ॥ १६ ॥

(मुहूर्तं निध्याय) सेयं दिव्या वधूरेव । नैते च शैवालादयो मिळिताः पदार्थाः । (पुनरपि तेनैव क्रमेण करेण निर्दिशति)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

केशास्ते नयने इमे मुखमिदं कण्ठोयमेते भुजे
तद्वक्षोजयुगं वलग्नमयिता सा किञ्च रोमावळी ।
तस्यास्तज्जघनं तदूरुयुगळं तौ मण्डलौ जानुनी
जंघे ते चरणाविमौ नखततिः सा चञ्चालाक्षीमणेः ॥ १७ ॥

(पुनर्विभाव्य)

वैशाखं मलयाद्रिमिन्दुकमठव्याप्तं गुहाधिष्ठितं
बध्द्वा कल्पलतागुणैर्बत रतेर्भर्त्रा वसन्तादिभिः ।
लावण्याम्बुनिधानतः प्रमथिताल्लक्ष्मीरिवान्योदिता
मध्येदीधितिपूरमत्र सदसन्मध्येयमालक्ष्यते ॥ १८ ॥

(विचिन्त्य सोत्कण्ठं) अये ! चिरेण गृहीतः परमार्थः । सैवेयं चन्द्रकला प्रमदवनं पादपद्मविन्यसनैरायातीह रयादनितरसुलभं नेतुं दृशापि सुकृतित्वम् । अन्यथा कथमेतादृशी भुवि दरीदृश्यते सुषमाझरी ? (निरूप्य) कथमचिरादेव सेयमारादिहारामदेशे कुमुद्वतीचन्द्रिकादीय मानकरावलम्बना शम्बरमदनकलम्बकदम्बकजनिताभिषंगातिशयकशाङ्का मन्दंमन्दमन्तिकमुवमवतरति चन्द्रकला । अहमिदानीमासज्ज यन्मणिपादुके पदयोरञ्जसा चन्दनविटपिकुञ्जगृहान्तरितः प्रेयस्याः सहवयस्याया विलसितानि यावदवलोकयामि ।

(तथा करोति ; ततः प्रविशति सखीचेटीदीयमानकरावलम्बना विरहालसा नायिका)

नायिका—हळा कुमुव्जइ ! तुमं अव्जवि मं किंति इमाए चंदिमाए सहिए पमदवणं णअसि ? अहव ; सो पमदवणमव्गो तुए विसुमरिदो ? (उभे सविषादं परस्परं विलोकयतः)

(छाया) [अयि कुमुद्वति ! त्वमद्यापि मां किमित्यनया चन्द्रिकया सख्या प्रमदवनं नयसि ? अथवा ; स प्रमदवनमार्गस्त्वया विस्मृतः ?]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा—अहो सुवदनाया विरहवेदनातिशयः! यदियमारामभुवमागतापि मनागपि न जानाति। अस्याः किल निरवग्रहविरहग्रहग्रसनातिशयेन विनाकृतविलासविशेषाया योषामणेरभिनवयौवनाधिगमो विषादहेतुरेव। तथाहि—

क्षामक्षाममिदं वपुः प्रतिकलं कामेन मुक्तैःशरैः
स्थूलस्थूलमुरोजयोर्युगमिदं दुर्वारमुज्जृम्भते।
खिन्नखिन्नमिदं पदद्वयमहो स्थानेकृतं वेपते
वारं वारमिदं मनश्च विहृतौ बद्धादरं जायते ॥ १९ ॥

सखी—हलचंदनकलं.....
.....
.....।

चेटी—(जनान्तिकं) हला कुमुज्जइ! इसाए भट्टिदारिआए.....
.....णि मंतमूलिआ
अणवोहणिव्जा खणे खणे अतिमेव्तं
.....तिदा भअवदी पडिहावदी णागदा। किं एसा
इमाए भट्टिदारिआए मण०.....
.....इदो खणादो
एव्व तेण महाणुहावेण रहुणाहजणाहिणाहेण सहिदा.....

राजा—पन्थानं नयनद्वयस्य भजते पद्माकरो भीकरः
पाटीरद्रव....लिविपिनं जानाति नैवाधुना।
(विचिन्त्य) भवतु ज्ञातम्।
आपुंखव.....
भिरहह क्षुभिताकथं स्यात् ॥ २० ॥

अहो न जानाति सेयं सुवदना।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कुमुद्वती-कंठालम्बिदघंटाणिणदाणुधावमाणमिगिसंतदी सारंगो यूहाधिपई इदो एव्व अणुहावेइ। पेव्ख।

(छाया) [कण्ठालम्बितघंटानिनदानुधावमानमृगीसन्ततिः सारंगो यूथाधिपतिरित एवानुधावति। प्रेक्षस्व।]

नायिका-हला कुमुव्जइ! पञ्चसरसंजवणं किं लीलावणं उवगदह्म?

(इति परिवृत्य पश्यति)

(छाया) [हला कुमुद्वति! पञ्चशरसञ्जवनं किं लीलावनमुपगताः स्मः?]

राजा-कण्ठालंकृतिघंटिकाघणघणात्कारैरमुष्या वने
शंसन्नागमनं स कोपि मुखतः सन्त्यक्तदर्भाङ्कुरः।
घ्रायं घ्रायमसौ पदानि सरणौ कान्तामणेः साम्प्रतं
सारंगः सहितो मृगीभिरभितः सोद्वेगमागच्छति ॥ २१ ॥

अमृतकिरणांकवासी पाणौ विधृतो मृगोपि पशुपतिना।
अयमिव न कृती यदमुं हरिणाक्षी नयनलक्ष्यमातनुते ॥२२॥

नायिका-हला कुमुज्जइ! मरकदचउव्खिअं झत्ति गमिव्सामो।

(छाया) [हला कुमुद्वति! मरकतचतुष्किकां झटिति गमिष्यामः]

सखी-जं अहिरुइदं सहीए।

(छाया) [यदभिरुचितं सख्याः]

(सर्वा अपि नाट्येन मरकतचतुष्किकासमीपमुपसर्पन्ति)

नायिका-हला कुमुव्जइ! इह कहिं पदेसे मए वव्हिदो बालसहआरो? वासंतिआवि सहआरसयंवराहिलासिणी कांतिआ संवुव्ता। तव्थ गमिव्सामो।

(सर्वा अपि मरकतचतुष्किकाममितः परिक्रामन्ति)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [हला कुमुद्वति! इह कुत्र प्रदेशे मया वर्धितो बालसहकारः? वासन्तिकापि सहकारस्वयंवराभिलाषिणी कान्तिका संवृत्ता? तत्र गमिष्यामः]

चेटी–(अंगुलयग्रेणाग्रतो निर्दिश्य) एसो एव्व सो बालसहआरो। एसा एव्व सा वासंतिआ।

(छाया) [एष एव स बालसहकारः। एषैव सा वासन्तिका।]

सखी–हला चन्द्रकले! जंबूदीवाहिपइणो अणुरूवस्स रहुणाहभूविहुणो सअंवरणाहिलासिणी तुमं विअ; एसा वासंतिआ बालसहआरस्स। तुह्माणं विअ; पसवोदयसंदस्सिदणवजोवणाणं इमाणं अज्ज एव्व सअंवरमहूसवो होदु।

(छाया) [हला चन्द्रकले! जम्बूद्वीपाधिपतेरनुरूपस्य रघुनाथभूविभोः स्वयंवरणाभिलाषिणी त्वमिव; एषा वासन्तिका बालसहकारस्य। युवयोरिव प्रसवोदयसन्दर्शितनवयौवनयोरनयोरद्यैव स्वयंवरमहोत्सवो भवतु।]

नायिका–(शृंगारलज्जां नाटयति)

चेटी–हला कुमुव्जइ! इमाए भट्टिदारिआए अज्ज दुव्वारं लज्जं असमयम्मि किं जव्मेसि?

(छाया) [हला कुमुद्वति! अस्या भर्तृदारिकाया अद्य दुर्वारां लज्जामसमयेपि किं जनयसि?]

राजा–सखीमुखोदितमिह सत्यमेव भो
विधे मयि त्वरितमिदं विधेहि तत्।
तथा यदि प्रभवति सा तव क्षिता-
वपूर्वसंघटनविधासु वैदुषी॥ २३॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नायिका-(स्मृतिमभिनीय) इमादो कप्पूरकदळीवणादो दाहिणाहि-
वन्दणविडविमूलालवालणिअडदेसवलाहिदसिलासकलाविणि-
म्मिदणम्मवेदिअंतव्वसंतणवकणअमअमारंतेउरपडिच्छंदपरि-
जरणं विसुमरिअ, एव्थ किंति वासंतिआपरिसरे संचरेमो ?
ता एव्थ एव्व गमिस्सामो । (इति सर्वा अपि परिक्रामंति)

(छाया) [अस्मात्कर्पूरकदळीवनाद्दक्षिणाभिवन्दनविटपिमूलालवा-
लनिकटदेशवलाहितशिलाशकलविनिर्मितनर्मवेदिकान्तर्व-
सन्नवकनकमयमारान्तःपुरप्रतिच्छन्दपरिचरणं विस्मृत्य,
अत्र किमिति वासन्तिकापरिसरे सञ्चरामः ? तदत्रैव
गमिष्यामः ।]

राजा-इयमिह सरणौ हिमाभिभूत-
स्थलजलजातसमे पदे दधाना ।
स्तनजघनभरेण सा स्खलन्ती
कथमिव गच्छति हन्त कातराक्षी ॥ २४ ॥

(विमृश्य)

पाटीरद्रुमपल्लवैः क्वचितं पन्थानमत्रान्तरे
तन्वन्नेव ददामि किं प्रतिपदं तन्व्याः करालम्बनम् ।
स्वेच्छाचारविधायिके किमथवा तस्या मणीपादुके
लग्ने पादयुगे करोमि सविधं रत्या यियासोरहम् ॥ २५ ॥

सखी-हला चन्दकले ! भअवदीए रदीए सविहं आगदं ह्म ।

(छाया) [हला चन्द्रकले ! भगवत्या रत्याः सविधमागताः स्मः ।]

नायिका-(रतेरभिमुखमुपविशति)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सखी–हंजे चन्दिमे! इमाए रदीए उवासणसाहणाणि उवाहर ब्पसूणाणि।

(छाया) [अयि चन्द्रिके! अस्या रत्या उपासनसाधनान्युपाहर प्रसूनानि]

चेटी–अहइं [अथ किम्] (नाट्येन पुष्पाण्युपाहरति)

नायिका–(पुष्पाञ्जलिं विकीर्य) (साञ्जलिबन्धं रतिमभ्यर्थयते)

पेव्खन्तफालपुरुसोत्तमपव्मजव्म-
भावव्पदारणचणोवि पसूणबाणो।
अव्ये! तुए निगळिदो खु अनंगविव्खा-
पाणेण किं परमहं पडिवादएमि॥ २६॥

वरमहिलासिदं अणव्णलव्भं वसय तुमं मह मव्महव्स देवी।
तदिदमयि ण दुव्करं तवाव्ये महवि तहा फलिदं मणोरहेण॥२७॥

(छाया) [पश्यत्फालपुरुषोत्तमपद्मजन्म
भावप्रदारणचणोपि प्रसूनबाणः।
आर्ये त्वया निगडितः खल्वनंग
विख्याप्राणेन किं परमहं प्रतिपादयिष्ये॥

वरमभिलषितमनन्यलभ्यं वशय त्वं मम मन्मथस्य देवि।
तदिदमयि न दुष्करं तवार्ये! ममापि तथा फलितं मनोरथेन॥]

सखी–(अपवार्य) हंजे चंदिमे! इमाए अहिमदवरं अव्भव्थयंतीए पडिहावदीआणिणीसिदो सो एव्व मणसि जणावदंसो रहुणाहणर-वालो विपव्छिदो। इमाए आसयं उव्घाडेमि।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [अयि चन्द्रिके! अस्या अभिमतवरमभ्यर्थयन्त्याः प्रतिभावत्यानिनीषितः स एव मनसि जनावतंसो रघुनाथ नरपालो विपश्चित्। अस्या आशयमुद्घाटयामि।]

सखी–(देवताभिमुखी भूत्वा प्रार्थयते)

स होए एव्वाहे सवदि मअणाहोपुरुसिए
तुमं धीरोदव्वं घडय रहुणाआवणिपइं।
तहा चे एताए तणुमिसुभरेहिं पडिकलं
दळन्तो पाणेसो तव परिसरं एव्व भजदि ॥ २८ ॥

(छाया) [स भवेदेतावति सपदि मदनाहोपुरुषिके
त्वं धीरोदात्तं घटय रघुनाथावनिपतिम्।
तथा चेदेतस्यास्तनुमिषुभरैः प्रतिकलं
दळन्प्राणेशस्तव परिसरमेव भजति ॥]

नायिका–(लज्जां नाटयति)

राजा–(विहस्य)

शैवालालीरुचिरचिकुरं चन्द्ररेखाचकास-
त्फालं पद्मप्रतिभटमुखं पक्वबिम्बाधरोष्ठम्।
शैलोदारस्तनयुगमणुस्पर्धिमध्यं तदेत-
द्धीरोदात्तः कथमहमहो दिव्यमालोक्य रूपम् ॥ २९ ॥

चेटी–हला कुमुज्जइ! एदं भट्टिदारिअं मणोविणोदणाय मरकतचउक्खंतरं णयामो। (तथा कुरुतः)

(छाया) [हला कुमुद्वति! एतां भर्तृदारिकां मनोविनोदनाय मरकतचतुष्कान्तरं नयावः।]

सखी–(जनान्तिकं) हंजे चंदिमे! इमाए अहिमदव्स रहुणाहभूविहुणो चिव्तं उवायेण विलेहिअ मणोविणोदणं करेमो।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [अयि चन्द्रिके! अस्या अभिमतस्य रघुनाथभूविभोश्चित्रं, उपायेन विलेख्य मनोविनोदनं कुर्वः।]

चेटी–एदं एव्व मह वि अहिलसिदं।

(छाया) [एतदेव ममाप्यभिलषितम्।]

सखी–हले चन्द्रकले! पुरा एव्व आगदं रहुणाहणरणाहं तारिसं णाहं भयादो अवलोइदवदी।

कव्पूरं कदळीदळंतरगदं कव्भारसूणं वणे
संजादं मिअणाहिपंकमहिदं सव्तं मिआणामहं।
मव्झीए मिळिदं करेमि सुदणो तुं पूगलीलादळे
चिव्तं तव्स लिहेहि भूमिविहुणो चिव्तव्पसादव्पदं ॥ ३० ॥

(छाया) [हला चन्द्रकले! पुरात्रागतं रघुनाथनरनाथं तादृशं नाथं भयादवलोकितवती।

कर्पूरं कदळीदळान्तरगतं कम्भारसूनं वने
सञ्जातं मृगनाभिपंकमहितं सत्वं मृगानामहम्।
मध्या मिळितं करोमि सुतनो त्वं पूगलीलादळे
चित्रं तस्य लिख भूमिविभोश्चित्तप्रसादप्रदम् ॥]

चेटी–हला कुमुव्जइ! तारिसव्स महाणुहावरहुणाहभूविहुणो चिव्त-विलेहणाणुरूवा एव्व वव्णसामव्गी कहिदा।

(छाया) [हला कुमुद्वति! तादृशस्य महानुभावरघुनाथभूविभोश्चित्र विलेखनानुरूपैव वर्णसामग्री कथिता।]

सखी–हंजे चंदिमे! इमाए वव्णसामव्गीए तारिसव्स रहुणाहभू-विहुणो अणुरूवव्स, चिव्तविलेहणे वि एसा एव्व अणुरूवा।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [आयि चन्द्रिके अनया वर्णसामग्र्या तादृशस्य रघुनाथभूविभोरनुरूपस्य चित्रविलेखनेपि; एषैवाऽनुरूपा ।]

राजा–(सोत्कर्णं)

अनया यदि सोहमत्र हर्षात्कमलाक्ष्या लिखितः कराम्बुजेन ।
तदनन्तरमेव तावदुच्चैरनुरूपत्वमिहावनौ भजेयम् ॥ ३१ ॥

नायिका–हला कुमुज्जइ ! मह एदारिसिं अवत्थं पेक्खंति वि तस्स महाणुहावस्स रूवं विलिहेहित्ति, इमाए चंदिमाए सहिदा अदिमेत्तं किं परिहसेसि ?

आकाण्णाअदलोअणं विहुमुहं आजानुबाहार्गळं-
स्फारोरत्थलमुण्णदंससिहरं पारिंदमज्झासहि ।
रूवं किन्तु जयन्तणिंदणचणं लोएक्कणेत्तूसवं
तारिच्खं रहुणाहभूमिविहुणो तस्सालिहेअं कहं ॥ ३२ ॥

(छाया) [हला कुमुद्वति ! ममैतादृशीमवस्थां प्रेक्षन्त्यपि, तस्य महानुभावस्य रूपं विलिखेति ; अनया चन्द्रिकया सहिता अतिमात्रं किं परिहससि ?

आकर्णायतलोचनं विधुमुखं आजानुबाहार्गळं
स्फारोरस्थलमुन्नतांसशिखरं..... ? ।
रूपं किन्तु जयन्तनिन्दनचणं लोकैकनेत्रोत्सवं
तादृक्षं रघुनाथभूमिविभोस्तस्याऽऽलिखेयं कथम् ॥]

राजा–घनपुळकजालकञ्चुकमपि भित्त्वा पुंखमन्तरा सक्तान् ।
विदती न मदनबाणान्सुदती मामेव हन्त चिन्तयति ॥ ३३ ॥

तदेनामधुना साक्षादेव कथमुपेक्षामहे ? (उपसर्पन्तमात्मानं नियम्य) एषा कुमुद्वती सत्वरमेव समभनया चन्द्रिकया चित्रविलेखनसामग्रीसम्पादनाय मरतकचतुष्किकान्तरस्था प्रस्थास्यते ; तदवसरोयं दुर्वृत्तमाया-

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दन्तिप्रवर्तनस्य ; (निरूप्य) अहो ! कथं तथैव प्रस्थिता कुमुद्वती चन्द्रिका च । (वेत्रलतां परिभ्रमयन्नर्धनिमीलितलोचनं ध्यानं नाटयति)

नायिका–(पुरोऽवलोक्य, संभयकम्पं संस्कृतमाश्रित्य)

सर्वं सर्वसहाया वलयमिदमयं कम्पयन्नंघ्रिदण्डात्
शुण्डादण्डाग्रनिर्यत्पृथुलथुमगणैः पूरयन्नभ्रगंगाम् ।
दुर्वाराखर्वगर्त्रान्सपदि हरिमुखान्भाययन्भीट्क्रियाभिः
दुर्वृत्तः कोपि मत्तः सविधमयति मे दूरतो हन्त दन्ती ॥३४॥

दाणिं इमादो दन्तावळादो कोणु मं परित्ताएदु ? जाव एसो दुव्वुत्तो दंती मं ण पेक्खदि, दाव एदस्सिं चंदणलदाघरए णिलीए। (इति सोद्वेगं तथा करोति)

(छाया) [इदानीमस्माद्दन्तावळात्कोनु मां परित्रायताम् ? यावदेष दुर्वृत्तो दन्ती मां न प्रेक्षते ; तावदेतस्मिंश्चन्दनलतागृहे निलीये ।]

राजा–(आयान्तीं नायिकामवलोक्य, साश्चर्यानन्दानुरागं)

सुचिरमुपचितानि तावत्सह सुकृतानि यदा समुन्मिषन्ति ।
अधिवनमिह नूनमप्रयासान्मम हि तथा फलितं मनोरथेन ॥३५॥

(नेपथ्ये)

अयं खलु भगवानतिकलुषितचक्रवाकयुवलोकमानसो बन्धूकसुमरुचिसमानसुषमाझरीसमावृतनिजमंडलस्सरयमपरमहीधरशिखरमवतरति दिवसकरः। तस्मादाहूयास्मानतनुशरविह्वलांगीं चन्द्रकलामुद्यानमध्यादञ्जसा 'मलयनामधेयं प्रासादमुपनयते'ति मलयकेतुरादिष्टवान् ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

नायिका–(श्रुत्वा ससंभ्रमम्) एदे उण मह भादुणो अव्यमलयकेदुणो आगदा णिदेसहारिणो कंचुइणो। ता अणुइदं मह एव्व विलम्बेदुं। (इति सव्याजं विलम्ब्य निःक्रान्ता)

(छाया) [एते पुनर्मम भ्रातुरार्यमलयकेतोरागता निदेशहारिणः कञ्चुकिनः। तदनुचितं ममात्र विलम्बितुम्।]

राजा–(सोत्कर्णं)

आलिंगितोऽहमनया त्रासविलोलाक्षितारकं तन्व्या।
तदुपरि किमपि विधेयं तस्मिन्नाज्ञासिषं समये ॥ ३६ ॥

अपि च ;

सर्वाणि हन्त करणानि सनिर्वृतीनि
तस्मिन्क्षणे निगदितुं तदहं न जाने।
जानात्यदो यदि स कुंडलितेक्षुचाप-
ज्यारोपितप्रसवसायक एक एव ॥ ३७ ॥

भवतु ; जम्बूद्वीपं भगवती प्रतिभावती यावन्न यास्यति, ततः प्रागेवाहमासञ्जयन्मणिपादुके पदयोरञ्जसा तदिदं पुनरासादये।

(इति नाट्येन परिक्रम्य निष्क्रान्तः)

॥ श्रीः ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमदद्वैतविद्याचार्यसाग्निचित्यसर्वतोमुखातिरात्रसाग्निचित्याप्तवाजपेययाजिगोविन्ददीक्षितकरनन्दनस्य श्रीयज्ञनारायण यज्वन. कृतिषु रघुनाथविलासनाम्नि नाटके तृतीयोऽङ्कः

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

॥ श्रीरघुनाथविलासनाम्नि नाटके ॥

॥ तुरीयोऽङ्कः ॥

(ततः प्रविशति प्रतिभावती योगविद्या च)

प्रतिभा–(समन्तादवलोक्य) कथमचिरादेव मुक्ताद्वीपादाकाशयानमासाद्याहमेनं सिंहलद्वीपमवापम् ! तथा खलु ;

संक्षिप्तग्रामभूमीधरनगरनदीसागरद्वीपसीमां
कान्ताराद्यैरुपेतां गगनगतिरिमां काश्यपीं त्वामपश्यम् ।
निर्मातुं सम्यगेतन्निखिलमपि जगन्नीरजातासनेन
स्तोकां रेखामिवादौ फलकविलिखितां बुद्धिसौकर्यसिद्ध्यै ॥१॥

योग–भअवदि ! सव्वं उववण्णं ।

(छाया) [भगवति ! सर्वमुपपन्नम् ।]

प्रतिभा–(अन्यतोऽवलोक्य सहस्रनिर्देशम्) अतिसन्निहितैव सेयं विजयकेतोः कनकाभिधाना कुलराजधानी । अयमेव खलु मे वत्सायाः चन्द्रकलाया निलयो मलयो नाम मणिसौधः ।

पुरि तत्र भूमिभागान्भूरिद्वारानयं स मणिसौधः ।
ज्योतिर्गणस्य गन्तुं दिवि वर्त्मानीव वहति रचितानि ॥ २॥

तदेहि तावदुपसर्पावः । (उभे अपि नाट्येन परिक्रामतः)

योग–(समन्तादवलोक्य) भअवदि पडिहावदि ! पुरा एव्व मुत्तादीवादो पव्विदो अव्ज वि किंति समयाकरेदि अयं विजयकेदू ?

(छाया) [भगवति प्रतिभावति ! पुरैव मुक्ताद्वीपात्प्रस्थितोऽद्यापि किमिति समयाकरोति, अयं विजयकेतुः ?]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रतिभा–(विहस्य) अचिरादेव सोयमिहागमिष्यति । तत्प्रतिपालयावस्तावदावाम् ।

योग–भअवदि पडिहावदि ! सेइरसंचरणविहायिआओ मणिपादुआओ मुत्तादीवगदस्स अय्यविजयकेदुणो जइ दिण्णाओ; पुरा एव्व अह्मेहिं सहिदो आगदो भवे । ता किमत्थं ताओ मणिपादुआओ जम्बूदीवाहिपइणो रहुणाहभूविहुणो घरंमि तुह्मेहिं णिक्खिव्ताओ ?

(छाया) [भगवति प्रतिभावति ! स्वैरसंचरणविधायिके मणिपादुके मुक्ताद्वीपगतस्यार्यविजयकेतोर्यदि दत्ते; पुरैवास्माभिः सहित आगतो भवेत् । तत्किमर्थं ते मणिपादुके जम्बूद्वीपाधिपते रघुनाथभूविभोर्गृहे युष्माभि र्निक्षिप्ते ?]

प्रतिभा–(सस्मितं)

नायकयोरनयोः स्मरसायकयोगेन हन्त विह्वलयोः ।
हस्तेकरणाय मया न्यस्ते करतस्तदैव मणिपादू ॥ ३ ॥

योग–(सविस्मयं) जुत्तं एव्व आअरिदं भअवदीए ।

(छाया) [युक्तमेवाचरितं भगवत्या ।]

प्रतिभा–(निमित्तं सूचयित्वा साश्चर्यं)

स्फुरत्यहो चक्षुरदक्षिणं मे प्रतिक्षणं सम्प्रति योगविद्ये ।
गान्धर्वमुद्वाहमतः प्रपन्ना कन्यामुना भूविभुनेति जाने ॥ ४ ॥

भवतु; वत्से ! युवराजस्य मलयकेतोः मदागमनशंसनाय मया नियुक्ताः किमिति समयाकुर्वन्ति ?

योग–अह्मे भअवदि ! अह्माणं समीपं का एसा आअच्छंती विअ दीसइ ?

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [अंहो भगवति ! अस्माकं समीपं कैषाऽऽगच्छन्तीव दृश्यते ?]

प्रतिभा–(पुरतोवलोक्य) सेयमायान्ती सुदती कुमुद्वतीव प्रतिभाति। (इति पश्यन्ती तिष्ठति)

कुमुद्वती–(प्रविश्य) भअवदि ! णमामि। (इति प्रणमति)

प्रतिभा–अपि कुशलं तव प्रियवयस्यायाश्चन्द्रकलायाः ?

कुमुद्वती–भअवदि पडिहावदि ! तुह आसीसाए।

(छाया) [भगवति प्रतिभावति ! तवाशिषा।]

(सर्वा उपविशंति)

कुमुद्वती–पुरा हि मए चंदिमाए वि सहिदा चंदकला पंचसरसंजवणं लीलावणं उवगदवदी। तव्थ ताए चंदकलाए मणोविणोदणाय रहुणाहभूविहुणो चिन्तविलेहणसामग्गिं सम्पादेदुं मरतअचउव्खंतरादो अण्णव्थ पव्ठिदह्म। तदाणिं एव्व कोवि अदिव्ठपुव्वो दुव्ठोऽरव्णादो दंती समागदो। तदा खु (पवलादो) दंतावलादो हीदहीदा सव्णिहिदचंदणघरमव्झं पविसव्ज। तदो अव्यमलयकेदुणो णिदेसकारिणो कंचुकिणो चंदकलां सायंसमयो जादोव्ति, मलयणामहेयं मणिसउहं पुराणयंति। सा उण तुह आगमणं सुणिअ, एव्ताहे एव्व पव्चूहे चंदकला तुझ समीपे मं विसव्जिदवदी। ताए पुणो अहं किं पडिवादेमि। ता आणवेदु भअवदी।

(छाया) [पुरा हि मया चंद्रिकयापि सहिता चन्द्रकला पंचशरसंजवनं लीलावनमुपगतवती। तत्र तस्याश्चन्द्रकलाया मनोविनोदनाय रघुनाथभूविभो श्चित्रविलेखनसामग्रीं सम्पादयितुं मरकतचतुष्कान्तरादन्यत्र प्रस्थिते स्वः। तदानीमेव कोपि,

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अदृष्टपूर्वो दुष्टोऽरण्याद्दन्ती समागतः। तदा खलु दन्ता-वलाद्भीतभीता सन्निहितचन्दनगृहमध्यं प्रविष्टा। तत आर्यमलयकेतो निंदेशकारिणः कञ्चुकिनश्चन्द्रकलां 'सायं समयो जात' इति मलयनामधेयं मणिसौधं पुरानयन्ति। सा पुनस्तवागमनं श्रुत्वा, एतवत्येव प्रत्यूषे चन्द्रकला तव समीपे मां विसृष्टवती। तस्याः पुनरहं किं प्रतिवदामि? तदाज्ञापयतु भगवती।]

प्रतिभा–(विचिन्त्य सस्मितं)

मदागमनतः पूर्वं मदालसविलोचने।
रघुनाथमहीपालं लब्धमेवावधारय ॥ ५ ॥

इत्याह भगवती। वत्से! गच्छ तावत्।

कुसुद्धती–जं मअवदी आणवेदि। (इति निष्क्रान्ता)।

(छाया) [यद्भगवत्याज्ञापयति।]

प्रतिभा–वत्से योगविद्ये! मणिपादुकाभ्यां चन्दनलतानिकुञ्जगृहा-न्तरितेन रघुनाथभूभृता वेत्रलताभ्रमणविभ्रमेण प्रवर्तितो दुर्वृत्तो मायादन्ती। ततो गान्धर्वं परिणयनं वधूवरयोरनयोरासीत्।

योग–एसो सव्वोवि तुह महिमातिसयो।

(छाया) [एष सर्वोपि तव महिमातिशयः।]

प्रतिभा–वत्से योगविद्ये! सद्य एव जम्बूद्वीपाधिपते रघुनाथभूपतेः सकाशमाकाशयानेन रयादुपयाहि। ततः परं, दत्तमुदं तमेन-मुदन्तमेवं प्रभवे निवेद्य, ततस्तस्मादादाय मणिपादुकादिकं, अद्यैव पुनरायाहि। इतो विजयकेतुरपि निमिषादेव यावदायाति।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अनुज्ञयाऽहं वसुधासुधारुचे-
रमुष्य वेगेन समं सखीजनैः ।
प्रदातुमस्मै रघुनाथभूभुजे
नयामि तज्जानगरं सुतामिमाम् ॥ ६ ॥

योग=जं भअवदीए राजइ । (इति निष्क्रान्ता)

(छाया) [यद्भागवत्या राजते ।]

(नेपथ्ये)

पाठीनाक्षीनयनमदन प्रौढबाहुप्रताप-
प्रत्याख्यातप्रतिनृपवधूपाणिधूतप्रकीर्ण ।
श्रीकण्ठांघ्रिद्वयधृतमते सिंहळद्वीपसीमा-
पाकारे त्वं जय वसुमतीपाललोकावतंस ॥ ७ ॥

प्रतिभा–(श्रुत्वा सपरितोषं) विजयकेतोः समीपवर्तिनो मागधकुलाधि-
पतेः कलकंठस्यायं कण्ठध्वनिः । तदति सन्निहित एव विजय-
केतुः । तमुपसर्पामि । (नाट्येन तथा कृत्वा) वत्स ! इतस्तावत् ।

(इति मिश्रविष्कम्भः)

(ततः प्रविशत्यध्वगवेषोविजयकेतु र्विभवविजयतश्च सपरिवारः)

विजयकेतुः–कथमचिरादेव मुक्ताद्वीपादिमं भगवती सिंहळद्वीपमसा-
वासादितवती ?

प्रतिभा–(अवनतमुखी तिष्ठति) सर्वेपि सशिरःकम्पं नन्दन्ति.)

विजयकेतुः–(विचार्य) न तावदार्यायास्तादिदमाश्चर्यावहम् ।
यतो ह्यमुष्याः.....

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शैलक्ष्मारुहदीर्घिकापुरवनीशैवालिनीसागर-
ग्रामाद्यैर्गतिविघ्नकारिभिरनाक्रान्ता ननिम्नोन्नता ।
बाधां कण्टकशर्करादिभिरियं पादेषु नातन्वती
पद्या सोमनसी च वा सुमनसी स्पर्धां वहेते गतेः ॥ ८ ॥

प्रतिभा–वत्स! किमनेन मदाकाशयानश्लाघनेन? अवधेहि तावदितो विधेयमभिहितम् ।

विजयकेतुः–अपि नाम कुशलं मदनाशुगविह्वलायै चन्द्रकलायै?

प्रतिभा–(विहस्य) जाग्रत्यां प्रतिभावत्यां यावच्चन्द्रदिवाकरम् ।
सर्वे कुशलिनो वत्स त्वदन्वयभुवो जनाः ॥ ९ ॥

विशिष्य सेयं प्रतिभावतीसञ्जीवनकला चन्द्रकला । तदेषा न केषामुपरि मनोरथानाम्? तं समस्तमपि वृत्तान्तं सविस्तरमेव वदामि; तदेहि नगरमुपसर्पामः ।

विजयकेतुः–यद्भवत्यै रोचत ।

(सर्वेपि कतिचित्पदानि परिक्रामन्ति)

प्रतिभा–कथमचिरादेव नगरगोपुरमतीत्य भवनद्वारमुपगताः स्मः ।

(सर्वेपि भवनद्वारप्रवेशं नाटयन्ति)

प्रतिभा–(पुरतोवलोक्य) अयमेव खलु राजलक्ष्मीनिलयो नाम मंडपः । तदुपविशावः । (उभावुपविशतः)

(सर्वेपि स्वस्तिकहस्ता दूरत एव तिष्ठन्ति)

विजयकेतुः–आज्ञापयतु भगवती ।

प्रतिभा–वत्स सावधानमवधारय ।

विजयकेतुः–(अवहितस्तिष्ठति)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रतिभा–प्रागेव तस्य महानुभावस्य जम्बूद्वीपाधिपते रघुनाथभूपते र्लवणोदपरिसरे खंडितनक्रपिचंडनिर्गतस्य नासाभरणसमुद्गकस्यासादनं, तदनन्तरमेतदन्तरीपान्तरगते पञ्चशरसञ्जवनाभिधे ते लीलावने विलासपरायाश्चन्द्रकलाया दर्शनं, ततो जम्बूद्वीपस्य प्रत्याश्रयणादिकमित्यादि तत्तादृशमशेषं वृत्तान्तमवादिषम् ।

विजयकेतुः–(सानुस्मरणं) तत्रभवतस्तस्य रघुनाथभूभृतः सकाशे मणिपादुकादिकं निधाय पुनराकाशयानेन रयादेव सेयमायातवती भगवती । एतदन्तमेवाहमुदन्तं जानामि । ततः किमाचरितमनेन पुनरवनेरधिपतिनेति न जाने ।

प्रतिभा–यदस्माकं चिरादाशास्यं तदेवाचरितममुना रघुनाथजनाधिपतिना ।

विजयकेतुः–चन्द्रकलाया विवाहकुतूहलमेवाशास्यं; किमन्यदस्याः कन्यकाया विवाहविधेरस्माकं विधेयम् ?

प्रतिभा–(सस्मितं) तदैव गान्धर्वेण परिणयनमंगळेन संगता तव दुहिता ।

विजयकेतुः–कथमिव ?

प्रतिभा–पुरा खलु पंचशरसञ्जवने पुनरियं जवनेतरशिशिरपवमानकुमारसूतिकाभवने लीलावने तस्मिन्नरुन्तुदकञ्जशरदन्तुरितप्रतीका रहितप्रतीकारविरहतापातिशया प्रसवासवाहितपानमत्तदुर्वृत्तभृंगावळीझंकारमेदुरे मरकतमणिविरचितचतुष्किकामध्यमध्यासितवती कुमुद्वतीचन्द्रिकासहिता तव दुहिता ।

प्रागेव तत्र विपिने मणिपादुके ते
लग्ने विधाय पदयो रघुनाथभूपः ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अस्या विलासवचनश्रवणानुकूल-
मध्यास्त चन्दनलतागृहमन्तिकस्थम् ॥ १० ॥

विजयकेतुः–ततः

प्रतिभा–ततः किमन्यत् ?

आशासनीयमनयोरस्मिन्नेवानुरूपयोर्विपिने ।
कामेन वधूवरयो र्गांधर्वं द्रुतमकारि परिणयनम् ॥ ११ ॥

विजयकेतुः– (सहर्षरोमाञ्चं) पुरा खलु भगवति ! पारसीकैरपारसेना-निकरसनाथैररातिभिरावृतो जम्बूद्वीपाधिपतिनाहं 'अच्युत भूपालेन' गोपायितः ।

प्रत्यज्ञासिषमस्मै सर्वज्ञायाच्युतेन्द्र तनुजनुषे ।
रघुनाथमहीपतये विधिना कन्यामिमां ददामीति ॥ १२ ॥

प्रतिभावति ! भगवति ! पुनरस्य प्रतिज्ञातार्थसमर्थनस्य निरंतरराज-कार्यरूपो महानन्तरायः संवृत्तः । अधुना तु रघुनाथभूभृते विधिना, मदाचरितसुकृतरूपेणैवमकाण्ड एव खंडितमहावहारपिचंडनिर्गतं नासा-भरणरत्नसमुद्गकमुपहरता प्रतिज्ञातार्थः समर्थितः ।

प्रतिभा–वत्स विजयकेतो ! ते पुनरन्यदपि किञ्चिदभिधास्ये । तत्सावधानमवधारय ।

विजयकेतुः– अथ किम् ।

प्रतिभा–पुरा खलु मुराभियातिरैरावतीप्रतीरसीमवासी बालया चन्द्र-कलया चिरमपि नियमेन परिवसितः प्रसीदन्, प्रदाय नासा-भरणरत्नसमुद्गकं, असावेवमभिहितवान् ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आसादयन्कामसमो मदंशः
नासामणीरत्नसमुद्गमेनम् ।
भूपालकः कोपि जवेन जम्बू-
द्वीपादिहागत्य तव प्रियः स्यात् ॥ १३ ॥

अतिरहस्यतममिममुदन्तमवनावहमेव जानामि । कंसहिंसकस्य पुनरनारतोपासनारतो नारदोपि ।

विजयकेतुः—भगवति ! मदभिमतमेवार्थं भगवानपि कथमाभिहितवान् ?

प्रतिभा—वत्स जनपते ! निजवरदानपरिणतेरस्याश्चद्रकलायाः प्रसीदन्कमलाविलासी सोयमनुरूपमभिरूपकुलावतंसं तादृशं पुमांसं कथन्न घटयति ? किं बहुना ;

आचक्रवाळमखिलानवनीपरिण्यः
क्षोण्यामदर्शमिह किं प्रभवेयुरेते ।
तस्याथवाऽपरजनिः स्वदमानचापो
रम्यः स एव सदृशो रघुनाथभूपः ॥ १४ ॥

विजयकेतुः—अहो भगवति ! रघुनाथजनाधिपतिमेनं रमेशः स्वयमेव कथं 'स मदंशभूत' इति शंसति स्म ? अद्यतना भुवि जनाधिपा रघुनाथभूपालेन समाः किमपरेपि समासते ?

प्रतिभा—(विहस्य) सिंहळद्वीपाधिपाल ! बाळक इव किं यत्किञ्चिदभिधत्से । तात शृणु तावदुचितमिदमुदितम् ।

नारायणोपि रघुनाथनरेश्वरस्य
पूर्वावतार इति संप्रति पूजनीयः ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तस्मादमुष्य धरणावधुनातनाः किं
हा हन्त भूपहतकाः समतां वहेरन् ॥ १५ ॥

(विचार्य)

रम्येण कश्चिद्रघुनाथभूभुजा
भजेत साम्यं यदि वाहुजन्मसु ।
एकः स एवादित यस्य पादुका
प्रभुत्वमार्गे भरतस्य वैदुषीम् ॥ १६ ॥

विजयकेतुः—भगवति! भवदीयहृदयपरिशोधनाय पुनरिदमुदीरितम्। न तु परमार्थतः ।

प्रतिभा—तर्हि कुतोप्यगर्भितमनाः सुमनायस्व ।

आलोकयिष्यसि खलु श्रवणाध्वनीनं
रामोपमानमधुना रघुनाथभूपम् ।
तस्मादमुष्य भुवि तावदमानुषाणि
नानाविधानि चरितानि न दैवतानि ॥ १७ ॥

विजयकेतुः—प्रागेव सर्वाण्यपि श्रुतपूर्वाण्यमुष्य रघुनाथभूपरिण्यः तानि चरितानि । तथाहि—

तातस्याच्युतभूपतेर्वचनतस्सोयं शिशुत्वेप्यहो
कर्णाटक्षितिभृद्विपक्षरुधिरैः खड्गं खमाप्लावयत् ।
सन्नद्धं युधि पाण्ड्यभूपरिवृढं सैन्येन जित्वा बलात्
प्रागेतस्य जयश्रिया दुहितरं पाणावकार्षीत्समम् ॥ १८ ॥

किञ्च ;

द्वीपं जलनिधिखेयं द्विषतामावासमेष निर्जित्य ।
रघुनाथाख्यां नियतं जगति प्रकाशयञ्जयति ॥ १९ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रतिभा–जनाधिप! सकलान्यपि तदपदानानि जानासि। अलमलमियत्या प्रसक्तानुप्रसक्तया। अधुना त्वमितो नानाभरणाविविधोपहरणपुरस्सरं रघुनाथभूभृतं नारायणावतारमिमामुपनय दुहितरम्। अथवा पुनरिह तवाभिमतां सदेशगतामाशंसाम्येतामादिश।

विजयकेतुः–भगवति! तथैवाधुना यथोपनतनानाविधमणिविभूषणभूषितां विविधगृहोपकरणयौवतशतप्रमुखयौतकसमेतां सुकुतुकमेतां चन्द्रकलामस्मै सुकलावतंसाय रघुनाथभूभृते सरयमयमहमुपहरामि।

प्रतिभा–(निमित्तं सूचयित्वा साश्चर्यानन्दं) वत्स महाराज!

प्रासादाद्घटिकावदैः परिचितात्पर्यन्तपारावत-
द्वन्द्वानां वितरन्परस्परभयाश्लेषेण हर्षोदयम्।
कामं सम्प्रति घंटिकाघणघणात्कारं करालम्बय-
न्मौखर्यस्तिमिते श्रुती वितनुते मध्याह्नशंखध्वनिः ॥ २० ॥

विजयकेतुः–(समन्तादवलोक्य ससंभ्रमं) प्रतिभावति! भगवति! सम्प्रति सवेगमन्तःपुरमासाद्य, चिरन्तनमणिविभूषा विभूषय; वपुषा कमलाविस्मापकद्युतिपुषश्चन्द्रकलायाः।

प्रतिभा–वत्स! तथैव। रत्नांगदया देव्या संगता; कुमुद्वतीचन्द्रिकासमुपास्यमानां निपुणतरमेनां चन्द्रकलां चिरत्नविविधरत्नभूषणकलापैः प्रसाधयितुमिह साधयामि।

(इति निष्क्रान्ता)

विजयकेतुः–शेखरक! सेनापते! त्वमुदन्तमिमं तस्मै मलयकेतवे निवेद्य, बलमखिलमह्नाय प्रयाणाय सन्नाहय।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शेखरकः—यदभिरुचितं महाराजस्य । (इति सपरिवारो निष्क्रान्तः)

विजयकेतुः—शुद्धान्तमनया सकुतुकमध्यासीनया प्रतिभावत्या विभाव्यते, वत्सायाः कथमनुरूपभर्तृभवनयात्रासंभ्रमः ! अहमपि सत्वरमेव तत्र गमिष्यामि । (इत्युत्थाय नाट्येन परिक्रामति)

(नेपथ्ये)

देवाय तस्मै महादेवायेयं नतिः ।

कदळीगर्भमृदुले ! कथं वितनुषे नतिम् ।
प्रालेयशैलकन्येव भद्रे वीरप्रसूर्भव ॥ २१ ॥

विजयकेतुः—(विचार्य) प्रणतां प्रति वत्सां प्रतिभावत्या पतिपादितमिदमाशीर्वचनम् । तत्तथैव फलतु । (इत्यवलोकयंस्थितः)

(ततः प्रविशति प्रतिभावतीरत्नांगदयोरभिमुखाऽऽभरणपेटीहस्ताभ्यां सखीचेटीभ्यां सेव्यमाना नायिका)

नायिका—(लज्जावनतमुखं पादांगुष्ठेन भुवं विलिखन्ती तिष्ठति)

विजयकेतुः—(अंगुळ्यग्रेणाग्रतो निर्दिशन्) भगवति ! तत्साधयामो वत्सायाः परिष्कारायाशु चतुष्कान्तराळम् । (सर्वेपि परिक्रामन्ति) एतदेव चतुष्कान्तराळम् । तदत्रोपविशामः ।

(मरकतपीठिकायामुपविष्टां नायिकामभितः सर्वेप्युपविशन्ति)

सखी—(विजयकेतोः समीपमाभरणपेटीं नयन्ती) एदं परामिसिअ आसीसाए अणुगेह्णदु अय्यो ।

(छाया) [एतां परामृश्याशीर्भिरनुगृह्णात्वार्यः ।]

विजयकेतुः—(प्रतिभावतीं दर्शयति ।)

प्रतिभा—(आभरणपेटीं स्पृष्ट्वा ; सहर्षा)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

एतान्येव विभूषणानि वनितामेतां प्रसादाद्विधे-
रह्नायैव विभूषयन्तु रुचिराण्यन्यादृशानि क्रमात् ।
कार्यं नयनद्वयस्य वपुषः कार्श्यं च वक्षोजयोः
स्थौल्यं चूचुकयोश्च नैल्यमपि च श्वैत्यं तथा गण्डयोः ॥ २२ ॥

रत्नांगदा-भअवदीए आसीसावअणादो कोणु अण्णो विहिणो पसादो ?

(छाया) [भगवत्या आशीर्वचनात्कोऽन्यो विधेः प्रसादः ?]

विजयकेतुः--तथैव न सन्देहः ।

सखी-(जनान्तिकं) हञ्जे चंदिमे ! पुरा अ एसा एदं णअरं आअच्छंती भअवदी अहिगदं मं चन्दकलाए णिवेदेन्ति अहिहिदवदी 'मदागमणादो पुढमं एव्व रहुणाहणरवालं लव्धं एव्व ओहार-एन्ति'। तं वअणं एसा सुणिअ लज्जावणदमुहा होज्ज। दाणिं वि दोहदलव्खणाहिहाणपुरस्सरं आसिसं करेदि भअवदी। ता अहिहिदो एव्व गन्धव्वो विही रहुणाहभू-विहुणा एदाए णिव्वुत्तो। पकासेमि दाव से एदं।

(छाया) [अयि चन्द्रिके ! पुरा चैषैतन्नगरमागच्छन्ती भगवती, अभिगतां मां चन्द्रकलायै निवेदयेत्यभिहितवती 'मदागम-नात्प्रथममेव रघुनाथनरपालं लब्धमेवावधारय' इति। तद्व-चनमेषा श्रुत्वा लज्जावनतमुखा बभूव। इदानीमपि दोहद-लक्षणाभिधानपुरस्सरं 'आशिषं करोति' भगवती। तदभि-हित एव गान्धर्वो विधी 'रघुनाथभूविभुना एतस्या' निर्वृत्तः। प्रकाशयामि तावत्त एतत् ।]

चेटी-हळा कुमुज्जइ ! महवि एदं समीहिदं !

(छाया) [हला कुमुद्वति ! ममाप्येतत्समीहितम् ।]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सखी–(प्रकाशं) भअवदीए आसीसाए तहा एव्व एसा सिद्धमणोरहा वीरव्पसविणी होदु ।

(छाया) [भगवत्या आशिषा तथैवैषा सिद्धमनोरथा वीरप्रसविनी भवतु ।]

नायिका–(शृंगारलज्जामभिनयति)

प्रतिभा–वत्से कुमुद्वति ! तव सख्या विलिख परिनिटालफलकं कस्तूरिकातिलकम् ।

सखी–(नाट्येन तथा करोति)

प्रतिभा–(दृष्ट्वा) साधु ! कस्तूरिकातिलको विलिखितः ।

अस्या विभात्यधिनिटालमसावुदग्रः
सारंगनाभितिलकः स्वदमानधन्वा ।
भ्रूरेखयोरुपधिना स्वभुजौ प्रसार्य
दैर्घ्यं मिमान इव लोचनयोः सलीलम् ॥ २३ ॥

चेटी–भअवदि ! इमाए भट्टिदारिआए कव्थूरितिलअव्स उवरि भव्परेहं लिहेमि ; पेव्ख ।

(छाया) [भगवति ! अस्या भर्तृदारिकायाः कस्तूरितिलकस्योपरि भस्मरेखां लिखामि ; पश्य ।]

विजयकेतुः–(स्वं) भगवतीयं विदग्धा ; परस्परमनयोः स्पर्धामुत्पाद्य, वत्सामाभ्यामेव प्रसाधयति ।

चेटी–(तथैव कुटिलां विभूतिरेखां विलिखति)

रत्नांगदा–भअवदि ! इमाए भव्परेहाए विजयेदि वअणं वच्छाए !

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [भगवति। अनया भस्मरेखया विजयति वदनं वत्सायाः।]

प्रतिभा–(विहस्य) भस्मधारणमहिमा किमस्माद्विधाभिरभिधातुं शक्यते? साधु चन्द्रिके! विलिखिता भसितरेखा।

निटिले विभाति तन्व्याः कुटिलेयं भसितरेखिका रचिता।
बन्दीकृतेव साम्यादिन्दीवरबान्धवस्य हन्त कला ॥ २४ ॥

सखी–भअवदि! इमाए सहिए णअणखंजणे अंजणेण आसंजेमि। पेक्ख। (तथा करोति)

(छाया) [भगवति! अस्याः सख्या नयनखञ्जनौ अञ्जनेनासञ्जयामि। पश्य।]

प्रतिभा–अञ्जनरचिता रेखा खञ्जनदृष्टेः कटाक्षयोरस्याः।
लसतितरामवलोकनवसतिः प्राथमिकरस इव प्रवहन् ॥ २५ ॥

रत्नांगदा–(मौक्तिकताटंके नायिकायाः श्रवसोर्धारयन्ती)

दीहमायुरवलम्बि अम्बिए धीरमासु रहुणाहभूविहुं।
अत्तणोणुगुणमम्बुरासिणो कण्णआ विअ लहेहि केसवं ॥२६॥

(छाया) [दीर्घमायुरवलम्ब्याम्बिके धीरमाशु रघुनाथभूविभुम्।
आत्मनोनुगुणमम्बुराशेः कन्यकेव लभस्व केशवम् ॥]

प्रतिभा–आभाति गल्लयुगळी हरिणेक्षणायाः
ताटंकमौक्तिकमरीचितरंगितेयम्।
क्षौमाम्बरेण पिहितौ रतिकामकेळी-
योग्यौ मणीविरचिताविव दर्पणौ द्वौ ॥ २७ ॥

रत्नांगदा–हञ्जे चंदिमे! कहिं वा तंदोरव्थोरमुव्तामणिधोरणीगहिअं गैवेयअम्?

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [अयि चन्द्रिके! कुत्र वा.....मुक्तामणिघोरणीग्रथितं ग्रैवेयकम् ।]

चेटी–एदं गैवेयअं। ता पडिगेण्हेहि अय्ये। (इति रत्नांगदाया हस्ते दत्ते)

(छाया) [एतद्ग्रैवेयकम् । तस्मात्प्रतिगृह्णीष्वार्ये ।]

रत्नांगदा–(नायिकाया ग्रैवेयकं धारयति) ।

विजयकेतुः–अस्मत्तातपादस्य चन्द्रकेतोरपि विस्मयविधायकमिदं ग्रैवेयकम् ।

प्रतिभा–अनर्घासु भूषासु न केषामुत्पद्यते नटितविविधविस्मयाविशेषो मनीषोन्मेषो हृदयेषु ? अस्याः खलु ;

ग्रैवेयकेण मुक्ताग्रथितेन गळो विभाति परिवीतः ।
कम्बुरिवाप्पतिजातः कान्तिविभूत्या तु सेव्यमान इव ॥२८॥

वत्से कुमुद्वति! सत्वरमविरळपृथुलमौक्तिकसरळपद्मरागतरळमनोहरं विरचिततारकरुचिगर्वपरिहारमानय हारमानतमध्यामिमामलंकर्तुम् ।

सखी–पुव्वं एव्व आणीदो एसो हारो । (इति हारमर्पयति)

(छाया) [पूर्वमेवानीत एष हारः] ।

प्रतिभा– (नायिकाया हारं धारयति) ।

रत्नांगदा–भअवदि ! वच्छाए उरोवट्टिहारो एसो कहं सोभइ !

(छाया) [भगवति ! वत्साया उरोवर्तिहार एष कथं शोभते ?]

प्रतिभा=सर्वाह्लादकराः करा जगति मे तन्वन्ति विश्लेषिणः
कोकानेव सदेति शीतकिरणः किं वक्रनामान्तरः ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अस्या हारलतामुरोवलयितामग्रेकरानादरा-
द्विस्तार्य स्तननामकौ रथपदाविन्धे दृढं योजयन् ॥२९॥

प्रतिभा—इतः कुमुद्वती चन्द्रिका च योषामणेरस्या वपुषा शेषा विभूषा भूषयताम् । (सखीचेट्यौ नायिकां नाट्येन प्रसाधयतः)

प्रतिभा—कुमुद्वति ! सत्वरमस्यै प्रदर्शय मणिमयमादर्शम् ।

सखी—(तथा करोति)

प्रतिभा—अस्याः खलु ;

मुकुरे हिमांशुचिकुरग्रहोद्भटे
मुखमेधते मणिकृतेऽनुबिम्बितम् ।
अवमत्य किन्नु सुषमां बहिःस्थिता-
मवगाहमानममुमन्तरीक्षितुम् ॥ ३० ॥

किञ्च ;

वदने मुकुरो मुकुरे वदनं
प्रतिबिम्बमुपेत्य समं बलवत् ।
प्रभयेव रयेण परस्परम-
प्यधुना विदधाति समाक्रमणम् ॥ ३१ ॥

विजयकेतुः—भगवति ! देवपूजाभवनमुपसर्पामः । (सर्वे परिक्रामंति)

प्रतिभा—(पुरस्तादवलोक्य) एतदेव देवपूजाभवनम् । तदत्र प्रविशामः ।

(सर्वेपि प्रविशन्ति)

विजयकेतुः—(सहर्षरोमाञ्चमञ्जलिं बद्ध्वा)

गौरीश्रीकण्ठलक्ष्मीहरिरतिमदनक्ष्मावराहस्य योग्यं
पाशं शूलं पयोजं रथपदमसिताम्भोरुहं पुण्ड्रचापम् ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

व्रीहिस्तम्बं गदां च स्वकुतुकविधये बीजपूरं विषाणं
बिभ्राणं पञ्चशाखैर्दशभिरविरताश्लेषहृष्यत्कळत्रम् ॥ ३२ ॥

चण्डांशुबिम्बमध्ये शुण्डादण्डेन रत्नकलशभृतम् ।
रत्नं मयि विकिरन्तं प्रत्नं वेतण्डमीदृशमुपासे ॥ ३३ ॥

प्रतिभा—(सानन्दबाष्पमञ्जलिं बद्ध्वा)

अस्तु हस्तिमुखं वस्तु निस्तुलं निगमस्तुतम् ।
भूयसे श्रेयसे यूनोराद्योरानन्दकन्दळम् ॥ ३४ ॥

वत्से ! प्रणम भगवन्तं प्रणवमयं तं निजपादावनतपालनवज्रपञ्जर-मनिदंप्रथमं कुञ्जरम् ।

नायिका—(प्रणमति)

प्रतिभा—(अंगुळ्यग्रेणाग्रतो निर्दिश्य) वत्स विजयकेतो ! सततनिवसद-म्बिकाकुटुम्बिजटावलम्बितविभावरीसुहृदर्भकविभावकं गर्भ-गृहं प्रविशामः । (सर्वे प्रविशन्ति)

विजयकेतुः—(पुरतोऽवलोक्य, सानन्दबाष्पमञ्जलिं बद्ध्वा)

मौखर्यं जनयन्मनीषिसदसां मञ्जीरशिञ्जारवै-
स्तन्वानस्सुमनोगणस्य वसतिं धन्याञ्चले कुत्रचित् ।
सव्यांकोपगतं गिरीन्द्रकुतुकं सव्याजमालोकय-
न्भूमा कोपि रतस्तपोधनमनोभूमावसौ लक्ष्यते ॥ ३५ ॥

प्रतिभा—

जय जय जलराशिराजात्मजाकामुकानीलनीलोपलोपात्तपादांगद !
कनकनगधराधिराजाभिजातानताधीरधीकार्मुकाबालबाहामहः।
भव भवभयनोदनोपायपादापदानाधिनाकाधिकारास्फुरत्सत्वस-न्महिमहिमधरावासवानेकनेतस्सतामादिमाधानधातःस्वतः ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(इत्यभिनयति)

विजयकेतुः—वत्से ! सकलमुनिजननिध्यानसुलभं ललाटलोचन-द्वीपमध्यापतितमदनशलभं दैतेयतिमिरनिरसनसवितारमादि-तेयकुशलनिर्मातारं सकललोकपितरमम्बुं हिमाचलजामातरममन्द-स्वमहिमानं वन्दस्व ।

नायिका—(प्रणमति)

रत्नांगदा—(पार्श्वतोऽवलोक्य) हञ्जे चन्दिमे ! एव्थ उण भअवंतव्स उव्वंसिदचंदसअलव्स सण्णिहिं णयेहि कव्लाणकलिदकव्लाण-पीढं ।

(छाया) [हला चन्द्रिके ! अत्र पुनर्भगवत उत्तंसितचन्द्रशकलस्य सन्निधिं नयस्व कल्याणकलितकल्याणपीठम् ।]

चेटी—(तथा करोति)

सखी—हले चन्दकले ! उवविस कव्लाणपीढे ।

(छाया) [हला चन्द्रकले उपविश कल्याणपीठे ।]

नायिका—(उपविशति)

रत्नांगदा—भअवदि ! कहिं पदेशे मोत्तिअमणिसबला वीहितंडुला ?

(छाया) भगवति ! कुत्र प्रदेशे मौक्तिकमणिशबळा व्रीहितण्डुलाः ?]

प्रतिभा—(अंगुल्यग्रेणाग्रतो निर्दिश्य) भगवतो महादेवस्यैव सन्ति सदेशे ।

रत्नांगदा—(नाट्येन मौक्तिकमणिशबलैर्व्रीहितण्डुलैर्नायिकाया उत्तरीयाञ्चलं पूरयन्ती)

आचंदतारं रहुणाहणेदुणा हण्डेकिदा चंदकले जयाहुणा ।
देवी जहा भूधरणाहकण्णआ देवेण उव्वंसिदसीदभाणुणा॥३६॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [आचन्द्रतारं रघुनाथनेत्राऽङ्केकृता चन्द्रकले जयाधुना ।
देवी यथा भूधरनाथकन्यका देवेनोत्तंसितशीतभानुना ॥]

नायिका—(सविनयं चेलाञ्चलमालम्बते)

विजयकेतुः--भगवति ! किमद्यापि नागतो वत्सो मलयकेतुः ?

प्रतिभाव--(पुरतोवलोक्य) अचिरादेव सोयमिहागमिष्यति ।

(ततः प्रविश्यापटाक्षेपेण)

मलयकेतुः--आर्य ! सन्नद्धानि बलानि द्वीपान्तरगमनाय । सम्पादितानि विविधयौवतानि यौतकानि वस्तूनि । अर्णवमध्यास्ते कर्णधारकुलेन सन्नद्धा तरिः। द्वारि च मणीचतुरन्तयानं वहन्ति वाहकाः । तत्किमनेन विलम्बेन ?

विजयकेतुः--वत्स ! यावदिह मम प्रत्यागमनं ; तावदिममध्यास्व सन्नद्ध एव सिंहलद्वीपम् ।

मलयकेतुः—यदभिरुचितमार्यस्य । (इति निष्क्रान्तः)

नायिका (सखीचेट्योरभिमुखी जनान्तिकम्) सिहरिणी णाम केइणी, मञ्जुगिरा णाम सारिआ, मणोहरणामा एणोवि सहएव्व आणेदव्वो ।

(छाया) [शिखरिणी नाम केकिनी, मञ्जुगीर्नाम शारिका, मनोहरनामैणोपि सहैवानेतव्यः ।]

सखीचेट्यौ--भट्टिदारिए तह एव्व करेम्ह ।

(छाया) [भर्तृदारिके ! तथैव कुर्वः ।]

प्रतिभा--मणिपादुकाहरणाय रघुनाथभूपतेरन्तिके प्रहिता कथमद्यापि नागता योगविद्या ?

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विजयकेतुः--(श्रुतिमभिनीय) कथं पदशब्द इव श्रूयते ! प्रायेण सन्निहितया तया भवितव्यम् ।

प्रतिभा--(अवलोकयति) (प्रविश्य पटाक्षेपेण योगविद्या)

योग--भअवदि ! पणमामि । (इति प्रणम्य, तस्यै पादुकादिकं प्रदर्शयन्ती)
एदाइ दाव आणीदाणि मणिपादुकादीइ ।

(छाया) [भगवति ! प्रणमामि । एतानि तावदानीतानि मणिपादुकादीनि ।]

विजयकेतुः--कथमानीतानि तावदेतानि रघुनाथभूपतेः ?

योग--एदाहिं मणिपादुआहिं णायिअं आहरेमिव्ति ।

(छाया) [एताभ्यां मणिपादुकाभ्यां नायिकामाहरामीति ।]

रत्नांगदा--अये जोअविज्जे ! एदाए वच्छाए कहं णाम रहुणाहभूविहुणो अहिलासो ?

(छाया) [अये योगविद्ये ! अस्यां वत्सायां कथं नाम रघुनाथभूविभोरभिलाषः ?]

योगविद्या--(विहस्य) देवि रअणंगदे !

सव्वण्णो रहुणाहसिंधुरसणासंकंदणो संपदं
सारंगेण समं वसेदि सहिणा लीलावणब्भंतरे ।
सव्वं चंदकलामयं तिभुवणं संभावयंतो सदा
वच्छाए तुह तस्स अत्थि णहि वा वांछेव्ति तुं चिंतय ॥३७॥

(छाया) [देवि रत्नांगदे !

सवर्णो रघुनाथसिन्धुरशनासंक्रन्दनः साम्प्रतं
सारंगेण समं वसति सख्या लीलावनाभ्यन्तरे ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सर्वं चन्द्रकलामयं त्रिभुवनं संभावयन्सदा
वत्सायां तव तस्यास्ति नहि वा वाञ्छेति त्वं चिन्तय ॥]

रत्नांगदा–(सहर्षं नायिकामाश्लिष्य)

जहाहिलासं रहुणाहभूवो सअं तुए चंदकले करेदि ।
तहा विणीदिं तुममाभरेहि तहिं तदो वड्ढइ तस्स पेमो ॥३८॥

(छाया) [यथाभिलाषं रघुनाथभूपः स्वयं त्वयि चन्द्रकले करोति ।
तथा विनीतिं त्वमाभरस्व तर्हि ततो वर्धते तस्य प्रेम ॥]

नायिका–(शृंगारलज्जामभिनयति)

प्रतिभा–वत्से रत्नांगदे ! तिष्ठ; वयमिमां वत्सामाशु जम्बूद्वीपाधिपालं रघुनाथजनाधिपतिं नयामो रयात् ।

रत्नांगदा–(स्नेहार्द्रं नायिकां परिवृत्य पश्यन्ती निष्क्रान्ता)

विजयकेतुः–भगवति प्रतिभावति ! रयादेव जम्बूद्वीपमाश्रयामः ।

(परिक्रम्य निष्क्रान्ताः सर्वे)

इति पदवाक्यप्रमाणपारावारपारीणश्रीमदद्वैतविद्याचार्यसाग्निचित्यसर्वतोमुखाति-
रात्रसाग्निचित्याप्तवाजपेययाजिगोविन्ददीक्षितवरनन्दनस्य श्रीयज्ञनारायण
यज्वनः कृतिषु रघुनाथविलासनाम्नि नाटके तुरीयोऽङ्कः

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

॥ श्रीरघुनाथविलासनाम्नि नाटके ॥

॥ पञ्चमोऽङ्कः ॥

(ततः प्रविशत्युद्यानवेद्यामुपविष्टो राजा विदूषकश्च)

राजा—द्वीपाद्द्वीपमवाप्य ये सपदि मां दीनं प्रसूनेषुणा
तत्रायोजयतां विलासविपिने तत्तादृशा योषिता ।
संसक्ते पदयोर्विधाय सविधे तामानयेदित्यहं
तापस्यै बत तादृशौ स्वयमदां तस्यै मणीपादुके ॥ १ ॥

(विमृश्य) तादृशमणिपादुकादिकार्पणपुरस्सरं मया नियोजितापि, समयाकरोति कथमद्यापि योगविद्या ? (विहस्य) अहो ! किमाचरितमधुना जनेन विधुनानेन समयोचितयोजनामनेन सुमनायमानेन । तथाहि—

तन्वंगीं स्वयमेव तावदभजंस्तां पादुकाभ्यामयं
तस्यै तां द्रुतमानयेति खलु ते यो दत्तवान्मोहतः ।
सोहं सम्प्रति सिद्धमञ्जनरसं जात्यन्धकस्यार्पय-
न्नसाल्लुब्धुमना विधानमिव हा हन्तास्मि चिन्ताकुलः ॥ २ ॥

विदूषकः—(सं) पुरा खु एसो णराहिवो तिव्थजव्ताव्वाजेण सिह्मळव्दीवं गमिउण, तव्थ दिव्वं कंवि वहूं पेव्खिअ, पुणोवि एदं जंबूदीवं आसादिअवंतो । तदो ताए तणवीए रूवं चिव्तफलए विलिहिअ, अव्तणो मणोविणोदणं कालिदो । अहं तु तदनन्तरमेव्व समीवादो इमिणो णअरं आगमिअ, एदं समव्तं तं देवीए से जादरूवाए पुरा संसेमि ; तदो एसो तञ्जाणअरं यादो, काएवि जोइणीए मणिपादुकाहिं सिह्मळव्दीवतीरव्थं एव्व इव्थिअं उवगमिअ, पुणोवि एदं तञ्जाणअरं

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आगमिदो। तदो जोअविज्जा णाम सा तावसी इमादो मणिपादुआओ आसादिअ, तं वहूं आहरेमित्ति, सिह्मळव्दीवं गदवदी। सा तारिसी तावसी झत्ति एव्व तं तणुविं आहरिव्सदि। दाव्पेरंतं असहमाणो एआरिसीं अवव्थं आसादिओ अयं सो वयव्सो। ताए आगमणकोदुअं णिव्व-व्टिदुं एव्व एदं पव्टणं अलंकुणंति णाअरिआ जणा। जाव ताए तणुविए आगमणं, दाव एदव्स वयव्सव्स मणोविणोदणं करेमि। (प्र) पुरा विअ सहे! एव्ताहे वि ताए चिव्तविलेहे चिव्तं णिहेहि।

(छाया) [पुरा खल्वेष नराधिपस्तीर्थयात्राव्याजेन सिह्मळद्वीपं गत्वा तत्र दिव्यां कामपि वधूं प्रेक्ष्य, पुनरप्येतं जम्बूद्वीप-मासादितवान्। ततस्तस्यास्तन्व्या रूपं चित्रफलके विलिख्यात्मनो मनोविनोदनं कारितः। अहं तु तदनन्तर-मेव समीपादस्य नगरमागत्यैतं समस्तं तं देव्या अस्यै जातरूपायै पुरा शंसामि; तत एष तज्ज्ञानगरं यातः कयापि योगिन्या मणिपादुकाभ्यां सिह्मळद्वीपतीरस्थामेव स्त्रियमुपगम्य, पुनरप्येतत्तज्ज्ञानगरमागमितः। ततो योग-विद्या नाम सा तापसी, अस्मान्मणिपादुके आसाद्य, तां वधूमाहरामीति सिह्मळद्वीपं गतवती। सा तादृशी तापसी झटित्येव तां तन्वीमाहरिष्यति। तावत्पर्यन्तमसहमान एतादृशीमवस्थामासादितोयं स वयस्यः। तस्या आगमन-कौतुकं निर्वर्तितुमेवैतत्पट्टणमलंकुर्वन्ति नागरिका जनाः। यावत्तस्यास्तन्व्या आगमनं; तावदेतस्य वयस्यस्य मनो-विनोदनं करोमि। (प्र) पुरेव सखे! एतावत्यपि तस्या-श्चित्रविलेखे चित्तं निधेहि।]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

राजा—सखे सारंग ! (विहस्य)

सम्प्रति बत चन्द्रकलाशतेन साक्षादयं समेतोऽहम् ।
विलिखितमस्या रूपं विलोक्य चेतो विनोदयामि कथम् ॥ ३ ॥

पश्य :

स्रोतःशतेन सुमनस्सरितो वृतायां
क्षोण्यां वसन्नतितृषा क्षुभितान्तरंगः ।
तन्वीत किं मरुमरीचितरंगलेखा-
मालोकयञ्जगति हन्त जनः प्रमोदम् ॥ ४ ॥

विदूषकः—(खं) अहो कहं मोहो वयव्सव्स ! (प्रं) ओहारअ महाराअ ! मिच्छापव्चयो एसो ।

(छाया) [अहो कथं मोहो वयस्यस्य ! (पूं) अवधारय महाराज ! मिथ्याप्रत्यय एषः ।]

राजा—(अनाकर्णितकेन पुरतः सदृष्टिक्षेपमुपसर्पन)
इतस्ततोपि वर्तमानासु चन्द्रकलासु ; तामेतामग्रगतामेव प्रथममभ्यर्थये। प्रसीद कल्याणि ! सकलसरसीरुहवदनाशिरोमणि ! पञ्चायुधसञ्चारिमणिपाञ्चालिके ! मामकीनसञ्जीवकले ! चन्द्रकले ! (पुनर्निरूप्य सोद्वेगं)

अपसरसि समीपादाः कथं कातराक्षि !
व्यतनुत न तवायं व्यक्तमत्रापराधम् ।
(विमृश्य) लीलया किमपसरसि विलासिनि ? (साजुनयम्)
अयमनवसरस्ते हन्त लीलां विधातुं
प्रसवधनुरसौ मां बाधते साम्प्रतं यत् ॥ ५ ॥

(समन्तादवलोक्य सविमर्शं) अहो स एष मोहोदयः !
सदृशी चन्द्रकलायाः साम्प्रतमेकापि दुर्लभा लोके ।
चन्द्रकलाशतमेतद्दिक्षु विदिक्ष्वपि च दृश्यते यस्मात् ॥ ६ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(विचिन्त्य)

भ्रमोयं प्राथनीयो मे प्रबोधादपि साम्प्रतम् ।
प्रत्यक्षयति तन्वंगीं प्रतिक्षणमहो यतः ॥ ७ ॥

विदूषकः–(स्वं) चिरेण सयं एव्व एसो पकिदिमापण्णो वयव्सो । इदो विसयंतरं पव्थाविअ, एव्ताहे एदव्स मणो विणोदेमि । (प्रं) वयव्स ! एणं लीलावणं सविसेसविअसंतणाणाविहाणो अहसंतदिमणोहरं पेव्खंता एव्व इह समंतदो विहरेमो ।

(छाया) [चिरेण स्वयमेवैष प्रकृतिमापन्नो वयस्यः । इतो विषयान्तरं प्रस्ताव्यैतावत्येतस्य मनो विनोदयामि । (प्रं) वयस्य ! एनं लीलावनं सविशेषविकसन्नानाविधानोकहसन्ततिमनोहरं प्रेक्षन्तावेवेह समन्ततो विहरावः ।]

राजा–(पुरो विलोक्य) शरदागमविकसितविविधानोकहनिवहशाखाशिखाऽनवरतविहरणपरशुकपिकमधुकरानिकरमुखरमवेक्षणीयरामणीयकमावहति ; तदिदमजवनशिशिरतरपवनशिशुविहृतिभवनं प्रमदवनम् । (उभौ परिक्रामतः)

विदूषकः–(अंगुल्यग्रेणाग्रतो निर्दिशन्) इदो पेव्ख ! वयव्स ! अंचुणेव्तोसवो पमदवणालंकारो सहआरो चिव्ठइ ।

(छाया) [इतः प्रेक्षस्व । वयस्य ! अञ्चु नेत्रोत्सवः प्रमदवनालंकारः सहकारास्तिष्ठति ।]

राजा– अयि भोः सकलभुवनविजययात्राप्रवृत्तासमायुधमहावीरसन्देशमानितविरुदकाहलायमानकोकिलकलारवोदयकृतसहकारकिसलय ! सहकार !

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

आयाति किं पथि वधूरधुनाऽन्तरीपा-
दाचक्ष्व मे त्वमवलीढनभोविभागः ।
प्रांशुत्वमाशु सफलं भवतोपि भूया-
त्सोयं जनोपि भजतात्सुखमद्वितीयम् ॥ ८ ॥

(पुनर्विभाव्य सहर्षं) सेयमायातीति प्रचलितपल्लवांगुलिभिरेष संज्ञापयति। (अन्यतोऽवलोक्य) परिसरगतोपि केसरतरुरिहासौ चलितेन शिरसा तदुदितमिदमनुमोदते ।

विदूषकः—(स्वं) अंहो एदव्स अयं मोहो अणिवारणिव्जो । कहंचण अव्णव्थ एणं आसव्तचिव्तं करेमि । (पूं) एदे खु वादेरिद-किसलयसाहासिहा सहआरकेसरतरुणो पिआए आगमणं कहं तुह सव्णावअंति ? इदो अव्णव्थ गमिव्सामो ।

(छाया) [अंहो ! एतस्यायं मोहोऽनिवारणीयः । कथञ्चनान्यत्रै-नमासक्तचित्तं करोमि । (पूं) एते खलु वातेरितकिसलय-शाखाशिखाः सहकारकेसरतरवः प्रियाया आगमनं कथं तव संज्ञापयन्ति ? इतोऽन्यत्र गमिष्यावः ।]

राजा—(अनाकर्णितकेन पुरतो दत्तदृष्टिस्त्वरितपदम्)

उद्याने पुनरिह हृद्यानेकतरुविताने सविधमावयो र्नववधानुगुणमनि-भृतो, मलयावनिभृतो निलयादतिसुकुमारः पवनकुमारः केसरावली-परागधूसराकारस्सनादमधुकरमुखरकिंकिणीसनाथस्सादरविस्तारित-किसलयहस्ताभिनयप्रशस्ताभिरितस्ताभिराकारितो यूथिकाभि, रालिं-गितो लवंगिकाभि, रुपलालितस्सप्तलताभि, रतीव मानितो मालतीभि, रन्तिकमुवं वासन्तिकानामेष सरळगतिरनुसरति ।

तदीयदेशसदेशसमागतं पवनकुमारकमेनमहमागमनवृत्तान्तं प्रक्ष्यामि पक्ष्मलाक्ष्याः ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अयि भोः! सकलदम्पतिलोकविभो दैवस्य सन्ततपरिस्पन्दनविजय-

स्यन्दन! जगदभिनन्दनचणचन्दनवनगन्धवहस्तनन्धय!

मलयशिखरिसानो मन्दमन्दं समेत्य
त्वमिह विहरमाणस्तावदारामभूमौ ।
कथय मम समीपं काचिदानीयमाना
सरणिषु किमु दृष्टा सानवद्याखिलांगी ॥ ९ ॥

विदूषकः-(स्वं) एसो पच्चूहसमयवलमाणपवमाणं दाहिणपवणं विअ सिवीअपिआआ वुत्तंतं पुच्छदि। इदो सयं एव्व पकिदिं वहिव्सदि वयव्सो। दावपेरंतं जोसंभावं संभावअंतो एव्व एणं णरेसरमणुसरेमि। (इत्यनुसरति)

(छाया) [एष प्रत्यूषसमयवलमानपवमानं दक्षिणपवनमिव स्वकीय-प्रियाया वृत्तान्तं पृच्छति। इतः स्वयमेव प्रकृतिं वक्ष्यति वयस्यः। तावत्पर्यन्तं जोषंभावं संभावयन्नेवैनं नरेश्वर-मनुसरामि।]

राजा-(पुनर्निरूप्य सावज्ञं)

अनिल! किमिति तूष्णीमेव हन्तापयासि?
प्रतिवचनमदत्त्वा प्रार्थ्यमानोपि कामम्।

(विमृश्य)

त्वयि न लगति सत्यं दोषलेशोपि किन्तु
प्रकृतिचपलतायाः प्रायशोयं प्रभावः ॥ १० ॥

मध्येपथं पवनमाणवकोयमाय-
न्दीर्घेक्षणानयनवीक्षणदानवाहः।
मान्द्यं वहन्गतिषु तेन मनोविमोहा-
दालम्ब्य मौनमथवा किमितः प्रयाति ॥ ११ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(पार्श्वतो विलोक्य सहर्षं) अये चिरेण गृहीतः परमार्थः। इतः प्रेषयामि तावदिमं निजयोषया सनाथमिह सरसि पत्ररथकुलावतंसं राजहंस-मधुना विधुनानात्वनिदानवदनामेनामायान्तीमतिरयादानेतुम्।

अयि भोः प्रहिणोमि भवन्तं, द्रुहिणोचिततुरंगमकुलपते! निखिलनभ-संगमप्रवेक! नीरक्षीरविभागचतुरविवेक! दक्षिणां हि मलयभुवो नळिनेक्षणामायान्तीं, क्षणादेव सुवृत्तां तां विदितमदीयवृत्तान्तां विधेहि। ततो न विलम्बते नितम्बवती सेयम्।

आनीता भवता यदीह सुतनूरह्नाय सैषा ततो
भूयाज्जालपदेषु संप्रति भवान्भूयस्तदा कीर्तिमान्।
त्वद्वंश्यः स यथा नळेन घटयन्दूतो विदर्भात्मजा-
मानेतुं त्वमितः प्रयाहि तदिमामद्यापि किं स्थीयते ॥ १२ ॥

(पुनर्निरूप्य सवितर्कं)

सरळगमनसौकुमार्यचौर्यं मयि परिशंक्य समानयेत्प्रियेति।
अयि मनसि न हंस चिन्तयेस्त्वं तव वितरामि वहस्व तत्र चीटीम् ॥१३

प्रत्युत; भवन्तं तादृशं सम्प्रत्युपचरत्येव चलाचलविलोचना।
(इति नाट्येन सहकारपल्लवं गृण्हाति) सहकारकिसलयचीटिकामेनां तूर्णमेव तदुचितै र्निक्षिप्तवर्णरेखां करोमि नखरैः। (नखविलेखननाटितकेन) (वाचयति)

सरळगतिचौर्यमस्मिन्मत्वा रोषं न मानिनि विधेहि।
आकर्णय हंसेन व्याहृतमखिलं ततस्तव दया स्यात् ॥ १४ ॥

अयि मराळ! वितरामि रसालकिसलयचीटीमिमां त्रोटिपुटे वहस्व।
(इतिकिञ्चिदन्तरं परिक्रामन्नूर्ध्वमवलोक्य सवितर्कं) अगृहीत्वैव चीटिकामन्यत्राप-याति कथं स राजहंसः! प्रयातु वा; किमनेन?

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अयमिदानीमानेता नतांगीमणेरव्याजमखिललोकोपकारको जगतीतलपतितातपकिरणतापजनितातंकापनोदनागदंकारश्चातककुलस्वापतेयं पुलोमकन्यापतेर्विलासोचितवाहनं वारिवाहः ।

वृत्तान्तमेनमहहा मम वीक्षसे त्वं
तत्तादृशं सुदृशमानय तोयवाह !।
द्वीपान्तरे वसति सानुदिनं विहारं
पाथोनिधौ रचयता भवतापि बुद्धा ॥ १५ ॥

(पुनर्निरूप्य सानुनयम्)

प्रमदानयनस्यास्य प्रत्युपकारो न विद्यते भवतः ।
प्रत्युपकारोति भवता वृष्ट्योपकृतन्नु विष्टपं सकलम् ॥ १६ ॥

अव्याजपरोपकारनिरतोयमिह तोयवाहः प्रार्थ्यमानोपि ; समया कृतकमहीभृतं, किमिति समयाकरोति ? (विचार्य)

ऐरावतीविरहजातमवाप्य खेद-
मापाण्डुरद्युतिरतीव कृशः श्रमेण ।
सोयं विहायसपथे चलितुं न शक्तः
शेते महीभृति कुहापि चिरेण मेघः ॥ १७ ॥

तदेतादृक्षं विरहवलक्षं कृशतरं पयोधरं प्रेयसीमानेतुं प्रेषयितुमनुचितम् । (विमृश्य; स्वं) अहो ! कथं ममापि मोहो जायते ? देवीपक्षपातिनः सारंगस्य समीपावस्थित एव द्वीपान्तरादिहागमनवृत्तान्तं तत्तादृक्षाया नळिनेक्षणायाः किं वा पुनरिदानीमवादिषम् ? न खल्ववगच्छामि ।

(सहर्षं परिवृत्य विदूषकं पश्यति)

विदूषकः–(स्वं) एसो सयं एव्व पकिदिमासादिअ, सागरमज्झादो ताए आअच्छंतीए चंदकलाए सअलं वि वुत्तंतं मोहेण वाहरंतो

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दाणिं साकूअहासहुल्लगल्लं समीवावट्ठिदं मं देवीपक्खवादिणं पेक्खदि। एदस्स अणुगुणं एव्व उत्तरं दायिस्सं। (पुं) महाराअ; माउत्तं; जं इदो गदा जोअविज्जा सागरमज्झादो मणिपादुआहिं चंदकलं एदस्सिं खण एव्व आहरिस्सिदि।

(छाया) [एष स्वयमेव प्रकृतिमासाद्य, सागरमध्यात्तस्या आगच्छन्त्याश्चन्द्रकलायाः सकलमपि वृत्तान्तं मोहेन व्याहरन्निदानीं साकूतहासफुल्लगल्लं समीपावस्थितं मां देवीपक्षपातिनं प्रेक्षते। एतस्यानुरूपमेवोत्तरं दास्ये। (पुं) महाराज; मोक्तम्; यदितो गता योगविद्या सागरमध्यान्मणिपादुकाभ्यां चन्द्रकलामेतस्मिन्क्षण एवाहरिष्यति।]

राजा-(स्वं) सकलानपि चन्द्रकलाया वृत्तान्तानयं तावद्देवीपक्षपाती जानाति। जानातु वा; किमनेन? (पुं) अलमनेन सञ्चरणायासेन। अयं च पुनरम्बरमध्यभागमध्यारूढो भगवानम्भोरुहिणीपरिणीः। तदनवरतविकसितसरसबालकेसरतरुविसरप्रच्छायपरिसरवलमानसरळपवमानशिशुवितायमानलघुलयकायमानबहलपरिमळलहरीपतितायां; इन्दुदायादसुषमाविशेषमानितायां; विषमायुधसकललोकसाम्राज्यपदाभिषेचनसमुचितायामिह तावदतिस्फारशिशिरस्फाटिकमणिरुचिलहर्यन्तरितहरितपर्यन्तवेदिकायामुपविशावः।

विदूषकः-जहा महाराजो भणदि। (परिक्रामतः)

(छाया) [यथा महाराजो भणति।]

विदूषकः-(स्वं) मोहपारवस्ससंजादस्स संचारस्स पबोहोदओ एव्व अवही; जहामतं हूणतप्पणाणं इच्छा एव्व ओसाणं। (पुं)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

एसा एव्व विदळिअफळिहसिलासलाइआणिव्मिआ णव्मवेदि-
आ। ता एव्थ उपविसामो। (यथा योग्यमुपविशतः)

(छाया) [मोहपारवश्यसंजातस्य सञ्चारस्य प्रबोधोदय एवावधिः।
यथामतं हूणतर्पणानामिच्छैवावसानम्। (पुं) एषैव
विदळितस्फटिकशिलाशलाकिकानिर्मिता नर्मवेदिका।
तदत्रोपविशावः।]

विदूषकः—लच्छीएवि जदीयरूवकणदो लज्जादिअं जायदे
जाए गाणकला हि किंच विहिणो जाया जदा दीसइ।
अग्गे वेत्तकराहिरुव्धसरणी अंतेसदाचारिणी
चेराहीससुदा खु दे ण लहदे सव्वंवि सेयं विहो ॥ १९ ॥

छाया [लक्ष्म्या अपि यदीयरूपकगतो लज्जादिकं जायते
यस्या गानकला हि किञ्च विधेर्जाया यदा दृश्यते।
अग्रे वेत्रकराभिरुद्धसरणी अन्तेसदाचारिणी
चेराधीशसुता खलु ते न लगते सर्वमपि सेयं विभो ॥]

तुण्डीरमंडलमहीतुहिणंसुकण्णा
लावण्णवेहवविहूदरदिव्पहावा।
दोवारिकीणिअरधूणणदूयमाणा
इच्छेदि दे सुचिरमिव्खणलव्खभावम् ॥ २० ॥

(छाया) [तुण्डीरण्मडलमहीतुहिनांशुकन्या
लावण्यवैभवविधूतरतिप्रभावा।
दौवारिकीनिकरधूननदूयमाना
इच्छति ते सुचिरमीक्षणलक्षभावम् ॥]

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मअणवलदुच्चणडणे मरहट्ठाहिवसुदा वियड्ढावि ।
लक्खीहोइ णहीयं रहुणाहमहीव तुज्झ वीक्खाणम् ॥ २१ ॥

(छाया) [मदनवलदुच्चनटने महाराष्ट्राधिपसुता विदग्धापि ।
लक्ष्यीभवति नहीयं रघुनाथमहीप तव वीक्षाणाम् ॥]

किञ्च ; अण्णाओ ताओ अगण्णलावण्णादिसअविविहकलाविण्णाण कुसलाओ राजण्णाणं कण्णाओ, निबिडतरं ते अन्तेउरंते वसंते । किं बहुणा ;

पंडमंडलपजेंदणंदणा संमदा वि तुह सम्मुहत्तणम् ।
वारिऊण परिवारमत्तणो गाहदे णणु कहं कहंचण ॥ २२ ॥

(छाया) [किञ्चान्यास्ता अगण्यलावण्यातिशयविविधकलाविज्ञान-कुशलाः राजन्यानां कन्या निबिडतरं तेऽन्तःपुरान्ते वसन्ते । किं बहुना ;

पाण्ड्यमण्डलप्रजेन्द्रनन्दना सम्मतापि तव सम्मुखत्वम् ।
वारयित्वा परिवारमात्मनो गाहते ननु कथं कथञ्चन ।]

ता एदारिसस्स तुह वि असरिसलावण्णादिसअतिणीकिदसअलरमणी विलासस्स, ताए चंदकलाए कहं अणिवारिओएसो अणुराओ ?

(छाया) [तदेतादृशस्य तवाप्यसदृशलावण्यातिशयतृणीकृतसकल-रमणीविलासस्य, तस्यां चन्द्रकलायां कथमनिवारित एषोनुरागः ?]

राजा–(विहस्य) सखे सारंग !

उचिते वस्तुनि दृढमुदेति यदि न स्पृहा ।
विशेषदर्शिता का वा विषये विदुषस्तदा ॥ २३ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विदूषकः–(साश्चर्यं) चंदकलाए ताए सोंदरिअं तारिसं विहावेदि ; जेण तुमं सुसमालवजिदपंचसरोवि एव्वमिच्छेसि ।

(छाया) [चन्द्रकलायास्तस्याः सौन्दर्यं तादृशं विभाव्यते ; येन त्वं सुषुमालवजितपञ्चशरोपि ; एवमिच्छसि ।]

राजा–कथंचन तस्याः पञ्चशरविजयास्त्राधिदेवतायास्तावदहं रूपरेखातिशयं निरूपयामि ! अवधारय सावधानम् ।

विदूषकः–(स्वं) एव्वं वि णाम एसो मणोविणोदणं वहेदु वयव्सो । (प्रं) अवहितो एव्व अयं वयव्सो ।

(छाया) [एवमपि नामैष मनोविनोदनं वहतु वयस्यः । अवहित एवायं वयस्यः ।]

राजा–सुधाकरः सर्वसुखावहः कथं पयोरुहं चारु परं निरस्यति ।
इतीवधाता हरिणेक्षणामणेरयूयुजत्ते वदनाक्षिलक्ष्यतः ॥ २४ ॥

विस्तारिस्तिमितप्रसंगचतुरस्निग्धालसाकुञ्चित-
व्यग्राकेकरलोलमुग्धमसृणस्मेरप्रसन्नोत्सुकैः ।
आलोकैर्हसितासिताम्बुजवनैराविष्कृतप्रेमभि-
र्व्याख्यातीव तदीयनेत्रमनिशं व्यक्तं सुमास्त्रागमान् ॥२५॥

उपेत्य पश्चादुपगूहनेच्छया विलासिनो वक्त्रविधोः सविभ्रमम् ।
कचक्षपाया विहितौ कराविव प्रकाशते भ्रूयुगळी वधूमणेः ॥२६

तस्याः किल वसुधालंकृते विधाता प्रथममेव विधाय पृथुलं कुचयुगळं नितम्बबिम्बं च, ततस्तयोरूर्ध्वमधोपि तदङ्गकानि सृजन्नुपेक्षया मध्यमं किमत्याक्षीत् !

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वक्षोजद्वयधूर्वहं कतिपये वादेष्वसन्मध्यमं
दिष्ट्या सिंहळभूपुरन्दरभुवो दृष्टान्तयन्तो मुहुः ।
शून्यं कार्यकृतौ समर्थमिति ये खैरं जयन्ति द्विषः
तेषां माध्यमिकाभिधानमुचितं धात्रा कृतं धीमता ॥ २७ ॥

सृजता विधिना तदंगलेखां प्रथमं या लिखिता प्रमाणरेखा ।
अपरत्र कृतेरलक्षिताऽसावकृते रोमलताऽधिमध्यमास्ते ॥ २८ ॥

पद्मं यदि द्युतिमुषं पदयुग्ममस्याः
नोऽताडयिष्यत रुषा नळिनेक्षणायाः ।
तस्मिन्सुकोमळतले दृढघातजाता
तद्रेखिकाप्यरुणिमा न तदाऽलगिष्यत् ॥ २९ ॥

किं बहुना ? तस्याः खलु ;

घनत्वं मेघानां कचनिचयकान्तेरवमतिः
निरासो राजत्वं लपनरुचिलेशादुडुपतेः ।
अहार्यत्वं निन्दा हर हर कुचेन क्षितिभृतां
सुवर्णत्वं हेम्नस्तनुसुषमया किञ्च विधुतिः ॥ ३० ॥

विदूषकः—हंहो रूवहेयं ! हंहो भागहेयं ! वि सिंहळभूपुरन्दरणंदणाए । ताए एव्वंभूदाए जणणी किदव्था तादो वि । (विमृश्य) अव्चव्यमिदं वदेमि ; सव्वेवि वंसव्पहवा णरेंदा संबंधिणो होंति जदो अमिदे । होदु ; पुरा परिसरव्मि अणुसरंतं मं तव्थ सिंहळव्दीवे कहं व तुवं पदारिअ, तारिव्खरूवं वहूं वि पेव्खहि अ ?

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [अहो रूपधेयं! अहो भागधेयं! अपि सिंहलभूपुरन्दर-नन्दनायाः। तस्या एवं भूताया जननी कृतार्था; तातोपि। (विमृश्य) अक्षय्यमिदं वदामि। सर्वेपि वंशप्रभवा नरेन्द्रा-स्सम्बन्धिनो भवन्ति; यतोऽमितम्। भवतु; पुरा परि-सरेप्यनुसरन्तं मां, तत्र सिंहलद्वीपे, कथं वा त्वं प्रतार्य तादृक्षरूपां वधूमपि प्रेक्षसे च?]

राजा-तत्र तावद्वनितामणेस्तस्याः पदसरणिमनुसरतो मम, तदारण्य-परिसरगतोपवनादजवनपवनानीतं वल्लकीरवोल्लसितं किमपि गीतं, मुग्धतरं कर्णयोरमृतमदुग्ध। ततस्तादृशं सुदृशमदर्शम्।

विदूषकः-(सानुस्मरणं) (विहस्य) मए वि ताए सा दिव्ठपुव्वा एव्व पअपंती। मह तदा बहुव्खाविदाअमाणजाठरव्गिसिहाव्गधूम-धूसरिदव्खिणो, ताए जावअरंजदाए पअपंतिए सव्तणिवहर-व्तसव्तदुव्ठसव्दूलपअबुद्धि उव्पव्णा। सारंगसिंगं विअ वव्क-वव्ककोमळंगं विअव्सरविविहव्सरमणोहरदाए कव्णरसाअणं गाणं च कव्णिदं।

(छाया) मयापि तस्यास्सा दृष्टपूर्वैव पदपंक्तिः। मम तदा बुभुक्षा-विदार्यमाणजाठराग्निसिखाग्रधूमधूसरिताक्षस्य, तस्यां याव-करञ्जितायां पदपंक्तयां सत्वनिवहरक्तसक्तदुष्टशार्दूलपद-बुद्धिरुत्पन्ना। सारङ्गशृंगमिव वक्रवक्रकोमळांगं विकस्वर-विविधस्वरमनोहरतया कर्णरसायनं गानं चाकर्णितम्।]

राजा-(विहस्य) अहो! संगीतशास्त्रसंगी बोधो वयस्यस्य।

विदूषकः-तदो विविहसाहिणं छायाहिसिसिरे तव्थ पदेसे णीसव्दा-हिरव्मे मए णिव्दाणि। तदो ताए तुह दंसणं पेअसिए आसी।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [ततो विविधशाखिनां छायातिशिशिरे तत्र प्रदेशे, निःशब्दातिरम्ये मया निद्राणि। ततस्तया तव दर्शनं प्रेयस्याऽऽसीत्।]

राजा–(विहस्य) अहो! क्षणमात्रमपि बुभुक्षां न सहन्ते ब्राह्मणाः।

विदूषकः–एव्व तुए एव्व अवरव्धं।

(छाया) [अत्र त्वयैवापराद्धम्।]

राजा–कथमिव?

विदूषकः–तह हि: अह्महे तुझ करदेसंगदाणिवारिदाणवरदव्णदाणभोअणा। भासणे 'बह्मणा खणमेव्तं वि असणाअं ण सहंति'। इदो वुव्तंतो तुह वअणदो एव्व जाणिदो।

(छाया) [तथा हि: वयं तव करदेशंगतानिवारितानवरतान्नदानभोजनाः। भाषणे 'ब्राह्मणाः क्षणमात्रमप्यशनायां न सहन्ते'। इतो वृत्तान्तस्तव वचनादेव ज्ञातः।]

राजा–(निश्वस्य) नागता कथमद्यापि योगविद्या?

विदूषकः–महाराअ! दाणिं एव्व सा आगमिव्सदि।

(छाया) [महाराज! इदानीमेव साऽऽगमिष्यति।]

(नेपथ्ये कलकलः)

राजा–भवनद्वारि कोयं कोलाहलः?

(ततः प्रविश्य प्रतीहारः)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रतीहा–विजयतां महाराजः! सवयोरूपधेयोचितनैपथ्याभ्यां मिथ्यानिर्वचनमध्याभ्यामुभाभ्यामुपाश्रितपार्श्वावलम्बनपट्टाम्बरातिरकरिणीपर्यन्तपरिष्करणशातकुम्भशलाकाशतसूत्रिततत्तादृशमुक्ताफलधोरणीरुचिसारणीसहस्रेणक्षालितसकलाकाशावकाशां मणिशिबिकां पुरस्कृत्य, रमणीयवेषै रमणीजनैराह्रियमाणविविधोपहरणप्रपञ्चः; सञ्चरन्निव काञ्चनशैलः; काञ्चन योगिनीं च सशिष्यां प्रतिविनीतवेषो व्यासारयन्निह गृहबहिरंकणे वसति; विजयकेतुनामा सिंहलद्वीपसुत्रामा।

राजा–(ससंभ्रमं) भ्रमरक! सकलानपि भवनकक्ष्यान्तराणि निरन्तरमुपाश्रितानवनीपालान्सपरिजनानपसारय।

भ्रभरकः–यदाज्ञापयति राज्ञामधिपतिः। (इति निष्क्रान्तः)

राजा–सारंग! गृहबहिरंगणभुवि संगतं विजयकेतुमेनं परिमितजनमतिवैलक्ष्यावहानिह कक्ष्याभेदान् प्रदर्शयन्नेव प्रवेशय। तत्तादृशनासाभरणमुक्तामणिमासाद्य, सद्यएव तावदिन्दिरामन्दिरान्तराळभुवि; निरन्तरकृतसन्निधानविभवायाः कलशजलनिधानकन्यकायाः सन्निधावहं कल्याणसमयोचितं भद्रासनमध्यासे।

विदूषकः–जं अहिरुइदं महाराअस्स। (इति निष्क्रान्तः)

(छाया) [यदभिरुचितं महाराजस्य।]

राजा–(परिक्रम्य) अयमेव तावदिन्दिरामन्दिरान्तराळविलासिन्या जलनिधिकन्यायाः सन्निधिः। तदत्राधिभद्रासनमुपविशामि। (इति क्वचिदुपविशति)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विदूषकः–(उपायनहस्ताभ्यां सखीचेटीभ्यां सेव्यमानया नायिकया; प्रतिभावतीयोगविद्याभ्यां सहितेन विजयकेतुना च; सह प्रविशति)

विदूषकः–(समन्तादवलोक्य) एसो एव्व रहुणाहजणाहिणाहस्स घरबहिरवेदिआपरिसरं गदो बाव्हालिव्पदेसो। सव्वेवि पेव्खंतु।

(छाया) [एष एव रघुनाथजनाधिनाथस्य गृहबहिर्वेदिकापरिसरं गतो बाह्याळिप्रदेशः। सर्वेपि प्रेक्षन्ताम्।]

प्रतिभा–(समन्तादवलोक्य) (साश्चर्यं) वत्स विजयकेतो!

सेवाहेतोरहमहमिकासंगतानां नृपाणां
सम्मर्देन प्रतिपदमपि स्रस्तहारावळीभिः।
मिश्रा माद्यद्गजमदझरीमेदुरा मेदिनीयं
गाढं शश्वत्पटुखुरपुटै र्घट्यते घोटकौघैः ॥ ३१ ॥

विजयकेतुः–अहो! रथनाथजनाधिपतेरत्यधिकमाधिपत्यम्।

योगविद्या–बाव्हालिव्थलमेव्व जव्स विहिदव्पव्चत्थिलोओसवं
पेव्खंतो स वहेदि सिह्मळमहीपालो हि अंविह्मअं।
ता एदं रहुणाहभूमिपइणो तव्साहिवासोजिदं
गेहं पेव्खअविह्मअं विवणिदुं के वा परे पंडिदा ॥३२॥

(छाया) [बाह्याळिस्थलमेव यस्य विहितप्रत्यर्थिलोकोत्सवं
प्रेक्षन्स वहति सिह्मळमहीपालो हि अविस्मयम्।
तदेतद्रघुनाथभूमिपतेस्तस्याधिवासोचितं
गेहं प्रेक्षकविस्मयं विवर्णयितुं के वा परे पंडिताः ॥]

प्रतिभा–सत्यमेवैतत्।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विदूषकः–(विहस्य) भअवदि ! राअण्णाणं अण्णाणं वि एक्करूवो एव्व विह्मओ। जह अट्ठादसजादीणं वि एक्करूवो एव्व खर्वो।

(छाया) [भगवति ! राजन्यानां अन्यानामपि ; एकरूपएव विस्मयः। यथाष्टादशजातीनामप्येकरूप एव खर्वः।] (सर्वे हसन्ति)

सखीचेट्यौ–भट्टिदारिए ! सअलभूमंडलाहंडलस्स रहुणाहभूविहुणो देवी भविअ अह्मभाइ विह्मरेहि।

(छाया) [भर्तृदारिके ! सकलभूमण्डलाखंडलस्य रघुनाथभूविभोर्देवीभूत्वाऽस्मान्विस्मर।]

नायिका–अत्ताणं विसुमरंति वि एत्ताहे तुह्मे ण विसुमरिस्सं।

(छाया) [आत्मानं विस्मरन्त्यपि ; युवां न विस्मरिष्ये।]

सखीचेट्यौ–(समन्तादवलोक्य) भट्टिदारिए ! आअण्हणरहा एव्व दिट्ठअरा अह्मकेरे अन्तरीवंतरे। एत्थ उण थलरहावि पंतेसु दिसंते। पेक्ख।

(छाया) [

नायिका–(परिवृत्य पश्यति)

विदूषकः– मिहिरपदरोहिसिहरट्ठिदमउरा थलरहाविहंसते।
पेक्खंताणुववंता दिव्वंता एत्थ आअंता ॥ ३३ ॥

(छाया)]

विजयकेतुः–भगवति ! कथमवसरोचित एव व्यवहारोऽमुष्य !

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रतिभा–अथ किम् ।

योगविद्या–एसो वालमित्तं रहणाहभूविहुणो सारंगो णाम बह्मणो ।

(छाया) [एष बालमित्रं रघुनाथभूविभोः सारंगो नाम ब्राह्मणः ।]

विजयकेतुः–प्रागेव श्रवणसरणीमवतीर्णो ममापि सारंगः ।

(सर्वे परिक्रामन्ति)

प्रतिभा–(पुरस्तादवलोक्य) निरन्तरखचितपुरन्दरमणिगणकन्दळित किरणवृन्ददुरधिगमारोहणसरणीरोहणशिखरारोपणविधिधीरो-नवनवशातकुम्भस्तम्भजातानुगुम्भजम्भभेदिसम्पत्संभवादिका-रणनगरभूभृदायतशिखखारिताशिशिरकरसोमतारकानिकररुचि-रुल्लोलविस्फुरदुल्लोचकच्छविकल्लोलविस्मयवल्लोचनजनतो मकर-तोरणविभाविभ्राजिताभ्राजिरोऽयमत्युच्चतरवज्रमयवेदिकोच्चर-दभीशुभी रामणीयकवेक्षणीयमावहति; जगदण्डपरिमितो मण्डपः ।

योगविद्या—एसो रहुणाहजणाहिपइणो महाणवमीमुहाकेक्क मंगळमहूसवसमयाश्झासणजोग्गो विचित्तणिम्माणसमग्गो घरबहिखेदिआमंडवो ।

(छाया) [एष रघुनाथजनाधिपतेर्महानवमीमुखानेकमंगळमहोत्स-वसमयाध्यासनयोग्यो विचित्रनिर्माणसमग्रो गृहबहिर्वेदिका मंडपः ।]

विजयकेतुः–अस्य रघुनाथजनाधिपतेरखंडजगतीमंडलाधिपत्यस्यानु-रूप एष मंडपः ।

विदूषकः–पेक्खंतो रहुणाहहिंधुरसणापाकारिणो वेहवं
माहंमं तुममेव वोढुमुइतो मूढा परे पत्थिवा ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

गंभीरप्पकिदी णदीअहिवदी कामं समुज्जिभए
चंदं पेक्खिअ सम्मकम्मणअरो सम्मंणवेसंतआ ॥३४॥

(छाया) [प्रेक्षन्रघुनाथसिन्धुरशनापाकारे वैभवं माहात्म्यं त्वमेव वोढुमुचितो मूढाः परे पार्थिवाः। गम्भीरप्रकृतिर्नद्यधिपतिः कामं समुज्जृम्भते चन्द्रं प्रेक्ष्य साम्यकर्मकरः साम्यं न वेशन्तकाः ॥]

विजयकेतुः—वैदुष्यं वदितुं स एव निपुणो वातन्वयग्रामणीः
सौन्दर्यं नवितुं स एव चतुरो मन्दानिलस्यन्दनः।
शौण्डीर्यं च स एव गातुमुचितस्सौवर्गलोकाधिपो
यस्यासौ रघुनाथपार्थिवमणिर्वर्ण्यः कथं मादृशैः ॥३५॥

विदूषकः—होदु; तह वि अहुणादणेसु जणाहिवेसु रहुणाहजणाहिपइणो गुणान्गणेदुं तुमं एव्व विअव्हो। एव्थ उण मंडवे णिवसंतं मव्तंडवंसमंडणं दसकंठकंठकअलिकंडखंडणवेदंडसुंडाइदबाहुदंडाहि रामं पणमिअ, वयं एदस्स रहुणाहभूविहुणो इमिणो घरं पविसामो।

(छाया) [भवतु; तथापि अधुनातनेषु जनाधिपेषु रघुनाथजनाधिपतेर्गुणान्गणयितुं त्वमेव विदग्धः। अत्र पुनर्मण्डपे निवसन्तं मार्तण्डवंशमंडनं दशकंठकंठकदळीकांड खंडनवेतंडशुण्डायितबाहुदंडाभिरामं रामं प्रणम्य वयमेतस्य रघुनाथभूविभोरस्य गृहं प्रविशामः।]

विजयकेतुः—उचितमेवोदितमेतेन। तथैवाऽस्तु।

(सर्वेपि वेदिकां नाट्येनारोहन्ति)

विजयकेतुः—(पुरस्तादवलोक्य)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वामेनायमुदञ्चितेन कलयन्नामौलि बाणासनं
हस्तेनोपगतेन बाणमपरेणाजानुकं सानुजः ।
पार्श्वे कामपि कामिनीमनुकलं भावार्द्रमालोकय-
न्कोप्यग्रे महिमा दृशोर्विजयते कोदण्डदीक्षागुरुः ॥३६॥

विजयकेतुः—(पार्श्वतोऽवलोक्य) वत्से चन्द्रकले! वन्दस्व भगवन्तं निजधामतृणीकृताजगवं तं शिलातरुणीकरणविद्याचणचरणरेणुपरमाणुं दशवदनवदनसरसिजवनविपाटनकरेणुशुण्डायितभुजदंडातिरमणीयां समनीयां समपि करुणावलोकनेन महान्तमातन्वन्त, वरुणालयमिव गम्भीरं, शौर्यमिव सशरीरं, शौर्यवंशंकरीरम् ।

नायिका(नाट्येन प्रणमति)

प्रतिभा—(साञ्जलिबन्धं)

क्ष्मानम्रंकरणमुनीन्द्रसोदरेश
पश्यांघ्रिश्वशुरपदाब्जरेणुलेश ।
स्वोपायार्जितधरणीसुरत्वमौनि-
प्राकान्ताध्वरपरिरक्षणप्रवीण ॥ ३७ ॥

तुभ्यं दृक्प्रहरणदुर्धराशुगास-
स्थेमैकावधिबल देवसार्वभौम ।
भूयांसो रघुकुलभूषण प्रणामा
भूयासु र्द्रुहिणपुरन्दरादिवन्द्य! ॥ ३८ ॥

विजयकेतुः—सखे सारंग! कुत्र वसति रघुनाथभूवृत्रमथनः?

विदूषकः—इंदिरामंदिराभिहे अंतेउरंदेवसंतिए इंदिराए सण्णिहिमूसणं सिंहासणं अब्भासेइ । ता एदु एदु भवं ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(सर्वे परिक्रामन्ति)

विजयकेतुः–इह कोयं लक्ष्मीविलासो नाम मण्डपः ?

विदूषकः–चडव्विसहाडअमअमंडवंतरिदा एसा भव्दसाला। इदो अ व्ववहिदो एव्व, सो लच्छीविलासो। ता झत्ति एव्व गमिव्सामो। (सर्वेपि किञ्चिदन्तरं गच्छन्ति)

(छाया) [चतुर्विंशहाटकमयमंडपान्तरिता एषा भद्रशाला। इतश्च व्यवहित एव स लक्ष्मीविलासः। तज्झटित्येव गमिष्यामः।]

योग–(समन्तादवलोक्य) एसो लच्छीविलासो। सव्वेवि पेव्खंतु। पुरा एव्थ एव्व एसो रहुणाहजणाहिणाहो एदं मणिपादुआदिअं (पदिसिआ) एदावपेरंतं अहं वि जणेसर जाणेमि।

(छाया) [एष लक्ष्मीविलासः। सर्वेपि प्रेक्षन्तु। पुराऽत्रैवैष रघुनाथजनाधिनाथ एतन्मणिमादुकादिकं (प्रतिष्ठवान्) एतावत् पर्यन्तमहमपि जनेश्वर जानामि।]

विदूषकः–पव्चहं वि पव्चूहसमये एव्व किदमव्जणविही अंतेडरन्तादो आगव्छंतो, एव्थ वसंतं पुरिसोत्तमं वंदिअ, तदो जवसालं गदाणं अहिजादजव्मणाणं बह्मणाणं आसिसं ओदंसीकरमाणो, तुलापुरुसादिअं च दाणं सोव्तिआणं संतोसेण पअव्छंतो, पअव्छंतो, सअलभूवालकुलकोडीरविराजिरअणसंदोहणीराजिदपदारविंदो अव्तसमाणभूसणरमणीयपाठकनिवहधोरणीगीयमाणबाहाव्पहावो मव्झव्णसमये पुणोवि अंतेडरं पाविसदि रहुणाहभूवासवो।

(छाया) [प्रत्यहमपि प्रत्यूषसमय एव कृतमज्जनविधिरन्तःपुरान्तादागच्छन्नत्र वसन्तं पुरुषोत्तमं वन्दित्वा, ततो जपशालां

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

गतानां अभिजातजेमनानां ब्राह्मणानामाशिषमवतंसीकुर्वाणस्तुलापुरुषादिकं च दानं श्रोत्रियाणां सन्तोषेण प्रयच्छन्सकलभूपालकुलकोटीरविराजिरत्नसन्दोहनीराजितपदारविन्द आत्मसमानभूषणरमणीयपाठकनिवहधोरणीगीयमानबाहाप्रभावो ; मध्याह्नसमये पुनरप्यन्तःपुरं प्रविशति रघुनाथभूवासवः ।]

विजयकेतुः—अहो ! कथमखंडितसकलभूमंडलाधिपत्येपि भवत्येतादृशं रघुनाथजनाधिपतेरतिपवित्रं चरित्रम् !

प्रतिभा—अस्य खलु रघुनाथजनाधिपतेः—

श्रुतिपथमवतीर्णं शोभनं यच्चरित्रं
प्रबलमतिशयोक्तिप्रत्ययं प्रागतानीत् ।
तदिह नयनयोर्मे तन्वदातिथ्यमेवं
नयति बत समृद्धिं न स्वभावोक्तिलेशम् ॥३९॥

विजयकेतुः—(समन्तादवलोक्य साश्चर्यं)

प्रणवखलयेषु प्रौढमेको विधत्ते
मृदुपदगतिलास्यं मेघनादानुलासि । (सी)
तदनुगुणमिहैते तन्वते कीरडिम्भाः
प्रतिमुहुरपि गीतिं प्रान्तराज्यं मृगीकम् ॥ ४० ॥

सखीचेट्यौ—(जनान्तिकं) भट्टिदारिए ! तुह अणुरूवो वल्लहो रहुणाहभूवालो अ ; तुए वल्लिदाए सिहरिणीए केकिणीए णच्चणकलाचडरो एसो कलावी ; मंजुगिराए सारिआए एसो सुअकुलवतंसो अंगीकिदसरलसंगीदक्कमो पंजरगदो पंचवण्णो कीरजुवाणो ; एदाए कंठावलंबिदमणिवंटाविभूसिदाए एणीए वि अह्मेहिं आणीदो मणोहरणामो एणो ।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

(छाया) [भर्तृदारिके ! तवानुरूपो वल्लभो रघुनाथभूपालश्च ; त्वया वर्धितायाः शिखरिण्याः केकिन्या नर्तनकलाचतुर एष कलापी ; मञ्जुगिरायाः शारिकाया एष शुककुलवतंसोऽङ्गीकृतसरळसंगीतक्रमः पञ्जरंगतः पञ्चवर्णः कीरयुवा ; एतस्याः कंठावलम्बितमणिघंटाविभूषिताया एण्या अपि, अस्माभिरानीतो मनोहरनामैणः ।]

नायिका—सव्वं उववण्णं । तह एव्व अह्म करह्म ।

(छाया) [सर्वमुपपन्नम् । तथैव वयं कुर्मः ।]

विदूषकः—सहे विजयकेदो ! एव्थ वसंतं पुरुसोव्तमं वंदामो ।

(सर्वेपि परिक्रायन्ति)

(छाया) [सखे विजयकेतो ! अत्र वसन्तं पुरुषोत्तमं वन्दामः ।]

योग—एदं देवपूजाघरअं ।

(छाया) [एतद्देवपूजागृहम् ।]

विजयकेतुः—(साञ्जलिवन्धं)

अज्ञातकार्मुकगुणाहतिपेशलेन
तूलेन च क्वचन गन्धवहेन पूर्णे ।
स्वच्छोत्तरच्छदवति स्वत एव मञ्चे
शेते पुमान्निगमशवेधिरेष कोपि ॥ ४१ ॥

प्रतिभा—उपैति निद्रामुपवर्हयन्निजं
भुजंगमेन्द्रे किल दक्षिणं भुजम् ।
विशंकटान्तर्विनिविष्टविष्टप-
त्रयी जरन्मास मयीति माधवः ॥ ४२ ॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

वत्से! वन्दस्व भगवन्तमरविन्दलोचनम् ।

नायिका—(प्रणमति)

विजयकेतुः—सखे सारंग! पुनरितः कुत्र वा सकलपार्थिवानन्दितमिन्दिरामन्दिरम्?

विदूषकः—इमादो लच्छीविलासादो दाहिणा अंतेउरजणाणं विविहकलापरिसीलणसाला। तदन्तरगतो एव्व सो सिहरंतरिदमिहिररहपहो सिरिरामसउहो तदो अवरोत्तराए दिसाए भव्महव्मगदपडिमाकरपडिघटिअताडिदघंटाणिणदमुहरोदरं विजअभवणं। तदो पच्छा अव्ववहिदं एव्व तं इंदिरामंदिरं। ता एदु एदु भवं।

(सर्वे परिक्रामन्ति)

(छाया) [अस्माल्लक्ष्मीविलासाद्दक्षिणाऽन्तःपुरजनानां विविधकलापरिशीलनशाला। तदन्तरगत एव स शिखरान्तरितमिहिररथपथः श्रीरामसौधः। ततोऽपरोत्तरायां दिशायां भर्महर्म्यगतप्रतिमाकरप्रतिघटिततताडितघंटानिनदमुखरोदरं विजयभवनम्। ततः पश्चादव्यवहितमेव तदिन्दिरामन्दिरम्। तदेत्वेतु भवान्।]

विदूषकः—एदं इंदिरामंदिरदुवारं। एव्थ पविसामो।

(सर्वेपि नाट्येन प्रविश्य सविस्मयं पश्यन्ति)

(छाया) [एतदिन्दिरामन्दिरद्वारम्। अत्र प्रविशामः।]

विजयकेतुः—(समन्तादवलोक्य)

दृश्यन्ते मणिभित्तिचित्रनिवहे दिक्पालकाः कुत्रचित्
प्रायो जालकदर्पणेषु मिळितो भानुश्चिराद्भाव्यते।

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्तम्भेष्वत्र हि मार्मणेषु सुमनःशैलोपि कश्चित्ततः
स्तोतुं शक्यति पार्थिवेषु तदिदं कोवेन्दिरामंदिरम् ॥४३॥

प्रतिभा—(परिक्रम्य सहस्तनिर्देशं) अत्र पुनरिन्दिरामन्दिरे ;
उपर्यधोभित्तितटीसमुल्लसत्कल्याणशोभाकदळंकृतान्तरे ।
परंकरस्पर्श वशेन मार्मणाज्ञानन्त्यहो स्तम्भगणाज्ञनाः क्वचित् ४४॥

योगविद्या—(कतिचित्पदानि गत्वा, सहस्तनिर्देशं)

णेम्मल्लदिब्ठबहिरब्थलमेब्थ देशे
भिव्तिं विसुव्धफलिहाकलिदं कुहावि ।
भिव्तिव्णेण जणदागदिरोहणादो
जाणंदि णब्थि परहा अवरो उवायो ॥ ४५ ॥

(छाया) [नैर्मल्यदृष्टबहिःस्थलमत्र देशे
भित्तिं विशुद्धस्फटिकाकलितां कुहापि ।
भित्तिस्तनेन जनतागतिरोहणतो
जानंति नास्ति परथाऽपर उपायः ॥]

विदूषकः—सहे विजयकेदो ! एदं पदेसं पेव्ख ।

(छाया) [सखे विजयकेतो ! एतं प्रदेशं प्रेक्षस्व ।]

विजयकेतुः- (वरिवृत्य पार्श्वतोऽवलोकयन्) सखे ! विषममिव भूतलमिद-
मवलोक्यते ।

विदूषकः—(सोपहासं) सहे! णेदं भूदलं विसमं; किन्तु तुह बुव्धि
एव्व ।

(छाया) [सखे! नेदं भूतलं विषमं; किन्तु तव बुद्धिरेव ।]

विजयकेतुः—(पादेन भूतलं परामृश्य, साश्चर्यं) इदं हि;

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

हीरांकूरसुनिर्मलं क्षितितलं हेम्ना कृतानामथं
स्तम्भानामपि मंडपोपरिभुवां सम्भावयद्भिम्वनाम् ।
स्तम्भैरुच्चतरैरिव क्षितितलं सौवर्णमध्यासितं
गाम्भीर्येण युतं स्थलादपरतः क्वाप्यत्र चित्रीयते ॥

सखी—हंजे चंदिमे! एव्थ पदेसव्मि वसंति सियरसंतदिमणोहरा उव्णदिसालिणो कंचाणाकलिदा मंचणिवहा ।

(छाया) [अयि चन्द्रिके! अत्र प्रदेशेपि वसंति शिखरसन्ततिमनोहरा उन्नतिशालिनः काञ्चनाकालिता मञ्चनिवहाः ।]

चेटि—हला कुमुव्जइ! अव्चुव्णदिसाली मलयणामो लीलापासादो सो एआरिसो एव्व ।

(छाया) [अयि कुमुद्वति! अत्युन्नतिशाली मलयनामा लीलाप्रासादः स एतादृश एव ।]

सखी—मंचा हि केचण किदेव्ति स मामकेरो
सव्मं वहेइ सउहो मलयो उदारो ।
ते एव्थ तव्थवि वसंति अहो तमेदं
दव्ठुं तणेदुमवि को सदणं समव्थो ॥४७॥

(छाया) [मञ्चा हि केचन कृता इति सोऽस्माकीनः
साम्यं वहति सौधो मलय उदारः ।
तेऽत्र तत्रापि वहन्ति अहो तदिदं
द्रष्टुं तनोतुमपि कः सदनं समर्थः ॥]

(मन्दस्मितं करोति)

विजयकेतुः—(पुरतोदत्तदृष्टिस्त्वरितपदमुपसर्पन्) भगवति! सामीप्य एव रूप्यवेदिकायामिह वसति रघुनाथभूवासवः । सत्वरं कुमुद्वतीचन्द्रिकाकरधृतमुपायनमुपाहर । अहमाशु तं प्रणमामि ।

(इति प्रणन्तुमुद्युङ्क्ते)

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विदूषकः—(तथाविधं निवार्य) सहे विजयकेदो ! एसा रहुणाहजणाहिपइणो माणिक्कमयी पडिमा। (सर्वेपि साश्चर्यं पश्यन्ति)

(छाया) [सखे विजयकेतो ! एषा रघुनाथजनाधिपते र्माणिक्यमयी प्रतिमा।]

विजयकेतुः—सखे सारंग ! रघुनाथभूदेवेशसदेशमाशु मामुपनय ?
(विदूषको राजसमीपमुपनयति)

विदूषकः—इदो महाराओ। [इतो महाराजः।]

विजयकेतुः—(राजपार्श्वगतस्य विदूषकस्य हस्ते हारांम्बरादीन्युपायनानि दत्वा, पादयोः प्रणमति; राजा विजयकेतोः कोटीरमवलम्ब्य, सादरं)

सिंहळभूशिशिरांशो ! विश्रुतचरितैरितो विजयकेतो।
उत्तिष्ठ किञ्चिदुदयति भद्रं भवतः समं परिजनेन ॥४८॥

विजयकेतुः—(उत्थाय सविनयाञ्जलिवन्धं)

उद्दिश्य यत्प्रणमतामुदयत्यभीष्टं
राज्ञामसन्निधिजुषां रघुनाथभूप।
पादारविन्दयुगळं भवतस्तदेतत्
किं किं न यच्छति किरीटमुपागतं मे ॥४९॥

राजा—(तमालिंगति)

प्रतिभा—आलिंगितोयमधुना भवता रघुनाथपार्थिवेन्द्रेण।
मन्दरधर इव सागरमथने मधुभेदिना धृतो भाति ॥५०॥

विजयकेतुः—भवतो रघुनाथविभो पदमिदमवतंसितं मया शिरसा।
प्रतिभावत्या यत्नाद्भगवत्या मम च सुकृतपरिपाकात् ॥५१॥

राजा—अहो संविधानं ! अहो संविधानं ! तथाहि;
प्रतिभावत्या मत्या सुकवे नाटकमिदं सुसंघटितम्।
द्वीपान्तरमधिवसतो दर्शनमाश्चर्यमावयोस्तनुते ॥५२॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विजयकेतुः—वत्से! प्रणम लोकजननीं प्रणतजनसौभाग्यजननी-
मिमामिन्दिरामन्दिरकृतवसतिमिन्दिराम् ।

नायिका—(प्रणमति)

राजा—(साञ्जलिबन्धं)

तव हृदयसरोजस्थानमेवात्रसमी-
त्यभिनयमिव कुर्वन्त्यम्बुजाते निषण्णा ।
इयमनुदिनमारादिन्दिरामन्दिरेऽस्मि-
न्कलशजलधिकन्या कांक्षितं मे वितन्यात् ॥५३॥

(नायिकायै नासाभरणगर्भितं रत्नसमुद्गकं दत्तं)

नायिका—(सविनयं गृह्णाति)

प्रतिभा—(नायिकया तन्नासाभरणं धारयन्ती) वत्स विजयकेतो! किं ते भूयः प्रियमुपहरामि? किमितः परं प्रियमस्ति! तथापीदमस्तु भरतवाक्यम्;

आचन्द्रतारकमसाववनीमशेषा-
मंभोनिधानरशनामवदातकीर्तिः ।
रत्नांगदेन सदृशं रघुनाथभूमि-
जानि र्वहन्भुजतटे जयतु प्रहृष्टः ॥५४॥

॥ इति निष्क्रान्ताः सर्वे ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमदद्वैतविद्याचार्यसाग्निचित्सर्वतोमुखाति-
रात्रसाग्निचित्याप्तवाजपेययाजिगोविन्ददीक्षितवरनन्दनस्य श्रीयज्ञनारायण
यज्वनः कृतिषु रघुनाथविलासनाम्नि नाटके पञ्चमोऽङ्कः

॥ श्रीरामचन्द्राय नमः ॥

॥ श्रीभवानीशंकरार्पणमस्तु ॥

——0——

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

॥ अशुद्धिशोधनपट्टिका ॥

पुटसंख्या	पंक्तिसंख्या	अशुद्धिः	शोधनम्
१	१९	बुधविविध	बुधविविध
२	८	शीशिरीकृतसरसृप	शिशिरीकृतसरी
,,	१७	प्रसवास्त्र	प्रसवास्त्र
३	१६	सायूयं	साम्रूयं
४	११	विबुधविनर्तक	कविबुधनर्तक
५	६	साभ्युगमं	साभ्युपगमं
,,	९	षिहस्य	विहस्य
,,	२०	राचानमुषसृत्य	राजानमुपसृत्य
,,	२३	भूषनानि	भूषणानि
६	११	नाट्यचार्य	नाट्याचार्य
,,	१५	नटकसेरिन् !	नटकेसरिन् !
७	१६	शतमुखो	शतमखो
,,	,,	जेजीयते	जेजीयते
८	५	नाटयाचार्यः	नाट्याचार्यः
,,	१२	रजनाथ	रघुनाथ
९	११	श्रूयत	श्रूयते
,,	१६	यायजूकोजूको	यायजूको
१०	१८	पासवं	पाडवं
१२	१२	इत्यभिवदयति	इत्यभिवादयति
१३	९	प्येयं	प्येवं
१४	२	गृह्णीते	गृह्णीते
,,	६	पारचयावधा	परिचयविधौ
१६	८	महतिथीर्थं	महीतीर्थं
,,	२३	रालाक्येत	रालोक्यत

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

१९	१	तं	तं
,,	१०	सोदव्ग	सोदव्ग
२०	१४	धन	घन
,,	२२	प्रजुव्तं	(प्रं)जुव्तं
२१	३	फलम्रमः	फलभ्रमः
,,	,,	प्रयुक्तमेव	(प्रं)युक्तमेव
२२	१९	ज्वालैरपि	जालैरपि
२४	१६	याश्चेदंप्रथमा	याच्चेदंप्रथमा
२५	१७	उव्तमंगव्सवि	उव्तमंगव्सवि
२६	६	मार्श्व	पार्श्व
२७	१३	विकल्प्पो	विकल्पो
२८	१४	सि(सा)मिणे	सा(सि)मिणे
,,	२२	सत्कारण	सत्कारेण
,,	२४	भवन्तमवाहामदानीं	भवन्तमेवाहमिदान
२९	१२	कोशगृहे	कोशगृहे
३१	८	ए ताहे	एव्ताहे
३४	१३	सखे	सखे
३५	१	ससं	समं
,,	२२	प्रवहताति	प्रवहतीति
,,	२३	परिश्रान्तविव	परिश्रान्ताविव
३६	१२	हंसकौघैः	हंसकौघैः
४०	१४	कस्याश्चित्	कस्याश्चित्
४१	१४	विजव्यस	विजयव्स
४३	३	पेव्छंति	पेव्खंति
४५	१०	स्वागतं	स्वगतं
४९	३	संहे	सहे

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

,,	११	कोइल	कोइल
,,	२०	सविस्सयं	सविस्मयं
५०	१२	नताङ्या	नताङ्ग्या
,,	२२	तावुभा	तावदुभा
५१	१९	सर्वायव	सर्वावयव
५२	१५	निश्चयोतत्	निश्चययोतत्
५६	१	द्वीपेश्वरः	द्वीपेश्वरः
,,	८	उत्थातुभिच्छति	उत्थातुमिच्छति
,,	१६	किं	किं
५७	३	गृह्वन्	गृह्वन्
,,	७	उन्तिओ	उन्तिओ
६०	१	तत	ततः
,,	७	रघुवाथ	रघुनाथ
,,	१३	भव्खवव्गं	भव्खवव्गं
६१	१५	लव्स्वीकिदो	लव्खीकिदो
६२	८	मोहादेयः	मोहोदयः
,,	१२	किं	किं
६३	१०	विचिन्य	विचिन्त्य
६४	१६	घनपवन	घनपवन
६५	१	सस्वे	सखे
,,	१०	कीडाबिस	कीडाबिस
६६	१३	चउव्खं	चउव्खं
६८	१८	पेव्खेदण्हो	पेव्खेदण्हो
६९	७	संगींत	संगीत
७०	६	प्रियतमा	प्रियतमा
,,	,,	लोचन.	लोचनः

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

,,	१०	णिडण	णिउण
,,	२१	अवष्टम्भाति	अवष्टभ्नाति
७१	१०	साभ्सुपगमं	सा1युपगमं
,,	,,	धिलिख्य	विलिख्य
,,	२२	वयस्अ !	वयस्य !
७२	२१	कियदिति	कियदिति
७३	२१	तुस्याः	तस्याः
७५	३	लज्जावर्वीव	लज्जावतीव
,,	१७	रांजानं	राज्ञानं
,,	२१	खंडिअ	खंडिअ
७६	२३	अध्यासानिनो	अध्यासीनो
,,	२२	अम्भोरूहिणी	अम्भोरुहिणी
,,	,,	सह्यसुता	सह्यसुता
८१	७	गांभयिमम्भोनिधिं	गांभीर्यमम्भोनिधिं
,,	१३	मनः प्रवृत्तिः	मनःप्रवृत्तिः
,,	२४	विभार्ति	बिभर्ति
८३	१	रयेन	रयेण
,,	१७	कंकणैखि	कंकणैरिव
८४	४	मुञ्जन्ती	मुञ्चन्ती
८६	,,	पयोजिनीविद्रव	पयोजिनीविद्रव
,,	५	वाल्लिसन्दाहे	वल्लिसन्दोह
,,	,,	विरचितवनदवेन	विरचितवनदेवन
,,	,,	देवताडोला	देवताडोला
,,	,,	विहरणसाक्षिणो	विहरणसाक्षिणो
८६	१७	अंगुळयग्रेण	अंगुळ्यग्रेण
,,	२०	रमणीधृत	रमणीधृत

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

SRI JAGADGURU
JNANA SIMHASAN JNANAMANDIR
160 LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 6474

८८	१२	सज्ञात	सज्ञात
९०	९	दीळत	दळित
९१	१	त्रयमिय	त्रयीमय
९३	१०	साश्चर्यानन्दम्	साश्चर्यानन्दम्
,,	१२	निर्दिशम्	निर्दिशन्
,,	१४	पदर्थो	पदार्थो
९५	१२	इसाए	इमाए
९६	१	हायू	यूहा
,,	१८	सर्ा	सर्वा
९७	४	अंगुळयग्रेण	अंगुळ्यग्रेण
,,	७	चन्द्रकले !	चन्दकले
१००	६	रहुणाआ	रहुणाहा
,,	७	एताए	एदाए
१०१	५	चन्द्रकले !	चन्दकले
१०२	९	आकाव्णाअद	आकव्णाअद
१०५	१८	योग	योग
१०८	५	एतवत्येव	एतावत्येव
११०	१३	रोकत	रोचते
,,	१६	सार्वेपि	सर्वेपि
११५	१०	साश्चर्यानन्दं	साश्चर्यानंदं
११६	१	निष्क्रान्त	निष्क्रान्तः
१३०	१	प्राथनीर्यो	प्रार्थनीयो
१३४	१०	प्रत्युपकारोति	प्रत्युपकरोति
१३६	१९	तुण्डीरण्मडल	तुण्डीरमण्डल
१४०	१७	सिखा	शिखा

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative